नं० ६३२-घ

अलंकारकौस्तुभविवरणम् (अपूर्ण)

(अलंकारशास्त्रम्)

नं० ६३२-घ

पत्राणि ११२

२२२

११२ पत्राणि

नं. ६८२-धं० ६६३२-ध

अलंकारकौस्तुभविवरणम् (अपूर्ण)

पत्राणि ११२ (अलंकारशास्त्रेम्)

अलंकारकौस्तुभ

अ·टी·
१

ॐ श्रीमहागणेशाय नमः वाग्देवतां द्विरदवक्त्रमपि प्रणम्य लक्ष्मीधरस्य विदुषश्चरणाम्बुजास्य भावानलं
करणकौस्तुभगुंफितानामस्वान्विशेषयतो विवरितुं यतते समासात् १ अभिमतकर्मारंभसमये सदाचारानुमित
श्रुतिबोधितकर्तव्यताकं प्रारीप्सितप्रतिबंधकदुरितनिहत्नये कृतं मंगलं शिष्यहितार्थं निबध्नाति दत्तस्तन्येति
करस्पृष्टं उत्ताया अग्रिमभुवा पुष्करभागेन स्कंदस्य षण्मुखत्वेन एकमुखेन स्तनपाने मुखानां तदलाभ
कृतवैमनस्यनिहत्नये तेषु अन्यस्तरसदानं भगवतो लंबोदरस्य च गजमुखत्वात्तयो कुंभलग्नमदलवभ्रमराणां
स्कंदेन वक्रभुजनतया वारणमिति परस्परस्नेहवर्णनं तिर्यग्दर्शनं तदवस्थायां बालकस्वभावः स्कंदस्य अस्या
त्वेपि भ्रातृज्यायस इति द्वैमातुरस्य पूर्वनिपातः गणेश्वरगुहयोर्विघ्नविनाशकत्वं प्रसिद्धमेव तथा च स्मृतिः आ
दित्यस्य सदा पूजां तिलकस्वामिनस्तथा महागणपतेश्चैव कुर्वन्सिद्धिमवाप्नुयात् तत्प्रसंगेन सर्ववाङ्मयरू
पिण्या जगदंबिकाया अपि प्रतिसंधानं तदुक्तं वायुसंहितायां शब्दरूपमखिलं धत्ते शर्वस्य वल्लभा अर्थ
स्वरूपमखिलं धत्ते बालेंदुशेखरः अत्रोक्तपरमदेवताविषयकभावध्वनिः प्रधानं गणेशगुहयोः परस्परवि
षयकभावश्च तदंगं स्वभावोक्तिरर्थालंकारः स्वगुरुप्रणाममाह लोकेति अंधकारपदेन वस्तुविवेकप्र
तिकूलत्वसाधर्म्येण अज्ञानस्यापि लाभात् अस्य तिमिराभेदसूचनं शक्तिलक्षणाभ्यामुपस्थितयोरर्थयो

१

गंगायां घोष इत्यादावभेदप्रत्ययाभ्युपगमात्। न त्रिवर्गैकत्वेन परागेषु प्रदीपत्वारोपः विधेयवकल्पलताः नेकदुर्लभा
र्थप्रदत्वात्‌ बीजत्वं तदुत्पत्तिहेतुत्वात्‌ निजपदं परागपदं मध्ये मौलि शिरोमध्ये पारेमध्ये षष्ठ्या वेत्यव्ययीभावः मूमे
तस्य मौलिना सहान्वयः आसतामिति इष्टेन आस उपवेशने इत्यस्य लोटि मध्यमपुरुषैकवचनं श्रीपदमुत्कर्षसूचकं
लक्ष्मीः सर्ववाङ्मयरहस्यावगाहनजन्यानिर्वचविशेषस्तदन्यापेक्षोत्कर्षधीजनकतयानुभवसिद्धः यदभिप्रा
येण शोभते स्पमुस्वयमेवं वेदेति गर्गत्रिरात्रब्राह्मणवाक्ये योगपानुपलब्धिदोषनिराकरणाय भगवता जैमि
निनार्थवादाधिकरणे विद्याप्रशंसेति सूत्रितं गंगाधरादिवत्साधुत्वं पतेन स्प्रेषोपस्थितनारायणः भेदसूच
नं आचार्यं मां विजानीयान्नावमन्येत कर्हिचिदिति श्रीभागवतात्‌ अंघ्रिनलिनेत्युपमितसमासः उदीतेति ईल
कांतिगतिदेपप्रजनखादनेष्विति कविकल्पद्रुमपठितस्य उन्पूर्वस्य रूप प्रियस्तनेः स्पष्टमुदीतकंटकामित्यादिवत्‌ ॥
चिकीर्षितं प्रतिजानन्नेव प्रयोजनायाह अर्थेति अलंकाराद्विधा शब्दार्थभेदात्‌ शब्दालंकारा यमकादयः अर्था
लंकारा उपमादयः आद्येषु तथाविचारणीयाभावादर्थालंकारा एव विचार्यंते अनेकविप्रतिपत्तिगहनत्वात्‌
अप्रामाण्यशंकानिरासाय भूरिग्रंथेतिपीनहस्त्यधारणायसाधेति प्रयोजनमाह स्त्वैवेति नद्वोधकामस्याधि
कारीति सामर्थ्यादेव लभ्यते तथाचाहुः सिद्धार्थसिद्धसंबंधं श्रोतुं श्रोता प्रवर्तते शास्त्रादौ तेन वक्तव्यः संबंधः स

प्र॰टी॰

२

प्रयोजनः परमप्रयोजनं तु यत्काव्यस्य तदेवास्यापीति बोध्यं तच्चान्यत्र स्पष्टमिति नात्र प्रपंच्यते अस्य ग्रंथस्य मंदद्रुर्बोध
तामाह धियामिति सर्वविधेयबालिशाज्ञ इत्यमरः एतेन मंदार्थमेतन्निर्माणनिरासः विनयार्थमाह बुधानामिति
स्ववेनाप्याथानेशाकांस्वाधीनं स्वकरमित्यर्थः आनंदयतु जितिआदंमाह्लातोः प्राकार्थेयुच् बुधानां ज्ञानस्य सिद्धार्थ
त्वान्नदर्थं नावेदनदारंभ इति व्याहतमेवा चमत्कारोपि तेषामेतादृशस्वल्पार्थान्नस्यादेवेत्यर्थः परिस्नवयति वं
चलंकरोति ग्रंथे प्रवर्तयतीत्यर्थः निबंधाः काव्यप्रकाशादयः अभिसंधानमभिप्रायः तन्नदभिप्रायाणां तन्न
ग्रंथेषु व्यस्तत्वादेकत्र संग्रहः सौकर्यार्थं क्रियत इति भावः तत्रार्थोपकारद्वारा रसोपकारकत्वमर्थालंकारत्वमि
ति सामान्यलक्षणं प्रसिद्धं साक्षाद्रसोपकारकेषु गुणेषु व्यभिचारवारणाय द्वारांतं तस्य स्पष्टत्वादुपेक्ष्य काव्यप्र
काशसंमतालंकाराणामेवात्र व्यवस्थापनीयत्वात्स्वचयनप्रतदन्यतमत्वरूपं लक्षणांतरमपि योतयन्नाह प्रथे
ति भावोक्तिः स्वभावोक्तिः वक्रोक्तिः व्याजोक्तिः प्रतीपेत्यत्र संयोगस्य पादादिगतत्वात् तस्मिन्परतो भ्रमेत्यत्र
त्यस्य प्रकारस्य न गुरुत्वं तदुक्तं हि वृत्तरत्नाकरे पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः पुरःस्थितेनानेन स्याल्ल
घुतापि क्वचिद्गुरोः ॥ नन्वलंकारांतराणपि ग्रंथांतरेषु दृष्टत्वादिति तदनभिधानात् न्यूनतेत्याशंक्याह विदग्ध
वैरिति तेषां तु विदग्धेशीर्यैरेवाभ्युपगमान्निरसनीयत्वान्नतथेति भावः यद्यपि तदिह शास्त्रक्रमेणैव विभाग इत्युपमा

२

निरूपणप्राप्यम्प्रमर्ष्यादेवसिद्धं तथापिप्रथमोद्देशएवकिंबीजमित्याद्देपमाशंक्य तत्रनियामकमाह तत्रयत्किं
चिदित्यादि भरतेनालंकारशास्त्रस्यप्रामाणिकत्वसूचनं अनेनन्वयाद्रावपिसादृश्यप्रतीतिपर्यवसानं स्पष्टमे
व भंगिभेदात्वलंकारभेदइतिभावः एवंचभरतशास्त्रेपिउपमायाः प्रथमोद्देशइदमेवनियामकंबोध्यं य
द्यपिप्रकृतित्वंनवचनसाध्यं तथापितत्त्वमतत्वसूचनायभरतवचनोपन्यास लक्षणमिति लक्षणज्ञा
नाभावेधर्मिणएवसम्यग्बुद्धावनारोहात्सामान्यनिरूपणानंतरमेवविशेषस्यनिरूपणत्वादित्यर्थः आरे
त्यत्रकारिकाकृदितिशेषः कारिकायांतत्रेत्यस्यलक्षणेनभावेप्रयोजनाभावान्निर्द्धारणपरतयायोजयति
तत्रनिरूपणीयेति निरूपणंचस्वरूपभेदादिबोधजनकशब्दः अलंकाराःशिष्यबोधविषयीभवंत्वितिसाका
रेकेच्छाविशेषत्वेविषयत्वरूपेणकृत्यप्रत्ययार्थः व्यापारानुवंधिनीविषयतामादायप्रकृत्यर्थेस्य[illegible]प्रत्य
यार्थेऽन्वयः उपमेयोपमापिलक्ष्यैवेतिचित्रमीमांसामतनिरासायाह उपमेयोपमावारणायेति एकप
दोपादानेनतत्रचंद्रइवमुखंमुखमिवचंद्रइतिवाक्यद्वयबोध्यत्वान्नव्यभिचारः नचैवमप्यव्यभिचारतादव
स्थमिति वाच्यं प्रत्येकमेकवाक्यवाच्यत्वसत्वात् वाक्यभेदरहितायामुपमेयोपमायांतस्यतदामेवतथा तत्रैक
वाच्यत्वसत्वादितिवाच्यं उपमेयत्वाभिमतप्रतियोगिकोपमानहृतिसादृश्यविषयकत्वेनविषयत्वेनतात्प

प्र॰टी

२

3

र्यविषयत्वस्य तदर्थत्वात् वाच्येति वाक्यार्थज्ञानविषयीभूतेत्यर्थः तेन लक्ष्यसादृश्यस्यापि संग्रहः नन्वेवं उपमे
यत्वाभिमतप्रतियोगिकोपमानवृत्तिसादृश्याविषयकज्ञानविषयत्वेन तात्पर्यविषयत्वे सति भिन्नत्वनिरूपि
तसादृश्यमुपमेति पर्यवसितं तथा च व्यतिरेके व्यभिचारः तत्रापि सादृश्यस्य यथोक्ततात्पर्यविषयत्वात् न
च व्यतिरेकपदवाचकत्वे तात्पर्येण तत्सादृश्यस्येति वाच्यं धर्मान्तरप्रयुक्तसादृश्याभावस्यैव व्यतिरेकपदार्थतया सा
दृश्यस्यापि तद्विषयत्वानपायात् निषेधतया तात्पर्यविषयत्वनिवेशेऽपि समययोः प्रत्ययमप्राचीनं तु नवप्राचीनव
द्विषेत्यादौ ज्ञाते न बोधसादृश्यरूपोपमायामव्याप्तेश्चेत्यादिदोषोद्धारायाह फलितार्थोऽस्येति अर्थाल
ङ्कारत्वनिर्वाहाय व्याचष्टे यच्छब्दबोध्यायामिति यस्यां शाब्दबोध्यायामिति कर्मधारयः शाब्दबोध्यत्वं च तत
ज्जन्यबोधविषयत्वमात्रं तेन चन्द्र इवेत्यादौ प्रतियोगितायाः संसर्गतयैव भासमानत्वाच्छब्दार्थत्वाभावेऽपि
न क्षतिः यच्छब्दार्थस्य शाब्दविशेषणत्वे विधेयपरामर्शिणा तच्छब्देन तस्यैव परामर्शे शाब्दोद्देश्यतैवोपमान
त्वविधानापत्त्या वैसंगत्यप्रसंगात् उक्तरीत्या तु प्रतियोगिताया एव यच्छब्देनोपादानेनानुपपत्तिः तथा च
शाब्दबोध्यत्वमपि प्रतियोगितायां विशेषणं देयमित्यर्थः उपमानवृत्तिसादृश्यप्रतियोगित्वमेवोपमेति
मतमाश्रित्येदं सादृश्यमेवोपमेति पक्षे तु यन्सादृश्येऽन्वयस्य सादृश्यस्य प्रतियोगितायामिति यत्पदार्थः

२

सादृश्यविशेषणं सादृश्ये च शाब्दबोधे तद्विशेषणं पूर्ववत् सा उपमेति स्त्रीत्वं तु विधेयलिंगग्राहित्वात् न तूक्तं कैयटादि
भिः ॥ उद्देश्यप्रतिनिर्देश्ययोरैक्यमापादयन्ति सर्वनामानि पर्यायेण तल्लिंगमुपाददत इति क्वचिदुद्देश्यलिंग
तान्वच्छिन्नविधेयलिंगता विवक्षाभेदादिति तदर्थः एवमन्यत्राप्यवसेयं उभयाभाव इति उभयप्रतियोगिकोऽन्यत
रत्वावच्छिन्नप्रतियोगिताकोऽभाव इत्यर्थः न तूभयत्वावच्छिन्नप्रतियोगिताकः तथा सत्यन्वये उपमेयताव
च्छेदकावच्छिन्नत्वमसत्वेऽपि सादृश्यमात्रवृत्तित्वानवच्छेदकधर्मसामानाधिकरण्येनास्तीत्युभयत्वाद्यवच्छिन्नप्रति
योगिताकाभावसत्वाद्व्यतिरेके च सादृश्यमात्रवृत्तित्वानवच्छेदकधर्मसामानाधिकरण्येन सत्वेऽपि उपमेयतावच्छेद
कावच्छिन्नत्वं प्रतियोगितायां नास्तीति तादृशाभावसत्वाद्व्यभिचारतादवस्थ्यापत्तेः ॥ अन्यतरत्वावच्छिन्नप्रतियो
गिताकस्त्वभावोऽन्यतरवति न संभवतीति न तदुभयत्र व्यभिचारः न चोभयाभावपदेनोभयस्यैव प्रतियोगिता
वच्छेदकत्वं लभ्यत इति वाच्यम् भूतत्वमूर्तत्वोभयवान्मूर्तत्वादित्यादौ द्वित्वाद्यवच्छिन्नाभावस्य तथात्वेऽपीति दी
धिवाके द्वयवृत्तित्व्यधिकरणधर्मावच्छिन्नाभावपरतयापि व्याख्यानदर्शनात् उत्सर्गस्य बाधके सत्यप्रयो
जकत्वात् स्फुटमिति तत्र चेद्वत्वस्य सादृश्यप्रतियोगितावच्छेदकतया चेद्वृत्तिसादृश्यप्रतियोगितायां उपमेय
तावच्छेदकावच्छिन्नमुखत्वावच्छिन्नाभावस्योक्तप्रतियोगिताश्रयीभूतचन्द्रमात्रवृत्तिप्रतियोगितानवच्छेदक

ग्र॰ टी॰
४
५

धर्मसामानाधिकरण्याभावस्य च सत्वादित्यर्थः नन्वत्राश्रयमात्रेत्यादि विवक्षायामसम्भवापत्तिः चंद्रमात्रवृत्तिः प्रति
योगितानवच्छेदकस्य धर्मस्य चंद्रमात्रवृत्तिभेदत्वस्यादिः तत्सामानाधिकरण्यस्य प्रतियोगितायां सत्वादित्यत आह
उक्तधर्मस्येति तद्वाक्येति उक्तमाश्रयत्वाभिमतवाक्यार्थविषयीभूतेत्यर्थः तथा च तादृशभेदादेश्चंद्रमात्रवृत्तित्वे
पि चंद्रत्वमस्त्वित्यितद्वाक्यावोध्यत्वाभावान्न दोष इत्यर्थः नन्वेवमपि चंद्रत्वमस्त्वित्यत्र चंद्रमात्रवृत्तिः प्रति
योगितानवच्छेदकस्तद्वाक्योपस्थाप्यस्य धर्मो प्रसिद्ध एव भूत्वं तत्सादृश्ययोश्चंद्रेतरवृत्तित्वात् चंद्रत्वस्य प्र
तियोगितावच्छेदकत्वात् अन्यस्य तद्वाक्यानुपस्थाप्यत्वात् मैवं प्रतियोगितारूपस्यैव तादृशधर्मस्य लभ
त्वात् न च तस्यास्तत्सामानाधिकरण्यस्यैव सत्वादसंभव एवेति वाच्यं भेदगर्भसामानाधिकरण्यस्य तत्राप्यभा
वोपपत्तेः चंद्रत्वावच्छिन्नप्रतियोगिताया चंद्रेतरावृत्तित्वस्यापि सत्वात् व्यधिकरणधर्मावच्छिन्नाभावानभ्यु
पगमात् अभ्युपगमे वा तस्य संयोगत्वावच्छिन्नतया सादृश्यप्रतियोगिताया अन्तथात्वेन तद्भिन्नत्वात् स्व
पदेन सादृश्यनिरूपितप्रतियोगिताया एवधारणात् नैवमिति एतद्वाक्योपस्थाप्यत्वस्यापि धर्मे विशेष
णीकरणे इत्यर्थः अनयोनेति व्यतिरेके हि किंचिदपकर्षहेतुः शाखोपात्तः क्वचिदर्थलभ्य इत्यर्थे वक्ष्यते तत्रोप
मानवृत्तेरपकर्षहेतुधर्मस्य शाखोपात्तत्वे तस्यापि तद्वाक्योपस्थाप्यत्वाभावप्रयुक्तस्य तादृशधर्मसामानाधिकरण्य

४

भावस्यैवसत्त्वादतिव्याप्तिरितिभावः नचापकर्षहेतुधर्मोपादानेपितस्योपमानवृत्तित्वाभावात्कथंनातिव्याप्तिः॥
कलंकादेरन्यत्रापिसत्त्वान्नैवम् तद्वाक्यार्थउपमानेतरवृत्तित्वेनप्रतीयमानत्वाभावस्यैवतदितरावृत्तित्व
स्यविवक्षितत्वात् यद्वोपमेयावृत्तित्वमेवतेनविवक्षणीयं तदर्थस्तुविशेष्यत्वप्रकारत्वाःन्यतरसंबंधेनउप
मेयवृत्तिधर्माभेदाघटितत्वं अन्यथाचन्द्रमुखादिरवृत्तिरमणीयत्वादेर्वस्तुतोभिन्नतयासंभवापत्तेः पांडो
यमित्यादौहारनिर्झरादेरभेदारोपस्यावर्णकतयानिर्झरस्ययथोक्तोपमेयावृत्तित्वाभावान्नव्यभिचारः न
चैवमपिसादृश्यप्रतियोगित्वरूपतादृशधर्मसामानाधिकरण्यस्यसादृश्यप्रतियोगितायामसत्त्वादसंभवता
दवस्थ्यंइतिवाच्यं भेदगर्भसामानाधिकरण्यनिवेशस्योक्तत्वात् साक्षादिति नयाचव्यतिरेकविशेषेन
थान्तेपितस्यालंकारसादाद्विभागकत्वाभावाद्व्यतिरेकत्वावच्छिन्नाभावस्यचोक्तलक्षणानाक्रान्तत्वान्नव्य
भिचारः नतत्रयस्याःप्रतियोगितायामलंकारसादाद्विभाजकोपाध्यवच्छेदकेनयथोक्ताभावइतिपर्यवसनी
तिभावः वस्तुतस्तु तद्वाक्योपस्थाप्यत्वंतद्वाक्यतात्पर्यविषयत्वमात्रं ननुतज्जन्यशाब्दधीविषयत्वमात्रमेव
अतोःनुपात्तापकर्षहेतावपिव्यतिरेकेःपकर्षप्रयोजकधर्मस्यतद्वाक्यबोध्यसादृश्याभावप्रयोजकतयाता
त्पर्यविषयत्वसत्त्वान्नादृशधर्मेतिष्ठ तद्वाक्योपस्थाप्यत्वाभावप्रयुक्तोपितादृशधर्मसमानाधिकरणाभा

अ॰टी॰
५
5

वोनास्तीतिनव्यभिचारः चंद्रादिमात्रवृत्तिभेदव्यक्तादेश्चवलनत्संद्रेतत्राहृत्तित्वेपिनह्याकांतात्पर्यविषयत्वाभावात्
तत्सामानाधिकरण्यस्यप्रतियोगितायांसत्वेपिनासंभवावकाशइतिध्येयं प्रतियोगितावच्छेदकेतिधर्मसं
बंधोभयपरं समवायेनघटपटाद्यभावस्यसंयोगसमवायाभ्यांघटाभावस्यप्रतियोगितायाभेदात् नचस्व
निरूपकाश्रयभेदेनापितद्भेदइत्याह भूतलेति तदादीत्यर्थः भूतलपर्वतादिनिष्ठोयोघटात्यंताभावःतादृ
शश्चयोघटान्योन्याभावः तत्प्रतियोगितयोःस्वनिरूपकाश्रयभूतलपर्वतादिभेदेनभेदाभावात् संयोगेन
घटत्वावच्छिन्नाभावीयप्रतियोगितायास्तादात्म्येनघटत्वावच्छिन्नभेदीयप्रतियोगितायाश्चाभावाधिकरणे
भेदेपिभेदाभावादितियावत् अत्यंताभावान्याभावीयघटत्वाद्यवच्छिन्नप्रतियोगितयोस्तु संयोगादितादात्म्य
रूपावच्छेदकसंबंधभेदाद्भेदः भेदीयप्रतियोगितायाःसंबंधानवच्छिन्नत्वपक्षेतदनवच्छिन्नत्वावच्छिन्नत्वा
भ्यामेवतद्भेदेनत् प्रकृतेचसादृश्यपदार्थानरत्वेप्रतियोगितायाःसंबंधावच्छिन्नत्वमेवनास्ति तद्भिन्नत्वे
सतीत्यादिरूपत्वेपितादात्म्यावच्छिन्नत्वमनवच्छिन्नत्वमेववासवधीवच्छेदकसंबंधभेदाभावाद्भेदइत्तद्रूपावच्छे
दकधर्मैक्याच्चनसादृश्याश्रयभेदाद्भेदःसंभवतीतिसमुदायार्थः नचैवमिति चंद्रश्चचंद्रइत्यत्रापिमेयत्वावच्छे
दकीभूतचंद्रत्वावच्छिन्नत्वाद्वयमस्वेभिन्नत्वापिप्रतियोगितायास्तदभावोनस्यात् वाक्यभेदेनप्रतियोगिताभे

५

त्वाभावादित्यर्थः तदुपमेति तदिति पदविशेषणं तथाचेवादिपदं तत्समभ्याक्तित्वेन धृतायास्तदौपम्यायाः सादृश्यप्र
यस्तु तियोगिकत्वेन गृह्यमाणं सप्तम्यविशेषणे भवति नहि तद्धर्मो ज्ञोपमेयतावच्छेदकपदेन विवक्षितः इति
नासंभव इत्यर्थः उक्तस्थलेऽपीति इवपदस्यैकत्वादाहृत्यैवमानाभावात् तेनैवपदेनोपस्थाप्यं चन्द्रप्रतियोगि
कत्वेन गृह्यमाणं सादृश्यं चन्द्रत्वेन च विशेषणं एवं च चन्द्रनिष्ठायां प्रतियोगितायां मुखत्वावच्छिन्नाभावस्य
त्वाय लक्षणेन यन्नैशान्तेरपि न दुर्वारं चन्द्रत्वावच्छिन्नतान्नद्वारेणैव तु शान्तेरपि न दुर्लभमिति चन्द्र इव मुखमि
त्यंशे लक्षणत्वाभावात्मानि व्याप्तिरिति परिहरति उक्तेनेति उक्तरीत्यांशतोऽपि लक्षणाभावमाशंक्याह अतिरिक्तेति
मुखनिष्ठोपमेयतानिरूपितत्वविशिष्टायां प्रतियोगितायां मुखत्वावच्छिन्नताभावसत्त्वादित्यर्थः अनन्वयाभा
वादिति अंशतोऽलक्षणगमनरूपायाश्चानुपपत्तेरभावादित्यर्थः तेन प्रतियोगितमतिरिक्तमिति पदेऽपि व्यव
च्छेदकैकत्वे नेदानभ्युपगमात् संगतिरिति शंकाह तदयमेवपदस्य फलितार्थः उक्तस्थले शैतः स्फुमालिका
रत्याभ्युपगमेनापयुक्तः उपमेयोपमायामपि उपमाप्रतीतिप्राभाग्यतार्थितापत्तेः नाप्यंशत उपमासंभ
वति उक्तरीत्यानन्वयांशे व्याप्तिव्याप्तेः नन्वनन्वये तदादिकथनं प्रकृतानुपयुक्तं प्रसंगत्वं च न स्याद्धि प्रतीय
मानायाश्च सादृश्यप्रतियोगितायाः प्रकाशनादृशत्वात् समत्वेन मुखनिष्ठसादृश्यप्रतियोगितेन चन्द्रमवगाहमा

प्र॰दी॰
६
6

नेत्तानमपि नस्यादित्यर्थः यथोक्तबाधबुद्धौ न तादृशप्रतियोगिताश्रयाभेदः तादृशप्रतियोगितात्वं तदभावो वा चं
द्रे विशेषणं चंद्रश्च चंद्रः इत्यत्र तु चंद्रप्रतियोगितया सादृश्ये तच्चाश्रयतया चंद्रे विशेषणं चंद्रविशेष्यकप्र
तियोगित्वाभावज्ञानं च सादृश्यविशेष्यकप्रतियोगित्वसंसर्गकचंद्रप्रकारकज्ञानेन प्रतिबंधकप्रतियोगि
त्वसंबंधावच्छिन्नप्रतियोगिताकचंद्राभावप्रकारकसादृश्यविशेष्यकबोधस्यैव तथात्वात् अत उक्तबाध
सत्वे चंद्रश्च चंद्रः इत्येतद्वाक्यार्थबोधे प्रतिबंधकाभावः स्तनेराचंद्रश्च मुखमित्यत्रेति चेन्न सत्यम् प्रकारांतरे
ण व्याख्येयत्वात् तथाहि नञ् शाब्दबोधे तावत्प्रतियोगितायां विशेषणं दत्तमेव तच्च प्रकृते प्रतियोगितया
संसर्गतया शाब्दधीविषयत्वरूपं प्रतियोगितायां वाच्यं तस्याश्च प्रतियोगितात्वेनैव संसर्गत्वं न तत्तद्विशिष्ट
प्रतियोगितात्वेन मानाभावात् तथा च यन्निष्ठोपमेयत्वनिरूपितत्वविशिष्टायां यस्यां प्रतियोगितायामि
त्युक्ते तादृशरूपेण तस्याः संसर्गतानभ्युपगमेन तस्याः शाब्दबोधत्वानन्वयात् मेवम् निरूपितत्वस्य शा
ब्दबोधत्वस्य तस्यामेकत्वद्वयमिति रीत्या लक्षणवाक्यार्थबोधे बाधकाभावात् वह्निसंयोगत्वस्य प्रतियोगि
संसर्गतावच्छेदकत्वेपि पर्वतो वह्निमानित्यादौ वह्निसंयोगः संयोगत्वेन संसर्ग इत्यादिव्यवहाराभावात् अत एव चं
द्रश्च मुखमित्यंशे लक्षणसंगतिर्नान्यत्रेति भावः न हि तत्प्रतियोगितानिरूपकानुयोगितावच्छेदकमात्रमुप

६

मेयतावच्छेदकपदेन विवक्षितं तदुक्तरीत्या शशतोपिलक्षणंनीयमे येनानन्वयांशेपि तत्स्यात् किंतु यत्त्रिशेषप

मेयतानिरूपितत्वविशिष्टायांप्रतियोगितायांउपमेयतावच्छेदकावच्छिन्नत्वाभावइति विवक्षितं प्रतिवे

दमुपमांशे नत्वनन्वयांशे नहि तत्साधारण्यंइदंनिष्ठोपमेयतानिरूपितत्वविशिष्टप्रतियोगितात्वेनमुखेनिष्ठोपमे

यतानिरूपकत्वं किंतु प्रतियोगितात्वेनैव तथाच तन्निष्ठोपमेयतानिरूपितत्वावच्छिन्नोक्तप्रतियोगितानिरू

रूपकतानुयोगितावच्छेदकावच्छिन्नत्वाभावोलक्षणमिति निष्कर्षइति भावः नचोपमाप्रतीपसंग्रहालंवनरू

पायाउपमेयोपमायाअसंग्राहत्वं उपमानत्वयसंग्रहालंवनरूपस्योक्तस्यतत्संग्राहत्वमिति तत्र किंमानमि

तिवाच्यं तत्रालंकारान्तरत्वं तांत्रिकैरुक्तं ननु चैतस्यैवमाननत्वात् लक्षणालक्ष्यत्वव्यवस्थायां प्रामाणिकव्यव

हारस्यैवमानत्वात् नेदेतदाह यत्रपदेवात उक्तरीत्या चंद्रइवमुखमितिप्रशलक्षणत्वादेवेत्यर्थः चंद्रइतियाराक चंद्रप्रति

साहश्याभाववाध्यं इति वाधस्योपलक्षणं अपिशब्दोवाधाभावसमुच्चयार्थः तथाच चंद्रविशेष्यकचंद्रसादृश्य

प्रकारकज्ञानकालीनतदभावकालीनोवामुखविषद्रसादृश्यमितियत्रबोधस्तत्रोपमैव उपमेयोपमायांतुमुखसा

दृश्यप्रकारकत्वाभाववद्वृत्तिचंद्रसादृश्यप्रकारकत्वविषयदाज्ञानेनतदास्यैवालंकारः अन्यतरमात्रप्रकारक

त्वविज्ञानस्थलेतु उपमाप्रतीपयोर्यथायोगंभवति तथाच उपमात्वप्रयोजकवोधस्योभयज्ञानकालेपिस

प्र·दी·
८

स्यत्वान्न दंशे लक्षणगमनादिति हेतोर्नातिव्याप्तिरिति शेषः अत एव चंद्र इव मुखं इति । लादेः समासमभिः मुखमिव चंद्र
इत्यत्रोभयोः शक्तानेनोपमाप्रतीपं वा किं त्वेकोपमात्वज्ञाने इति पूर्वोक्तस्य ८ प्रेमतत्रव्यभिचारवारणायोपाययमा
ह उपमानोपमेयत्वं चेति त्वप्रत्ययार्थस्योभयत्रान्वयः द्वंद्वान्ते श्रूयमाणं पदं प्रत्येकमभिसंबध्यते इति व्युत्प
त्तेः पदग्राह्यस्य शक्यमात्रपरत्वात् व्याप्तिविशिष्टपक्षधर्मितेत्यादौ तत्यादर्शनात् पदे स्मरद्वयतः रत्नादौ द्वंद्वो
नरकाद्र. प्रत्ययार्थस्याचारस्य उभयान्वयिता भाष्यादिसंमतत्वाच्च तत्त्वेनेति तल्लिट् सादृश्यप्रतियोगित्वनत
त्वतियौगिकसादृश्याश्रयत्वेन चेत्यर्थः उपमेयोपमायामपि प्रत्येकांशस्य नोपमाप्रतीपलक्षणलक्ष्यत्वमि
ति पूर्वोक्तिबलादाह उपमेयोपमायामपीति अप्रैथ्वमिति अप्रसिद्धधर्मिण्युपमानत्वादिप्रसिद्ध्यसंभवा
दर्थितो धर्मिणोपि लोकप्रसिद्धत्वपर्यवसानात् न च चंद्रसंभवत्वफले लोकप्रसिद्धत्वमेवेति वाच्यम् अनलप
दस्य तात्पर्यपरत्वात् तस्योभाभ्यामप्यादरणीयत्वात् तेनेति ज्ञानेनतु पूर्वत्र प्रमारूपं उत्तरत्र तु ननत्यात्वति
यम इति विशेषः उक्तकार्यत्वं च तद्रूपादौ च व प्रसिद्धं तदभावश्च प्रसिद्धविषादौ च व्याप्य इति भावः ननु सं
भावनाविषयार्थकसंभावितपदेन न प्रमासेन न प्रसंभावितपदस्वारस्यात् उक्तजन्यत्वप्रकारकज्ञानविषय
त्वाभावस्य साधारणधर्मत्वमुक्तं न तदुक्तजन्यत्वाभावस्य धारणधर्मत्वमुक्तं न तदुक्तजन्यत्वाभावप्रकारकज्ञानवि

८

वयत्वस्य व्यभिचारेणानजन्यत्वाभावानापेतकत्वात् ज्ञानविषयत्वाभावस्य च न तदावेदकत्वात् नजन्यत्वेकस्य विशिष्टाह
शाशानावश्यकत्वात् मैवम् व्यक्तिजन्यत्वाभावज्ञानस्यैव रसानुगुणत्वात् यत्नेनेति उपमानतावच्छेदकविशि
ष्टस्याप्रसिद्धत्वेनोपमेतिव्यवस्थापनेनेत्यर्थः स्वतःसिद्धत्वादिति तथाचतत्राप्युपमात्वव्यागमनादिति
व्याप्तिरित्यर्थः अवस्थापितत्वाच्चेति उपमानतावच्छेदकविशिष्टोपमानस्य स्वसिद्धतायामेवोपमेतिकथ
नत्वादित्यर्थः प्रसंगात्प्राचीनैलक्षणे दीदितिनोक्तदोषान्निराकर्तुमाह यदपीत्यादि अतिशयोक्तेरेवेति उ
पर्यालोचकत्वेनमित्येवंरूपायामित्यर्थः प्रवाहयोरिति यद्यप्येकपवनप्रवाहः प्रसिद्धस्तथाप्येकप्रवाहे
त्वत्वेनैवं प्रवाहद्वैतनताभिप्रायेणेदं वस्तुगत्योक्तम् तद्विशेषत्वादिति अंकस्य दोषविशेषत्वात् किरणा
नां च गुणविशेषत्वात् विशेषे च सामान्यावच्छिन्नप्रतियोगिताकभेदाभावात् घटः पृथिवीभिन्नश्च प्र
तियादित्यर्थः भेदोस्त्वेवेति दोषत्वावच्छिन्नप्रतियोगिताकभेदस्यांकेः भावे दोषत्वाकयोर्भेदसत्वात्
अन्यथा सामान्यविशेषभावानुपपत्तेरित्यर्थः वाधनेति नादशब्दानोत्कर्षवन्निनादशब्दानकत्वैम
साहश्य स भवा ... नेकजातीयादृष्टस्येवजननादिति साहश्यविधानसंभवेन द्वितीयव्यवच्छेद
नात्पर्याभावात् साहश्यस्यैवपर्यपनत्कल्पनादित्यर्थः धर्मपदस्येति शक्त्याधिकारादेवा

पिकामिति न्यायेनेत्यर्थः ननु संमतपदेनैव तद्वारणमित्यत आह संमतेति नुषज्यत इति न्यायेनाप्याह श्लेषेनेति॰
पूर्वोक्तमपवनासामर्थ्यं अन्येनेन वर्णस्येति प्रतियोगित्वस्तृतीयार्थः अन्यप्रतियोगिकं वर्ण्यनिष्ठसाम्यमित्यर्थः प्रती
पव्यभिचारवारणाय प्रकारं दर्शयति तन्नेति वर्ण्येनेति गर्वमसंभाव्यमिमं लोचनयुगलेन किं वहसि भद्रे
संनिसदृशानि दिशि दिशि सरस्सु ननु नीलनलिनानीत्यत्रोपमितिक्रियानिःपत्तिगर्भे च प्रतीपे आकर्ण
यसरोजानि वचनीयमिदं भुवि शशांकस्तव वक्त्रेण पामरैरुपमीयते इति निदर्शनिःपत्तिगर्भे च प्रतीपे वर्ण्य
प्रतियोगिकसाम्यस्यैवाप्रकृतेन वर्णनादित्यर्थः एवं प्रयोजनमनूद्य विशेषणपदार्थविकल्पेन दूषयति
तन्नचेति अन्यत्वस्य प्रतियोगिसाकांक्षतया वर्ण्यपदसमभिव्याहाराद्वर्ण्यप्रतियोगिकमेव तत्र लभ्यते व
र्ण्यत्वप्रकृतत्वमिति अन्यपदमप्रकृतार्थकमित्यत्र दूषणमाह तदेतदन्यपीति वर्ण्यत्वावच्छिन्नप्रति
योगिताकभेदवत्त्वं नार्थोपि तु वर्ण्यप्रतियोगकभेदवत्त्वमेव तत्र च रजसा स्वेनावर्ण्येनापि वर्ण्यरदाभि
न्नवत्वमस्त्येवेति न दोष इत्याशंक्याह यदीति एवमपि तृतीयप्रतीपभेदे तिव्याप्तिरित्याह तदेति उपमान
भावमिति अन्यनिष्ठसादृश्यप्रतियोगित्वमित्यर्थः सादृश्यप्रयोजकेति तादृशाद्भुतरमणीयतादि तन्मुखदृश्यं
सादृश्यपरं तृतीयन्तदं प्रतियोगित्वपरं चंद्र इव मुखं रमणीयमित्यादौ सादृश्यं चंद्रीयं मुखमितितत्रोपयाभ्युपगमे

प्रतियोगित्वसंबंधावच्छिन्नसादृश्यप्रकारताकश्चंद्रविशेष्यकः यादृशरमणीयत्ववांश्चंद्रस्तादृशरमणीयत्ववन्मु
खमिति बोधे च साधारणधर्मप्रकारकः सरसिजमित्यादौ चानुयोगित्वसंबंधावच्छिन्नसादृश्यप्रकारकबोधस्सा
दृश्येनान्वयः सुलभः चंद्रत्वादिप्रकारकत्वस्फुटयत्नपदांतरेण तु साधारणधर्मनिष्ठविशेष्यताभिन्न
सादृश्यनिष्ठविशेष्यतानिरूपितप्रतियोगित्वावच्छिन्नप्रकारत्वसंबंधेन सादृश्यनिष्ठप्रकारतानिरू
पित संबंधावच्छिन्नसंबंधेन बोधवत्त्वेनाविवक्षितत्वेनेत्यर्थः वस्तुतस्तु तद्धत्त्वेनाविवक्षितत्वमात्रेणा
न्वयधीविषयत्वाविवक्षायां प्रयोजनाभावात् अतएव तदन्यधर्माभाववत्त्वमेवात्रतात्पर्यमित्याशंक्याह विवक्षिते
ति तदन्यद्रव्यत्वादिधर्माणां तत्रसत्त्वादसंगतिरित्यर्थः अनपायादिति सादृश्यप्रतियोगितान्यधर्मवत्त्वेनाविव
क्षितस्य तत्रसत्त्वादित्यर्थः यद्यप्यनेकदा प्राहेनोपमेयोपमायां व्यभिचारवारणाय तदभिप्रायमनुक्त्वाह इति उप
मेयताभिमतेति तत्र तु पूर्ववाक्ये उपमेयत्वाभिमतं यन्मुखं तत्प्रतियोगिकसादृश्यवर्णनं मुखमिव चंद्र इति त
त्समानकालीनमेव चंद्र इव मुखमिति सामान्यमिति न व्यभिचारः वर्णनमत्र समानाधिकरणमित्याह अथवा यत्रेहा
भ्यावक्षम्या उपमाप्रतीपविवक्षया भागद्वयमुच्चारितं तत्र उपमायामव्याप्तिः ननु तथापि चंद्र इव मुखमित्येत
द्वाक्यार्थवर्णनकाले मुखमिव चंद्र इत्येतद्वर्णनाभावादव्याप्तिरेव न च तदुच्चारकतादृशवर्णनप्रागभावास

व्य॰टी॰
५
१

मानकालीनत्वं विवक्षितमिति वाच्यम् तेनैव वक्ष्यमाणीयाभिप्रायेणानडुत्सु गोसदृशो गवय इति प्रयोगे तदुपमाया
मव्याप्तिरिति चेन्न सत्यं उपमेयत्वाभिमतप्रतियोगिकोपमानवृत्तिसादृश्यविषयकस्यान विषयत्वेन तात्प
र्यविषयतस्य विवक्षितत्वान्न दोषः उपमेयोपमायां तु परस्परप्रतियोगिकमेवेति नातिव्याप्तिः धर्माविति भाव
रूपसामान्यधर्मस्यात्र विधेयत्वात्साम्यस्य च साधारणधर्मरूपत्वादित्यर्थः सयथाविति यथाविति गमनस्ये
व विधेयत्वादिंद्वल्य इति साम्यस्यानुवादकोटिप्रविष्टत्वादित्यर्थः अनुवादादिति प्रतियोगिनं विनात
न्निषेधस्याशक्यत्वात् निषेधप्रतियोगित्वेनेति नसमस्तवचेदमाऽन्यत्र तत्साम्यस्य निषेध्यत्वेन निषेधप्र
तियोगित्वमेवेति नातिव्याप्तिः तथा च विधेयत्वमनुवाद्यत्वं वा किमपि न विवक्षणीयं किंतु निषेध्यत्वमेव तेन
नाव्याप्तिरतिव्याप्तिर्वेत्यर्थः व्यतिरेक इति अन्यत्तज्जनमवत्सगर्वीनास्तीत्यत्र सगर्वत्वस्यैव निषेधप्रतियोगित
यावत्पर्यसादृश्यनिषेधप्रतियोगित्वाभावादतिव्याप्तिरित्यर्थः निषेधप्रतियोगिकोक्तीति उक्तस्थले च सादृश्य
स्य निषेधाभावेऽपि अन्यत्तज्जनप्रतियोगिकसादृश्याधिकरणसगर्वत्वनिषेधेन सादृश्यस्य निषेधप्रतियो
गिकोक्तावनुप्रवेशोऽस्त्येवेति नातिव्याप्तिरित्यर्थः नसादृश्यमात्रेति व्यलाभेऽपि वस्तुतः सत्वादित्यर्थः तद्धि
सादृश्येति धर्मनिषेधेन तत्प्रयुक्तसादृश्यनिषेधस्यार्थसिद्धत्वादित्यर्थः गुणक्रियादीनामिति तेषां निरवयव

५

तेनयवगोधूमादिवदवयवसाम्याभावादित्यर्थः प्रसिद्धरहितेनेति तथाचतत्रप्रसिद्धेरनुरोधेनेत्यंशोनास्ती
तिभावः सामान्यदस्येति अवयवसामान्यपदस्येत्यर्थः अत्रेति ततश्चतत्रापितत्संभवान्नातिव्याप्तिः य
द्यपिगुणादीनांजन्यधर्माणाश्रयत्वाद्धर्मान्तरंतादृशंतत्रनास्त्येवतथापितद्गुणिवैजात्यदार्येवतत्रसाम्यमि
वीहइतिभावः द्वितीयदोषमुद्धरति प्रसिद्धेरिति प्रतियोगित्वांशेपवप्रसिद्ध्यनुरोधइत्यस्यफलम
प्याह अनेनेति धर्म्मांशप्रसिद्धिपरत्वेऽतचापितत्सत्वाद्व्यभिचारोऽवीरः स्यात् उपमानात्वेइत्यस्यव्या
ख्यानमाह उपमितिक्रियेत्यादि क्रियान्तिः पंचम्यन्तत्वं क्रियापदंव्याचष्टे उपमितीति व्यभिचारवारण
प्रकारमाह व्यतिरेकेत्विति साद्दारिति मुखेनतिः कलंकेननसमंत्वचंद्रमाइत्यत्रसाम्यस्यैवविधेय
त्वात् परंपरयेति नैवान्यत्कुजनवत्सगर्वीयंमहाभूतिरित्यत्रसगर्वत्वनिषेधेनार्थतः सादृश्याभाव
पर्यवसानात् वस्तुतइति स्वमाहश्लेषेणतथान्तुत्कर्षात् अत्रुपमत्वतात्पर्यांशेप्राचीनसंमतिमाह तदु
क्तमिति प्रतीपालंकारेद्वितीयभेदेकाचित्काह पूर्णतिः पन्निः क्वचिद्वैनेतिवक्ष्यते तत्रोपमालक्षणाभा
वादेवातिव्याप्तिपरिहारमाह प्राकरणिकेति प्राधेलक्ष्यत्वादेवनातिव्याप्तिरित्याह यत्रत्विति तथैवे
तिनातिव्याप्तिरित्यर्थः चित्रमीमांसाकृदीक्षितलक्षणंसव्याख्यानमनूपन्यस्यतत्रजयरामभट्टाचार्यकृतदो

अ॰टी॰
१०
10

षमुपन्यस्यति अत्रत्यायेति स्वेतरसाधर्म्यविरहस्य स्वसाधर्म्यस्य च युगपत्प्रतीतिसंभवेपि अत्रायस्यैव चमत्कार
जनकत्वादलंकारत्वं तेनान्यस्य तत्परितोषादाह किंचेति वैजात्यस्येति भेदगर्भसादृश्यज्ञानजन्यतावच्छेदकत्वे
नतदभिमतइत्यर्थः ननु तत्तोरसवैजात्यस्योपमितिक्रियावैजात्यस्य वा कल्पने सविनिगमकाभावइत्यत
आह नहीति तथा चालंकारकत्वानुपपादकक्रियावैजात्यस्य कल्पनानुपयोगाद्रसवैजात्यकल्पनमेवा
र्हं रसस्य सर्वप्रधानतया तदंगोपकारापेक्षया प्रधानोपकारस्यैवोचितत्वादिति भावः घटइव पटोद्
ध्वमित्यादिवारणाय विलक्षणेति शब्देति ज्ञानेति तादृशशब्दप्रयोगहेतुभूतेत्यर्थः उभयत्रापि वैलक्षण्यं
चमत्कारजनकतावच्छेदकत्वेनानुभवसिद्धं बाध इति वर्णनस्यैवेदीदितिनोक्तरीत्या विशेष्यत्वात्तस्य चा
र्थालंकारत्वानुपपत्तेः शब्दव्यापारगम्यस्यैवार्थत्वादिति नच शब्दज्ञानयोरपि तत्तत्पदवाच्यत्वमस्त्येवेति
वाच्यं तदुपमाप्रतिपादकपदबोध्यत्वविरहात् सर्वथैवेति वाच्यायां व्यंग्यायां चोपमायामित्यर्थः अव्यं
ग्यत्वादिति व्यर्थमिति वक्ष्यमाणेऽहन्तत्वेनान्वयः शब्दस्य वक्तृनिष्ठज्ञानस्य वा तद्व्यंग्यत्वविरहात् अदुष्ट
व्यंग्येपीति नञर्थस्योभयत्रान्वयः उक्तदीदितिनाकारिकायामव्यंग्यत्वविशेषणाभावादाह फलितेति कारिका
व्याख्यानेदीदितिनेत्यथा फक्किकाल्लिखनादित्यर्थः व्यर्थमिति वाच्योपमाव्याहृत्यर्थं ह्यव्यंग्येपत्युक्तं वर्णनस्य

वोपमात्वेन तस्य सर्वदाप्यवाच्यत्वाद् इति प्रसक्तेरेवाभावान्नद्वारकमव्यंग्यत्वविशेषणं व्यर्थमित्यर्थः विशेषणाविशे
ष्याभावव्यत्यासेन लक्षणविवक्षायां दोषाभावमाशंक्याह यदिवेति ननु नेदमेवोपमितिक्रियानिःपत्ति
विशेषणं यद्वा चमत्कारजनकवर्णनविषयीभूतं साहश्यं उपमितिक्रियानिःपत्तिमत्साहश्यवर्णनं वा उप
मेति लक्षणद्वयेनासर्थमित्यस्वरसादाह किंचेति मुख्यवाक्यार्थेति क्रियाया एव वाक्यार्थमुख्यविशेष्यत्वा
त् भावनारूपसामान्यधर्मात्मकक्रियाया एवोपमात्वाद्वाक्यार्थेन तस्याः प्राधान्यमित्यर्थः अलंकारेति परो
त्कर्षाधायकस्यैवालंकारत्वात्प्रधानस्य च तदभावादित्यर्थः वैयर्थ्यादिति आरोपमायामलक्ष्यत्वे हि प्रा
धान्यमेव बीजं तस्य च वाक्यार्थभूतोपमायामपि सत्वेन वैषम्यस्यायुक्तत्वात् पदार्थोत्कर्षकत्वेनैवालंकार
त्वमित्यत्र बीजमाह तस्य विभावकेति रसोत्कर्षो ह्यलंकारेण न साक्षादाधीयते न वा द्वारान्तरेण किं तु रसा
गभूतोत्कर्षाधानद्वारेणैव तदंगभूताश्च विभानुभावव्यभिचारिण एव तत्समूहालंबनतया हि रसस्य तदंतभ
रत्नेन विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति ततश्च विभावादिभूतस्य सहृदयहृदयरमणीयोत्कर्षजन
नेपरंपरया रसोत्कर्षः अंगोत्कर्षेण प्रधानोत्कर्षस्य युक्तत्वात् उपकुर्वन्तीति संतं येंगद्वारेणेत्यनुचित् हारादि
वदलंकारास्तेऽनुप्रासोपमादय इत्यर्थोपकारद्वारा रसोपकारकत्वस्यैवार्थालंकारलक्षणत्वस्योक्तत्वादित्य

अ.टी.

११

र्थः तत्रैव प्रामाणिकसंमतिमाह अत एवेति वाक्यार्थभूतोपमायाश्चानलंकारत्वे ग्रन्थविरोधमाह किंचैवमिति का
व्यप्रकाशोदाहरणविरोधमुक्त्वा कुवलयानंदोदाहरणमप्याह एवं रसीवेति ग्रन्थान्तरविरोधमुक्त्वा रसगंगाध
रोक्तनदीयोदाहरणस्यैव विरोधमाह किंवक्त्रेनेति दीक्षितमतात्तेषां विशेषमाशङ्कते अथ प्राचीनेति स्पष्टमस्तु
त् यदपि चित्रमीमांसायां प्रतीपस्योपमालक्षणलक्ष्यत्वे प्राचीनसम्मतिर्दर्शिता यत्काव्यप्रकाशेऽपि नव
यथावर्णितोपमेयभेदरूपमेव विशेषणं दत्तं न तु प्रतीपव्यावर्तकमपीति तच्चिन्त्यं तद्ग्राहकेनैरूप्यवर्णेन तद
भिमतत्वात् अन्यथा प्रतीयमानस्य पृथगुक्तत्वादनानुपपत्तेः यत्तु नैतदुक्तं उपमेयोपमादेरुपमान्तर्गततेऽपि अंगत्वादिकृतवैचि
अविशेषेण पृथग्ग्रहणं न विरुध्यते परिणामस्वरूपकान्तर्भावेऽपि तस्य पृथगुपादानवदिति तदप्यसत् परिणाम
स्य पृथगुपादानस्याभावात्काव्यप्रकाशकारं प्रति दृष्टान्तयितुमशक्यत्वात् तेन परिणामस्यालंकारत्वानभ्युपगमा
त् ननु परिणामस्यालंकारत्वानभ्युपगमादित्युक्तं पार्थक्यानंगीकारेऽपि उपमायामन्तर्भावेन तस्यालंकारत्वा
भ्युपगमात् सत्यं अलंकारान्तरत्वानभ्युपगमादित्यर्थे तात्पर्यात् एवं परिणामस्य पृथगुपादानं काव्यप्रकाशकृ
तो नास्तीति साध्यवैकल्यं दृष्टान्तस्येति किंच चित्रमीमांसोक्तलक्षणस्योपमेयोपमालंकारेऽपि लक्षणतावदसं
गतमेव तस्यास्तृतीयव्यवच्छेदपर्यवसानार्थमिति तत्रैव व्यवस्थापितत्वात् क्रियाभिः पतिपर्यन्तविवक्षितस्य सादृश्य

११

स्य चैतेरुपमालक्षणत्वांगीकारात् कथं हि स्वातिरिक्तोपमानव्यवच्छेदफलकोऽनन्वयो लक्षकत्वाद्वहिर्भूतः परस्प
रातिरिक्तोपमानव्यवच्छेदफलकस्तु उपमेयोपमालंकारो लक्ष्यान्तर्भूत इति वैषम्यं स्यात् आद्ये मुखे सादृश्यप्र
तीतेः पर्यन्ते चान्योपमानव्यवच्छेदप्रतीतेरुभयत्राप्यविशेषात् व्यवच्छेद्यनिष्ठैकानेकयोरप्रयोजकत्वात्
यदपि तत्राभिहितं उपमानोपमेयत्वयोरुभयोर्वर्ण्ययोर्द्वयोः तुल्यैकधर्म्मस्य पक्षे तु व्यनेकाव्यवहितैरिति विशेषणेन
लक्षणद्वयोरिमेनेनानन्वयव्यभिचारवारणेऽपि उपमानस्योपमेयत्वकल्पनात्मकप्रतीपद्वयोः पर्यायेणोपमेय
त्वकल्पनात्मिकायां उपमेयोपमायां चातिव्याप्तिः तयोः सादृश्यवर्णनसत्वात् उपमानत्वेन संग्राह्यत्वेन तथैवान
न्वयोऽपि संग्राह्यः स्यादिति तस्य वहिष्करणमनर्हमिति तदप्यसत् उपमानोपमेयत्वयोग्यत्वयोरिति विशेषणे
न सरस्वतीकंठाभरणीयलक्षणे त्वाकरीत्या प्रसिद्ध्यनुरोधार्थकत्वात् प्रतीपोपमेयोपमयोश्चाप्रकृतप्रति
योगिकसादृश्यस्याप्रकृताश्रयत्वेन वर्णनादुक्तदोषासंभवात् एतेन काव्यप्रकाशीये साधर्म्यमुपमा भेदे इ
ति लक्षणेऽनन्वयवारकं भेदग्रहणं व्यर्थं प्रतीपादावतिव्याप्तेः तस्य संग्राह्यत्वेनान्वयस्यापि तथात्वापत्तेरित्यपि
परास्तं प्रकृतोत्कर्षप्रयोजकत्वस्यापि अलंकारसामान्यलक्षणगतस्यात्रान्वयात् प्रतीपे चोपमानतिरस्कारप्र
युक्त एवोत्कर्षोऽनुरवोहः उपमेयोपमायामपि उभयोः परस्परातिरिक्तोपमानव्यवच्छेदप्रयुक्त एवातिशयोऽनव

ग्र·टी·
१२
12

साहश्यप्रयुक्त इति दोषानवकाशात् नन्वेवमनन्वयवारकं भेदपदमपि व्यर्थं अनन्वये स्वेतरोपमानव्यवच्छेदस्यैव
चमत्कारप्रयोजकतया साहश्यस्य तथात्वादिति चेत् सत्यं व्यभिचारवारणमात्रेण तात्पर्यात् यद्वा भिद्यते उत्क
र्षवत्तया बोध्यत इति व्युत्पत्त्या प्रकृतस्य मुखोदरूपादाने तत्र प्रकृतिमात्रानुयोगिकत्वेन प्रतीयमानं साध
र्म्यमुपमेत्यर्थः प्रकृतोत्कर्षप्रयोजकत्वं च सामान्यतयैव भाने प्रतीयेत च प्रकृतानानुयोगिकत्वेन साम्यस्यानव
भासात् उपमेयोपमायां च तदन्यत्वं द्वाद्यनुयोगिकत्वेनापि तस्य प्रत्ययात् प्रकृतमात्रानुयोगिकत्वेन भानमु
भयत्रापि नास्तीति न व्यभिचारः अनन्वये व्यभिचारवारणेन साधर्म्यघटकभेदपदार्थेनैव बोध्यं नन्वेवं भेदग्र
हणमनन्वयव्यवच्छेदायेति तन्न ग्रन्थो न संगच्छत इति चेत् न अनन्वयपदेन निषिध्यते लक्षणस्यान्वयो यत्रेति
व्युत्पत्त्यालक्ष्यतावच्छेदकावच्छिन्नत्वानभिमतैस्तात्पर्यकतया प्रतिपादितपरत्वेन व्याख्यातत्वात् अथवास्तु यथोक्तमेवं
बोधयथाश्रुतमेव किं तु प्रकृतमात्रा — नुयोगिकत्वेनाप्रतीयमानत्वमप्रतीपादिवारणाय पृथगेव
विशेषणं देयमित्यादि सर्वमभिसंधायाह इत्यादीति संक्षेपः प्रथममिति चतुष्पद्याद्दितत्रशणोपमास्व
न्यादेनेतदन्यतमलेपि न्याल्लुमायाः संग्रहत्वात् तथा चलुप्तोपमाप्रयोजकलोपप्रतियोगिघटितत्वेन पूर्वं
तद्युक्तादनेलाघवमित्यर्थः उक्तेष्वन्यतमे इति सेतुकाव्ये समुद्रवर्णने उत्खातद्रुममिव शैलं हिमहतकमलाक

१२

रमिव लक्ष्मीविमुक्तं पीतमदिरमिव चषकं वकुलप्रदोषमिव मुग्धचंद्रविरहितं अथ भेदेनेरणुनत्तनय इत्यादिस्कं
धकस्य समुद्र इति पदे तेषां विशेषणानां अभेदान्वयः वकुलः कुसुमपदः तत्रापि रात्रौ भागांतरावच्छेदेन चंद्र
सत्वात् प्रदोषेपि मुग्धपदे प्रदोषेवर्धंचंद्रसत्वात् वकुलेति पारिजातलक्ष्मीमदिराचंद्राणां समुद्रान्मंथनेन
निर्गमो हि तत्र इत्येवं वर्णनं अनुगामित्वनिर्वचनाय शंकामवतारयति स्यादेतदिति एकत्रोत्पन्नत्वं विजानी
यभूसंयोगरहितत्वं समुद्रपदे चोद्भूतत्वमिति विशेषात् चित्रमीमांसोदाहरणमपि विचारयितुमुपन्यस्यति
एवं वागर्थाविति सेतु श्लोके भिन्नधर्मनिवंधनामालोपमा अत्रतस्मद्दीपमेति भेदः अनुगामित्वमुभयत्रत
त्वं ननु विकचैरित्यत्र मिथः संयोगजनकक्रियाराहित्यस्योभयसाधारणत्वेपि तस्य शाब्दबोधे प्रकारत्वाभा
वान्न दोष इत्याशंका तत्रापि दोषमभिधित्सन्मानंस्तपदत्वमवधारयितुं विकल्पमुखेनाह किंचेत्यादि प्रकारी
नराणामिति उपचारं विंवप्रतिविंवभावादीनां वक्ष्यमाणानामित्यर्थः विलयेति पृथक् परिगणनानुपपत्ते
रित्यर्थः तद्दोषानपेति वलनत्वस्यैकपदजन्यबोधप्रकारकत्वसत्वादित्यर्थः भिन्नकृतीति विशेषणाद् उक्तव्य
भिचारवारणं दर्शयति उक्तस्य लत्विति अभेदेनेति वलितो हि तत्पदाभ्यां विंवप्रतिविंवभावापन्नकंधराहेतो
भयविशेषणत्वेनैकस्यैव पदार्थस्योपस्थापनात् अन्यथात्र वस्तुप्रतिवस्तुभाव इति दुर्लभस्यादिति भावः।

प्र॰ टी॰ १२ 13

ननु बलनघटोभयभेदस्य बलेनापि सत्वाद्दोषतादवस्थ्यमेवेत्यत आह भिन्नत्वं चेति स्वधर्मतापर्याप्त्यधिकरणं एवं
सत्यव्याप्तिरित्याह संयोगादेरिति वाच्यवाचकभावसंयोगयोर्द्वयोरपि संबंधावच्छिन्नत्वात्सामान्यस्य तावच्छिन्न
वृत्तिभेदप्रतियोगितावच्छेदकत्वानुपपत्तेरित्यर्थः प्रकारत्वाभावादिति एतदनुपादाने तु बिंबप्रतिबिंबभावा
दावुक्तातिव्याप्तिर्नावरस्यादित्यर्थः एवं शाब्दबोधप्रकारीभूतधर्मावच्छिन्नप्रतियोगिताकत्वं भेदविशेषणमि
त्यदेयं दोषउक्तः अधुना तदप्रकारीभूतेनापि पर्यवसितं तद्भिन्नताधर्मेणावच्छिन्नप्रतियोगिताकत्वमेव भे
दविशेषणमित्यत्र दोषाभावमाशंकते नचेति संयोगत्वावच्छिन्नभेदस्य वाच्यवाचकभावेन तत्त्वावच्छिन्नभेदस्य
च संयोगे सत्वात् शाब्दप्रकारीभूतसंबंधतावच्छिन्नताया द्वयोर्दोषाभावः बिंबप्रतिबिंबभावादौ तु विशेषणसत्वे
पि शाब्दप्रकारधर्मावच्छिन्नत्वाभावादेव नातिव्याप्तिः तथापीति चंद्रमुखवृत्तिरमणीयत्वयोरमणीयत्वावच्छिन्नप्र
तियोगिताकभेदविरहात्तत्रानुगामित्वं न स्यादित्यर्थः एकपदजन्यत्वस्येति ॥ प्रतीतिजनकपदे एकत्वविशे
षणदेयत्वात् ॥ तथाच साधारणधर्मवाचकैकपदजन्यबोधेत्यादिपर्यवसितं पदजन्यत्वस्य
प्रतीतौ प्रागेवोक्तत्वेन पुनस्तदुक्तौ प्रयोजनाभावात् भिन्नेति स्वपनशयानोच्युतो विलुर्य
न स्वस्य पदाज्ञानात् च्युत इति भिन्नाद्धर्वीकपाद्प्रतिसंधानजन्यत्वादित्यर्थः तथाप्येवं उक्तस्थले व्यभिचारः स्यादित्याशंकते नचेति
एकैस्य वशाद्द्योभयार्थकत्वाभ्युपगमात् ॥

अनंगीकुर्वतामिति नवीनानामित्यर्थः ननु चमत्कारजनकस्यैवालंकारतान्मयोजकधर्मस्यैवात्र निरूपणीय
त्वात्तादृशदोषदूरस्यत्वरसादाह वस्तुमतिवस्तुभावेति नन्वेकधर्मत्वहृत्तिशाहृप्रकीभूतधर्मावच्छिन्नत्वमात्रं विवक्षितं
अस्ति च वाच्यवाचकभावहृत्तिताहृशशाहृप्रकारीभूतसंबंधतावच्छिन्नत्वं संयोगस्यापीत्यत आह किंचेति न वाच्य
तावच्छेदकमिति घटत्वादिप्रकारेणैव बोधादुभयसाधारणैकसंबंधानवच्छेदकत्वेन प्रमाणाभावात्तेषां धवादिपदवत्त्वमिति
भावः सर्वनाम्नामिति बुद्धिस्थत्वस्योपलक्षणीभूय शक्यतावच्छेदकानुगममात्रपरतया न तत्प्रकारकबोधो न भव
ति किंतु घटत्वादिप्रकारक एवेत्यर्थः तथा चानुगामित्वाभावेपि शब्दीकरीनादतिविरहादाह एवं चेद्दूरवेति काव्यप्रता
दृशाच्चमत्कारस्यानुभवकलहभयादनुगामित्वाभावस्यादृशापत्त्यापि परिहर्तुं शक्यत्वाच्चाह किंचेति धर्मेति
धर्मवृत्तित्वसामान्यविशेषणं संपन्नाविम्बादिसंग्रहार्थमाह धर्मत्वं चेति नहि धर्मेणेति धर्मतावच्छेदकतायाः
पर्याप्तिविचित्ररमणीयत्वत्वादेनद्यधिकरणत्वमित्यर्थः यथाश्रुते: वच्छेदकताया रमणीयत्वत्वादिवृत्तितया रम
णीयत्वादिरूपधर्मलाभानुपपत्तेः यद्वाभावार्थो न विवक्षितः ननु धर्मतावच्छेदकस्य रमणीयत्वत्वादेर्पर्या
प्तिस्तदाधारत्वमित्यर्थः अथवा धर्मतारूपावाप्तावच्छेदकता चेति कर्मधारयः तथा च धर्मतापर्याप्त्यधिकरण
त्वमिति फलितं नादर इति धर्मस्यैकत्वे एकस्यैव धर्मतापर्याप्त्यधिकरणत्वादनेकत्वे द्वयोरेवेति भावः नन्वेवं च द्वरवसं

मु॰टी॰
१४
14

कोचितकमलं रमणीयं च मुखमित्यादौ मिश्रणस्थले रमणीयत्वादेरनुगामित्वं न स्यात् तन्मात्रस्य धर्मतापर्याप्त्यनधि
करणत्वात् संकोचितकमलत्वस्यापि धर्मत्वादित्यतो व्याचष्टे नत्वदेति तथा च रमणीयपदं निर्वाह्यार रमणीयत्वस्यैव
धर्मतानतु संकोचितकमलत्वादेरपीति न दोष इत्यर्थः द्वयमिति ननु तत्र पदैकार्थस्यनैनैव व्यभिचारवारणात्सामान्ये
ष्वेकविशेषणं व्यर्थमिति चेत् न हारवृत्तिहारत्वोपस्थापकहारपदस्य निर्झरवृत्तिनिर्झरत्वोपस्थापकनिर्झरपदस्यैके
कत्वसत्वेन व्यभिचारसंभवात् एवं च तत्र धर्मद्वयवृत्त्येकसामान्योपस्थापकपदाभावान्न दोष इत्यर्थः श्लेषस्थापीति
तत्रोभयवृत्त्येकसामान्याभावादित्यर्थः न च एकत्वविशेषणं व्यर्थं विंबप्रतिविंबभावे श्लेषीकरणे व्यभिचाराभावादि
त्यत आह एकेनेति ननु तर्हि सामान्ये एकत्वविशेषणं व्यर्थं विंबप्रतिविंबभावे पदैक्याभावादेव व्यभिचारविरहात्
न च प्रत्येकमेकत्वमस्तीति प्रागेव समाहितमिति वाच्यं प्रत्येकार्थस्य हारादेर्धर्मतापर्याप्त्यनधिकरणत्वात् ध
र्मतापर्याप्त्यधिकरणवृत्तिसामान्योपस्थापकपदैकोऽनुगामित्वमित्यस्य प्रागेवाभिहितत्वात् इत्यत आह अत
श्चेति ततश्च विंबप्रतिविंबभावे पदैक्योपादानादेव व्यभिचारविरहेऽपि संतानेत्यादिश्लेषे धर्मतापर्याप्त्यधिकरण
पुत्रपारिजातोभयवृत्तिपुत्रत्वपारिजातत्वोभयसामान्योपस्थापकसंतानपदैक्यसत्वेन तत्र व्यभिचारः स्यादतः
सामान्येष्वेकेति विशेषणं तन्न तस्य पुत्रत्वपारिजातत्वोभयसामान्योपस्थापकतया धर्मतापर्याप्त्यधिकरणवृत्त्ये

कसामान्योपस्थापकत्वेनास्तीति पदैकसत्त्वेऽपि न व्यभिचार इति भावः यथा निश्चलनिस्पंदा बिसिनीपत्रे राजते बला
का निर्मलमरकतभाजनपरिस्थिता शंखशुक्तिरिव निश्चलनिस्पन्दमेति नायकसंबुद्धिरिति केचित् चलनम
वयवक्रियास्पंदस्त्ववयवक्रियेति भेदः अन्ये तु निश्चलाश्चासौ निस्पंदा चेति कर्मधारय इत्याहुः निश्चलः पर्वतस्त
द्वन्निस्पंदेऽम्बरे शंखशुक्तिः शंखेन निर्मितं शुक्त्याकारं पात्रमिति काव्यप्रदीपः अत्रोपमेयगतेन धर्मस्य बिंबस
ता उपमानगतेन च प्रतिबिंबेनालंकारिकसंप्रदायः स्थितः पाठान्तरमिति परभेदस्तत्रयोनरुक्त्यपरिहारार्थः य
द्यपि उपमानोपमेयवृत्तिरेव सामान्यधर्म इत्युच्यते अयं च सामान्यधर्मवृत्तिरेव न तूपमानादिवृत्तिरपि त
थापि संप्रदायानुरोधेन धर्मत्वमवच्छेदकसाधारणमेव ग्राह्यं वस्तुतस्तु बिंबप्रतिबिंबभावापन्नो धर्मः
कविकृतः क्वचिच्चोभयसाधारणधर्मो नरविशिष्ट इति निरसैव द्वैविध्यदर्शनेनात्र्यं संध्यारागस्यागितोद
घ्रणेनगगेन प्रतिपदा चेन्दुः रमाउल्लोलानदिनिह्ववनखुनिशानां नवबुधाः नवेति चानुपदमर्हचंद्रालाखेन वे
तनपरं साधर्म्यमाह यथा चेति अज्ञानवपुर्वसो देशी नवयुवर्वे नीलकंचुकभरितेनोद्वर्तिनो विभाति स्तनपटः
जलभरितं जलधरान्तरदोद्गतं चंद्रबिंबमिव अत्र कंचुकजलधरयोर्बिंबविशेषप्रतिबिंबभावः कंचुकोश
नीलत्वं शोभाधायकं जलधरांशेन जलभरितत्वगाम्भीर्यमिति बिंबप्रतिबिंबभावविशेषणेन यावत्त्वप्रतिबिंबभावः

ग्र॰ टी॰
१५
15

तद्विशेष्यतयानमूलएवव्याख्यातइत्युभयोरेकत्रोदाहरणमेतदितिविशेषः उपमानादिहतित्वमपिवस्तुप्रति
वस्तुभावस्थलेकुत्रचिदानयन्तामतमाह अन्येत्विति एवंचक्वचिद्धर्मत्रयनित्यत्वमपिदृष्टान्तस्थले॰स्यैव परंतुदी
प्तितोक्तनियमएवनिःप्रमाणकइत्येषाविशेषः एवंचमुक्ताभिः सलिलरवालपङ्क्तिपक्षीमुक्ताभिः कृतरु
चिसेकंतनदीनां स्त्रीलोकः परिकल्पयांचकारतल्पपल्लवैके विगलितहाररचारुभिःसरित्तादौमुक्तारुचिरत्वहा
रचारुत्वधर्मयोरपिभेदाभावात्साम्याद्देववस्तुप्रतिवस्तुभावोद्रष्टव्यः शकाराइति मालविकाग्निमित्रनाट
केमालविकामवेदाग्निमित्रस्योक्तिः पाण्डुत्वंतायकविरहात् परिमितेनेति विरहदौर्बल्येनवहूनामलंका
राणामग्रहणात् माधवोवसन्तः परिणतेतिपाण्डुरत्वादेषः अर्थलभ्यमिति नलाभावस्यसभायांप्रतीतौ
सभाहृत्स्वभावप्रतियोगित्वनलस्यानुत्सवविनिवेद्यं पारिजातस्यभामांगणाहृतित्वप्रतीतौचमर्त्यस्ययुगपदुभय
देशानवस्थानात्पारिजातस्यस्वर्गेहृत्स्वभावप्रतियोगित्वमाक्षेपलभ्यमितिभावः घनेति प्रतिवस्तुभावरूपेण
रक्तवर्णौचकरौयस्याःपद्मचनाः मेघाः तत्रप्रविशंतिप्रारूणान्प्ररूणसंवधिनः कराः किरणायत्रपयोध
रस्तनोमेघश्च पयोधरौस्तौस्तनाहवविविशाम्यतः आद्यविशेषणेनसभंगश्लेषोद्वितीयेत्वभंगइतिभेदः उप
चारेणेति सचसादृश्यलक्षणेतिस्पष्टमेव अत्रदीपितावत्यगयिष्यामिद्वाभ्यामपिहस्ताभ्यांतस्मिन्देशे अंगं

कदंबकुसुममिव मुकुलितं कथं नु छादयिष्यामि मानवताः सर्वोपमुक्तिः प्रियदर्शनजन्यविकासेन मानसा
गगोपनायेनच्छादनेपितद्दर्शनरोमांचवंदंतुरितमंगं विलोक्यमानत्वागप्रतीतिर्भविष्यत्येवेतिभावः उपच
चितइति तत्स्पर्शरोमांचवत्त्वेनत्यर्थः विकसिततमालनीलांशुनः भुजस्खलनरंगपरिस्पर्शं कुसुमलावनस्वरमिं
मुद्रयिगजेंद्रस्य दानलेखामिव स्थिता सेतुकाव्ये वेलावर्णने तरंगाकारकरः तरंगयवकरइत्यत्रापि समास
भेदोबोध्यः तस्यसादाहेलानन्विततेनतद्धृदयमेव विशिष्यात्रावनं श्रयगामपि तानिशासमयगंभीरत्व
दृष्टस्थितेसमुद्रे येषांराघववदनमुत्यातमुद्रमंडलमिवलग्नः सेतुवंधायसमुद्रप्रार्थनार्थं श्रीरामेस्थितेसमुद्रे
किमप्यकृतवतिइयमुक्तिः राघववदनेति प्रकृतत्वेनरोषस्यैवोपमेयत्वात्तेनचोक्तत्वात्तस्यैवोपमानत्वात्
इतिभावः संदोभिवकमलसरः संध्यातपतात्रधातुकर्दमितमुखः स्यानभ्रष्टइवगजोरात्रिंभ्रमितापति
ह्येतदिवसः सेतुकाव्ये प्रभातवर्णने संदोभिततत्वर्वावस्थावेलक्षण्यं तच्चविकसितोत्पलहिनत्वाभ्यां संध्या
तपप्रवतात्रधातुरिवेति दिनपक्षे संध्यातपवमात्रोरक्तोधातुर्गैरिकं सिंदूरंवेतिगजपक्षे इतिनियमित
सुग्रीवारामांतेनवलितः पितामहतनयः परिस्पृष्टमेरुशिखरः सूर्याभिमुखइवप्रलयधूमोत्पीडः पिता
महतनयोजांववान् उत्पीडः समूहः जांववदुपमयोरुपमा वनदवमसीमलिनांगोराजतिविंध्योच्चैर्नधवलैः

तीरोदमंथमोत्कलितउपरिष्टिककरस्वमधुमथन चनप्रसवेति चनानां मेघानां प्रसवः उत्पत्तिः पदे घनप्रसवो जलं
विरहतेनिषिद्धंगोचरीभवनं प्रत्यद्दोपहितत्वं यस्मात् लाटशीर्षपुंडरीकच्छदायसे तिवक्र व्रीहिगर्भोवक्रवीहिः अ
हंशषपुंडरीके त्यर्थः खेडितेति माम तितमरणालं हाटश्चयामिव शिथिलितवलयां नलिनीम् मधुकरीमधुरोहा
पेमधुमदतां त्वमुखमिवशल्यते कमलं सेतकाव्यशारदर्णेने प्रवोत्तरार्द्धमेवप्रकृतेनादाहरणम् सर्वाङ्गम
णालवलयोर्विवप्रतिर्विवभावस्यापि सम्भवात् जीवयतीत्युपचार इति प्रात्मविशेषगुणजनककमनःसंयो
गत्वप्रमुखेजीवनस्यतच्चाभावादित्यर्थः मुखरघनविप्रकीर्णजलनिवहं स्मृत सकलनभोमहीविवरं नदीमुख
पर्यस्यमानमात्मनो विनिर्गतंयशइवपिबन्ते सेतकाव्यसमुद्रवर्णने मुखरैरितीति मुखरैर्गर्जद्भिर्घनैर्दृष्टं प
देमुखरैर्वर्ष्यादिभिर्घनंवक्र क्तत्ववर्णितं विनिर्गतमिति निष्क्रमणं व्यस्य वहिः संयोगजनककर्मणो मूत
मात्रधर्मत्वाद्यशसः संभवात्प्रकाशलावण्यकत्वादित्यर्थः उद्दामेति दोहदवलात्मुष्पितो माधवीलतां ट
श्रारत्नावल्यावत्सराजस्योक्तिः उद्दामा उन्नता स्मकलिकाः कोरकायस्यायदेउद्दामा प्रतिशयनी उत्कलिका
उत्कंठायस्याः कोपेति देवीपरिगृहीतलतापेन्नया राजपरिगृहीतायाल्तसणाः प्रथममेव पुष्पितत्वात् केदे
हंनीलोत्पलदेशी शारदिसरसिपधिकाजलानि नीलोत्पलसुरभिगंधानि पवलानिम्पतनवस्नीनि चनानि

प्रच्छानि प्रसन्नानि चेति धवलाच्छानि · पद्देधवलादावारिणा उज्ज्वलनेत्राणि सन्तस्त्राः प्रियं निरीक्षितानामिव मुखानि मु
खपद्म इति मुखपानस्य इवशब्दस्य एवमेवं भवादित्यर्थः भेदान्तराणां वक्ष्यमाणानां मूलानुगतत्वं दर्शनायम्भरत
वाकाटदर्शयति उपमायाः इत्यादि उपमायाः श्रौतार्थत्वविभागस्य शब्दबोधविशेषनिबन्धनत्वात् प्रथमं बोधमे
व विचारयितुमाह चन्द्र इवेति यद्यपीत्यादि इवादेर्बोधकत्वादिति नाशंका बोधकत्वाविशेषादिति सादृश्यप्रत्य
यस्योभयत्रापि सत्त्वादित्यर्थः वैषम्यं शंकते नचेति उभयत्रेति उपमानोपमेययोरित्यर्थः वक्ष्यमाणरीत्या
चन्द्र इव मुखमित्यत्र उभयत्र तत्सम्बन्धबोधोपपत्तेरित्यर्थः प्राप्नोतीति नाहृशोभयान्वितसादृश्यबोधकत्वस्या
भावेनेत्यर्थः सर्वत्र धर्मपदमत्र सादृश्यपरं धर्ममात्रमिति प्रतियोगितया उपमाने विशेषणत्वानापन्नमे
व सादृश्यमित्यर्थः तथा च वक्ष्यमाणरीत्या चन्द्र इवेत्यत्र सदृशं चन्द्रीयं मुखमिति उभयत्र सादृश्यबोधः चन्द्रेण
तुल्यमित्यत्र तु चन्द्रसादृश्यवन्मुखमिति सादृश्यस्योपमानविशेषणत्वं किन्तु उपमेय एव निवेश्यमित्य
र्थः नामार्थयोर्भेदान्वयानुपपत्त्या सादृश्यसंबन्धेन चन्द्रस्य मुखेऽन्वयोऽनुपपन्नः अतः कथं सदृशं चन्द्रीयं मु
खमिति बोधः स्यादित्यभिप्रायवान् परिहरति इवादीनामिति उपमानविशेषणत्वेति उपमाननिष्ठविशे
ष्यतानिरूपितविशेषणताशालित्वबोधकत्वेत्यर्थः नत्विति उभयोरित्यादिः इवार्थसादृश्यस्य चन्द्रादावुपमानेऽन्व

व्यु॰टी॰
१८
17

योपगमे उपमेयेन तद्द्वयानुपपत्तेरेकत्र जनितान्वयबोधत्वेन निराकांक्षत्वात् अतः सदृशचंद्रसदृशं मुखमिति न शाब्द
बोधसंभवः तदेतदाह अन्यविशेषणस्येति नच इवार्थसादृश्यस्य चंद्रपदार्थान्वयः तस्य च सादृश्यसंबंधेन मुखान्वय
इति सादृश्यसंसर्गीभूयैव सादृश्यविशिष्टचंद्रप्रकारकमुखविशेष्यकबोधे भासत इति वाच्यं भेदसंबंधेन नामार्थ
प्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासंबंधेन विभक्तिजन्योपस्थितेः कारणत्वकल्पनात् उपमेयस्य
च नामार्थत्वेन विभक्तिजन्योपस्थितिविशेष्यत्वविरहात् अन्यथा नीलो घट इत्यादौ नीलघटयोरप्यभेदातिरि
क्तसंबंधेन विशिष्टबुद्ध्यापत्तेरिति शंकार्थः समाधत्ते तथापीति कथमिति नामार्थयोरभेदान्वयव्युत्पत्तेर्नी
लो घट इत्यादावुक्तरीत्या कल्पनादित्यर्थः प्रकारीभूतेति नामार्थान्तरनिष्ठविशेष्यतानिरूपितविशेषणता
शालिनामार्थनिष्ठविशेष्यतानिरूपितविशेषणताशालीत्यर्थः चैत्रस्य धनमित्यत्र हि स्वामित्वं षष्ठ्यर्थः
तस्याश्रयतया चैत्रान्वयः चैत्रस्य च स्वामित्वसंबंधेन धनेऽन्वयः तत्र धननिष्ठविशेष्यतानिरूपितविशेषण
ताशालि चैत्ररूपनामार्थनिष्ठविशेष्यतानिरूपितविशेषणता स्वामित्वरूपविभक्त्यर्थस्यास्तीति तेन संबं
धेन चैत्रस्यापि धनेऽन्वयः एवं चंद्र इव मुखमित्यत्र सादृश्यमिवार्थः तस्य प्रतियोगितासंबंधेन चंद्रेऽन्वयः चंद्रस्य
च सादृश्यसंबंधेन मुखे मुखरूपनामार्थनिष्ठविशेष्यतानिरूपितविशेषणताशालि चंद्ररूपनामार्थनिष्ठविशे

१८

अनतिरूपितविशेषणताशालित्वं स्वरूपनिपातार्थसादृश्यस्यास्तीति तेन संबंधेन चंद्रस्य मुखेऽन्वय इति प्रकृतका
र्थः नन्वप्रकारीभूतविभक्त्यर्थनिपातार्थयोरन्यतरसंबंधेन नामार्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्य
तासंबंधेन नामजन्योपस्थितेः कारणत्वं कल्प्यते न च निपातार्थस्यापि कार्यतावच्छेदकसंबंधप्रवेशगौरवमिति
वाच्यं प्रामाणिकस्य तस्यादोषत्वात् प्रकारीभूतविभक्त्यर्थस्य तथात्वे बीजभूतस्यानुभवस्य प्रकारीभूतनिपाता
र्थस्याविशिष्टत्वात् बोधनादिति इवार्थसादृश्यस्य प्रतियोगित्वेन चंद्रान्वये सादृश्यप्रतियोगिचंद्रीयं सादृश्य
मिति बोधो दयादित्यर्थः न दैवं प्रतियोगित्वस्य संसर्गत्वेन बोधः सादृश्यस्य चंद्रादावन्वयः सादृश्यप्रति
योगितायाः शाब्दबोधप्रत्वात् श्रोतत्वं चंद्रेण तुल्यमित्यादौ तु सादृश्यप्रतियोगितायाश्चंद्रादावनवगमादार्थ
त्वम् चंद्रप्रतियोगिकसादृश्यवन्मुखमित्येव तत्र बोधात् तुल्यत्वस्य नामार्थतायां तत्र प्रतियोगित्वेन तस्य
चंद्रान्वयानुपपत्तेः अत एव तत्र सादृश्यप्रतियोगिता उपमानस्य शाब्दबुद्धौ भासते किं त्वर्थतस्तदुत्तरमानसज्ञान ए
वेति एतन्मतरहस्यं संप्रतिमतांतरमाह अत्र केचिदिति अत्र श्रोतार्थत्वविभागरूपे विषये केचिन्महेश्वराद
य एवमन्यथा तद्विवेकमाहुरित्यर्थः मीमांसकेति घटमानयेत्यादिपदानामितरपदार्थान्वितस्वार्थबोध
कत्वमिति तन्सिद्धांतः अत्र तु निपातस्य लपदान्विताभिधायंत्वं न तु तुल्यादिपदेष्विति तत्पोषेन तदनुसारः तुल्यादि

ग्र॰टी॰
१८
18

स्थलेतदनभ्युपगमस्यवद्यमाणत्वात् अन्यथाइवादिप्रयोगेप्रतीतलप्यादिप्रयोगेत्वार्थीतिव्यवस्थानुपपत्तेः चंद्रस्ये
वेति सादृश्यपदजन्यसादृश्योपस्थितौनामार्थीस्यायमानस्यसादृश्यान्वयार्थंयथाप्रतियोगित्वार्थकषष्ठ्यपेक्षा
नामार्थयोः साक्षाद्भेदान्वयानुपपत्तेः तथाइवार्थसादृश्येपिनामार्थत्वाविशेषादुपमानस्यप्रतियोगित्वसंबं
धेनान्वयानर्हत्वाद्विभक्तिजन्यतदुपस्थितेतिप्रतियोगित्वबोधार्थंषष्ठीस्यादेवेतिभावः ननुभेदसंसर्गकना
मार्थप्रकारकशाब्दबुद्धित्वावच्छिन्नंप्रतिविभक्तिजन्योपस्थितेरिवनिपातजन्योपस्थितेरपिविशेष्यतासंबं
धेनकारणत्वकल्पनेत एवंचचंद्रस्यसादृश्यमित्यत्रसादृश्यमित्यत्रस्यनिपातजन्योपस्थित्यभावेनतत्रप्रतियो
गित्वेनचंद्रस्यान्वयाः नहितथातत्रप्रतियोगित्वबोधार्थंषष्ठ्यपेक्षा चंद्रइवेत्यत्रतुसादृश्यस्यइवार्थत्वेनयानि
पातजन्योपस्थितिर्विशेष्यतासंबंधेनतत्रास्त्येवेतितत्रप्रतियोगित्वसंबंधेनचंद्रस्यान्वयोपपत्तेर्नषष्ठ्यपेक्षा
अतोत्रवैयर्थ्यंप्रतियोगित्वस्यापिइवार्थत्वकल्पनं नचैवमपिइवार्थसादृश्यस्याश्रयतयाकथंमुखादावन्वयः
नामार्थप्रकारकशाब्दत्वावच्छिन्नंप्रतिनामजन्योपस्थितेः कारणतायांकार्यतावच्छेदकसंबंधतयातादात्म्यस्यै
वनिवेशात् भेदसंबंधेननामार्थप्रकारकशाब्दबुद्धौचविशेष्यतयाप्रत्ययजन्योपस्थितेः कारणत्वकल्पनात्
मुखादेः प्रत्ययजन्योपस्थितिविरहात् निपातजन्योपस्थितेरेवपितत्राभावेनचंद्रस्यप्रतियोगित्वेनसादृश्या

८

न्यपवन्न सादृश्यस्याप्रयत्नेन मुखादावन्वयानुपपन्नेरिति वाच्यं निपातितातिरिक्तनामार्थप्रकारकशाब्दबुद्धावेव न
यात्वात् इत्याशंकते नचेति नस्यैवेति निपातजन्योपस्थितिहेतुत्वकल्पनादिरूपस्यैवेत्यर्थः नियमेति तथा
च प्रतियोगिनिष्ठप्रकारतानिरूपितप्रतियोगित्वनिष्ठसांसर्गिकविषयतानिरूपिताभावविशेष्यकज्ञानत्वेन
न्नपदशक्तिज्ञानस्य प्रतियोगिनिष्ठप्रकारतानिरूपितप्रतियोगित्वनिष्ठविशेष्यताभिन्नप्रकारतानिरूपिता
भावविशेष्यकज्ञानत्वं चाभावपदशक्तिज्ञानस्य कार्यतावच्छेदकं कल्प्यते अत एव मिश्रैरप्युक्तं अत एव नैरेव
मिश्रैरप्युक्तं स एवार्थो भाव समहशादिपदेनान्यथा बोध्यते क्वचित्संसर्गविधया क्वचित्प्रकारतया संबंधभाना
दतः घटो नेत्यादौ नञ् षष्ठीपदस्याभाव इत्यादौ षष्ठी नेति भावः समभिव्याहारस्य तात्पर्यग्राहकत्वकल्पने गौर
वविशेषाभावादिति निगमकाभावमाह घटेति उभयकार्यकारणभावकल्पनापेक्षया आपि गौरवाभावादाह
प्रत्विनेति तथा च प्रथमावतीर्णलाघवानुरोधेन अभावत्वप्रकारकबोधत्वस्यैव कार्यतावच्छेदकत्वे लक्षणप्रा
न्कारणतावद्वयकल्पनेपि न दोषः फलमुखगौरवस्यादूषकत्वाभावात् अत एव नञ्ज्ञकषेपर्वपदे संबंधिलक्ष
णाप्रसंगान्नञ्पदे तयालघुभूतं कर्मधारयमेव स्त्रित्यपश्चादापद्यमानं निषादस्थाप्यविधाकल्पनमप्यंगीकृतं
निषादस्थपत्यधिकरण इति भावः अन्यलभ्यत्वादिति अनन्यलभ्यप्राह्यार्थ इति न्यायेन संसर्गतयापि बोधसं

व्यु.टी.
१९
19

भेवतत्रशक्तेरकल्पनादित्यर्थः समानेति भिन्नार्थकविभक्त्यनवरुद्धेत्यर्थः तथाचाभेदसंसर्गावच्छिन्ननामार्थेति
प्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबुद्धित्वावच्छिन्नंप्रति नामार्थेतरविभक्त्यर्थविरुद्धार्थकसविभक्त्यसम
भिव्याहृतपदजन्योपस्थितिः कारणं नीलोघटइत्यत्र द्वयोरेकविभक्तिकत्वात् स्तोकंपचतीत्यादौ क्रियाविशेष
णेचधातोस्तद्विरुद्धार्थकसविभक्त्यसमभिव्याहृतत्वात् उभयत्रनामार्थस्याभेदसंबंधेन प्रकारता राज्ञः पुरु
षइत्यत्र समानविभक्तिकयोरपि राजपुरुषयोरभेदान्वयबोधविरहात् विरुद्धार्थकेति भिन्नार्थकपरं
तत्रचैकाजन्यजनकभावे षष्ठी पराचस्वस्वामिभावेइत्यदोषः पचतीत्यत्र धातोरपि प्रत्याख्यातरूपक्रियया भिन्ना
र्थकविभक्तिसमभिव्याहारोनास्तीति तत्र विशिष्टाभावसंपादनाय सत्विति विभक्तिविशेषणं एवंचज्योतिष्टो
मेनयजेतेत्यादावपिज्योतिष्टोमादेर्यागादावभेदान्वयः संगच्छते नैयायिकाइति तथाउक्तेरुक्तेरुक्तमसङ्गावो
ध्यनेनतरंनञ्वादशिरोमणावभिहितं अतएवइवाद्यर्थान्वयबोधेनषष्ठ्याद्यपेक्षेति संप्रतियत्रउपमानेउपमे
यचसाधारणधर्मसंबंधः शाब्दबोधएवभासतेतत्रश्रौत्यत्रार्थीति चक्रवर्तिमतमाह केचिदिति तथाचो
पेति उपमानप्रकारकोपमेयविशेष्यकेत्यर्थः ननुयथाचन्द्रइत्यत्रप्रकारार्थकथाल्प्रत्ययवशादुपमानस्यो
पमेयाभेदावगमाद्वोभयविशेष्यकबोधाभ्युपगमः अत्रतुल्यतादिशब्दप्रमाणमस्ति येनवाक्यार्थबोधद्वयम् ।

१९

मीकुर्म इत्यत्र तस्लिदावश्यकत्वमाह अनयैवेति अन्यथानुहंसीसदृशश्रेङ्गोयवल इतिबोधेवाधकाभावाल्लिंगभे
दस्यदोषत्वानुपपत्तिरित्यर्थः प्रकृतमाह अनयैवेति उभयविशेष्यकबोधाभ्युपगमादेवेत्यर्थः विभक्तिभे
दादिति नामार्थयोरभेदबोधे भिन्नविभक्त्यनवरुद्धत्वस्य तन्त्रत्वादिति भावः पद्मं चेत्यनेन नरं तल्पमिति शेषः
नहि तिमिङ्गिलस्य यथोक्तवाक्यस्य दीपकालंकारपदविधानमात्र मुखेन्वितस्येति समानलिंगत्वादित्यर्थः
अन्वयासंभवादित्य विशेष्यस्य चेदस्य पुल्लिंगत्वात् अनियतलिंगवचनकनामार्थप्रकारकतादात्म्यसंसर्ग
कशाब्दबोधे समानलिंगवचनावरुद्धनामजन्योपस्थितेर्हेतुत्वकल्पनादिति भावः नियतलिंगवचनानां
तेष्वपि ध्वभेदान्वयदर्शनात् अनियतेति अनपवशाब्दत्वे उमणिकारैरुक्तम् भिन्नविभक्तिकयोर्विभि
न्नलिंगयोरपि सामानाधिकरण्येन विशेषणविशेष्यभावकाभावात् यजहल्लिंगेत लिंगनियमानुशास
नात्तथेति नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामिति पाणिनिसूत्रं नपुंसकस्यानपुंसकेन सहद्वंद्वे
नपुंसकमेव शिष्यते इतरस्य च लोपः तस्य च विकल्पेनैकवद्भावो भवतीति तस्यार्थः तथा च रमणीय
मित्रयोः स्त्रीत्वापकशेषेण पुल्लिंगरमणीयपदस्यापि संग्रहान्न सैव वंद्वे: वयइति न दोषः दोषमाणयः
कुवलयमिवेति पुल्लिंगोपमेयक्लीबोपमानकस्थले साधारणधर्मस्योपमेयसमानलिंगत्वनियमेनन

मं॰टी॰
२
४०

व्राष्णुक्तरीत्या एकशेषाश्रयेण पुंस्त्वैकवद्भावः तत्रापि नपुंसकस्यैवाश्रयणापत्तेस्तत्रैकशेषस्य स्वीकर्त्तुमशक्य
त्वादित्याशयः एवं सर्वत्राप्यद्वहत्वप्रसंगात्त्यायशाह् विरोधाद्वा इत्येतन्नाभिप्रेतं प्रसिद्धमेव स्थलमाह प्राणा
इवेति इदं वचनभेदस्योदाहरणं विधायनमिति तु लिंगभेदस्येति द्रष्टव्यं प्रकारान्तरेण श्रोतार्थत्वविभागे
व्यवस्थापयिष्यन्नाद्यं मतं नैयायिकाद्यभिमतमाह षष्ठे विशिष्टधात्विति पदत्रयमाश्रित्य विचारयितुमुपन्यस्यति अ
भेदमिति तद्भिन्नेति भवति च मुखं चन्द्र इति भिन्नं चन्द्रगताह्लादकत्वादिधर्मवच्चेति भावः वक्ष्यमाणयुक्तिबला
दाह नैवेति धर्मपदार्थेन तु तद्वत्त्वमपीत्यर्थः यद्यपि च तद्वत्त्वमपि धर्मपदवत्यापि वोध्यैवैषम्यमस्त्येवेति भावः
नन्वेवं तद्भिन्नत्वं धर्मेणैव समवैतीति तत्प्रमेयेन तथा च चन्द्र इव चन्द्र इत्यप्युपमा स्यात् तत्रापि स्मरणीयत्वादिध
र्मस्योपमानभिन्नत्वादित्यत आह तद्भिन्नवृत्तित्वेति तत्तस्य धर्मेन तद्भिन्नत्वं विशेषणं किंतु तद्भिन्नवृत्तित्वमे
वेति भावः नैवमपि नेहोपमानत्वस्य तद्भिन्नमुखादिवृत्तित्वस्यापि धर्मे सत्त्वादिति वाच्यं तद्भिन्नपदेन उप
मानतावच्छेदकावच्छिन्नप्रतियोगिताकभेदकउपमेयस्य विवक्षणात् युक्तत्वादिति एकत्राधेयत्वस्यापरत्रा
धारत्वस्य च निवेशापेक्षया उभयत्राधेयत्वनिवेशस्यैवोचितत्वादित्यर्थः यद्यप्याधारत्वाधेयत्वयोर्द्वयोरपि स
बोधकतादिसंख्यत्वं उपदार्थेनातिरिक्तपदार्थत्वे वा शरीरसाम्यमेवेत्येकत्र वृत्तित्वस्यापरत्राधारत्वस्य च निवेश उभय

२

त्राप्याधेयत्वस्यैव वा निवेशेन किंविगौरवं लाघवं वाऽवतरति तथाप्येकत्र हेतुतात्वविषयताकल्पनेपरत्रापि तत्कल्प-
नेलाघवमित्याशयः अतएवाधिकरणत्वांशस्याभिन्नेप्यत्र तथापि निवेशात् तथापि विषयताह्यसैवेत्यांशंकते
नचेति निवेशमात्रेण साम्यमाह भेदनिरूपितेति तदधिकरणत्वनिवेशसाम्येपि तदनंतरं हेतुतात्वनिवेशस्तत्रवाप्यधिक
इत्यांशंकते नचेति प्रथमे भिन्नत्वस्योपमेयविशेषणत्वमनुक्तम् अधुनाभेदस्यैव धर्मविशेषणत्वमुच्यत इति वि-
शेषः सामानाधिकरण्यमिति विशेषणताविशेषेणं चेद् भेदवत्तिसृत्वे समवायेन रूपविशेषात्मकरमणीयत्वादेः
सत्वात् तदुभयघटितसामानाधिकरण्येन भेदस्य धर्मे प्रकारत्वं समवायेतिप्रकृताभिप्रायेण अन्यत्र यथासं-
भवं संबंधो ग्राह्यः उक्तसंबंधेति विशेषणतासमवायोभयेत्यर्थः प्रकारतयेति तद्भिन्नहेतुतात्वस्यैव हेतुतात्वे
विशिष्टाभ्युपगमात् तस्य च भेदसामानाधिकरण्यपर्यवसानात् तस्य प्रकारत्वेन भाने संसर्गतानुपपत्तेश्च स्वरू-
पस्येति स्वरूपनिवेशोऽधिक इति भावः सामानाधिकरण्यस्य संसर्गत्वस्वीकारे हि तद्विशिष्टत्वेनापेक्षितः नहि
संसर्गस्यापि संसर्गविशिष्टबुद्धिरवगाहते दंडी पुरुष इत्यादौ संसर्गीभूतसंयोगस्य समवायात्मकसंसर्गानुल्ले-
खात् अन्यथानवस्थानादिति भावः हेतुतात्वनिवेशमात्रस्य तत्रापि सत्वात् साम्यमिति समाधानाभासमाह तत्रा-
पीति पदेन तरवादी गौरवस्वरूपमाह नच मदिति मूलयुक्तिमाह धर्मवत्वेति तथापीति इत्यर्थधर्मस्य समवायादि

उपमेयान्वयस्यवाच्यत्वादित्यर्थः बोधस्वरूपकथनेनबोधविषयपदार्थस्वरूपंस्पष्टयितुमाह किंचेति प्रसिद्धोदाहरण
मादायबोधमाह चैत्रेति चैत्रभिन्नवृत्तित्वंचैत्रभेदाधिकरणवृत्तित्वं आश्रयत्वस्यलक्षणयार्थत्वात् नत्वचैत्रवृत्तित्वोप
रिसामानाधिकरण्येनविशेषणं अस्तिहि यथैवचैत्रभिन्नवृत्तित्वंचैत्रवृत्तित्वेचेतिस्वरूपसंबंधेनतयोः सामानाधि
करण्यं अतस्तत्सामानाधिकरण्यस्वरूपघटितत्वयाचैत्रभिन्नवृत्तित्वनिष्ठप्रकारतायोःस्वरूपस्यैवसंसर्गतयो
ल्लेखः एतादृशबोधस्यायमाकारोद्रष्टव्यः तथाहितत्रचैत्रः प्रतियोगितासंबंधेनभेदेविशेषणं भेदस्याभा
वीयविशेषणतानाविशेषसंबंधेनाधिकरणे नत्ववृत्तित्वेइत्यादि नत्वोत्तरत्वप्रकारतापदं उत्तरपदार्थनिष्ठवि
शेष्यतानिरूपकतयोक्तं पूर्वपदार्थनिष्ठप्रकारतानिरूपितापेक्षयातस्याविशेष्यतायाविशेष्यत्वात्त्वमपिबोध्यं
वृत्तित्व[illegible] प्रकारतानिरूपितत्वस्यद्वितीयेवृत्तित्वनिष्ठप्रकारतेत्यत्रान्वयः उक्तरीत्यातत्रस्वरूपसंसर्गतयानिवे
शितं यद्यपिचैत्रवृत्तित्वमित्यत्रचैत्रनिष्ठप्रकारतानिरूपितायांवृत्तित्वनिष्ठविशेष्यतायांसमवायस्यनसंसर्ग
त्वमपितुनिरूपितात्मकस्वरूपस्यैव नहिआधेयत्वमपिसमवायेनवृत्तिमत् अतस्तत्कथंतत्रसमवायस्यसं
सर्गतयानिवेशः तथापिप्रकृतेचैत्रवृत्तित्वरूपविशेषात्मकरमणीयत्वादिरूपधर्मनिष्ठंगृह्यतां वृत्तित्वेचस्व
रूपसंबंधविशेषात्मकमितिरमणीयत्वादिरूपमेव तस्यचचैत्रेसमवायएवेत्यभिप्रायेणसमवायस्यसंसर्गो

नाभिधानेन विरुद्धं तन्त्वचंद्रस्य वृत्तित्वसंबंधेन धर्मे ऽन्वय इत्येव युक्तं चंद्रस्य रमणीयत्वात्मकवृत्तित्वेन तस्य च रम
णीयत्वे प्रकारतायां रमणीयत्ववद्रमणीयत्वबोधापत्तेः रमणीयत्वे समवायेन चंद्रस्य प्रकारतायां भासमानेन य
त्समवायरूपवैशिष्ट्यं तत्प्रतियोगित्वानुयोगिताभ्यां रमणीयत्वस्य चंद्रे प्रकारत्वं चंद्रस्य विशेष्यत्वं च स्यादिति वे
न्नैवं प्रत्येकं उशक्तिपदे वृत्तित्वस्य पदार्थतायाः अवच्छेदकतया संसर्गतानुपपत्तेः इति चेन्नैवं बोधाद्रमणीयत्व
प्रकारकत्वद्विशेष्यकबोधस्यापत्तेः अनुयोगित्वमुखेन समवायस्य संसर्गत्वे तु दोषानवकाशात् व
स्तुतस्तु स्वरूपस्यैवाचापि संसर्गतावाच्या अत एवाचाधिकरणादिनिष्ठप्रकारतानिरूपितायां वृत्तित्वनिष्ठविशेष्य
तायां स्वरूपमेव संसर्गत्वेन निवेशितं द्वितीयपदीयं बोधमाह चंद्रनिष्ठेति अत्र सामानाधिकरण्येन धर्मे भे
दे विशेषणे तेन च विशेषणताविशेषेणस्याधिकरणे समवायेन वृत्तित्वे ततो भेदस्य धर्मोपरि प्रकारतायां वि
शेषणताविशेषाधिकरणसमवायवृत्तित्वानां चतुर्णां सांसर्गिकविषयतात्वेनैव निवेशः भेदनिष्ठप्रकार
तानिरूपिते तस्य वृत्तित्वनिष्ठसांसर्गिकविषयतानिरूपिते तस्य च धर्मनिष्ठप्रकारतेत्यत्रान्वयः अत्रापि चंद्र
स्य वृत्तित्वोपरि प्रकारतायां समवायस्य संसर्गत्वे शब्दोक्तैव रीतिरनुसर्तव्या एवं धर्मनिष्ठप्रकारतायामपि अधि
करणनिष्ठविशेष्यतानिरूपितायां समवायस्य संसर्गत्वेऽप्यवधेयं अधिकरणमिति मत्वर्थोक्तेः तत्प्रत्यया

स्रु·टी
२२

र्थमाहाव्याप्तिगौरवाधिक्यमाह धर्मवत्त्वमिति धर्मवदितराहवृत्तित्वे सतीति धर्मवद्वृत्तित्वं धर्मवत्त्वं तत्त्वं इति धर्मवत्त्वद्वा
र्थान्तर्गततद्देशीयस्यादीनामपि तद्बोधविषयत्वं कल्प्यमिति गौरवमिति भावः धर्मत्वस्येति पदार्थान्तरमित्यभि
प्रायेणेदं स्वरूपेणेति निरवच्छिन्नस्यैवेत्यर्थः धर्मत्वमपि तत्त्वमिति वध्यसंयोगाश्रयत्वादिरूपमिति पदे तत्त्वा
ह किंचेति वस्तुतस्तथापि धर्मवत्त्वापेक्षया तत्र लाघवमेव धर्मत्वस्यात्रापि प्रवेशात् तदर्थादेस्तद्दयिकस्ये
तिभावः वस्तुतस्तु धर्मशक्तिपक्षे चेद्रभिन्नवृत्तित्वं चेद्रवृत्तित्वेन विशेषणेन वा धर्मे किंतु चेद्रभेदपर्यवसामा
नाधिकरण्येन धर्मविशेषणे तत्स्वचैद्रनिष्ठप्रकारतानिरूपितयथोक्तसामानाधिकरण्येन निष्ठसांसर्गि
कविषयतानिरूपितधर्मनिष्ठविशेष्यताशालितात् तत्त्वमत्र इवपदस्य शक्तिर्जनस्य कार्यतावच्छेदकं धर्मि
वत्त्वशक्तिपक्षे तु यथोक्तधर्मनिष्ठविशेष्यताप्रकारतानिरूपिताधिकरणत्वनिष्ठविशेष्यताशा
लित्वमेव तत्त्वमेवेति स्पष्टमेव गौरवं उपसंहरति तस्मादिति साहश्यं यद्यपि तद्भिन्नत्वे सति तद्धर्मवत्त्वमे
व तथापि इवपदस्य धर्मपदवशान्न कल्प्यते विवक्षितविवेकेन तथापर्यवसानादिति भावः उभयत्रापि
फलितार्थमाह इदंचेति नानार्थेति चेद्रभिन्नत्वादिरूपेणैव शक्तिस्वीकारात् नत्वेवं गौरवमनंतशक्ति
कल्पनात् इत्यत आह प्रतादीति प्रामाणिकत्वेन गौरवस्यापि सोढव्यत्वादित्यर्थः यथा वागर्थाविति

पर्यवसितभेदाभिप्रायेणेदं नन्वेवं चंद्र इव चंद्र इत्यादौ अनन्वयालंकारो न स्यात् भेदस्य तत्राभावादित्यत आह चं
द्र इवेति भिन्नेति न च तत्रैव वाच्यमिति भावः विशिष्टशक्तिपक्षमुपेक्ष्य खण्डशक्तिपक्षमाश्रित्य विचारयति अ
थेति चंद्रादिपदानां स्वार्थपरत्वे शक्तिद्वयकल्पनेनानन्तशक्तिपरिहारस्यात्र सर्वस्माद्विशेषमाह अनन्वया
लंकार इति तदर्थमाह चंद्रत्वावच्छिन्नेति इदं च चंद्र इव मुखमित्यादावेव संभवति न तु चंद्र इव चंद्र इत्यादौ चं
द्रत्वावच्छिन्नप्रतियोगिताकभेदस्य चंद्रे ऽभावादित्यर्थः तस्य चेति भेदस्येत्यर्थः धर्मस्येति रमणीयत्वादेः स
मवायेति प्रकृताभिप्रायं यद्यपि तत्र तद्धर्मपक्षे वाक्यार्थो ऽनुक्तः तथापीह तिलत्वधर्मस्य पृथगेव तदर्थाविमव
धेयं अत एवाग्रे तथा च भिन्नेहतिलत्वधर्मे चैव पदस्य शक्तिरिति वक्ष्यति हतिलधर्मैकशक्तिस्वीकारे ऽपि प
दार्थैकदेशतया ह्यसौ चंद्रान्वयो न स्यात् चंद्रादेश्चंद्रादिपदेनैव लाभेन चंद्रहतितधर्मे शक्तिकल्पनानौ
चित्यादनेन शक्तिकल्पनापत्तेश्च विशिष्ट इति एकविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यमिति रीत्या
दंडी चैत्रः कुंडलीति दंडविशिष्टचैत्रत्वधर्मितावच्छेदकीकृत्य कुंडलवैशिष्ट्यबोधात् चंद्रभेदविशिष्ट
मुखत्वत्वधर्मितावच्छेदकीकृत्य तद्गतधर्मप्रकारक इत्यर्थः एकत्रेति चैत्रो दंडी कुंडलीतिवद् चैत्रत्वध
र्मितावच्छेदकीकृत्य दंडकुंडलोभयप्रकारकबोधवत् चंद्रमुखत्वधर्मितावच्छेदकीकृत्य चंद्रभेदतद्ग

ग्र॰टी॰
२३
23

तद्धर्मोभयप्रकारकइत्यर्थः मुखत्वस्योभयत्रापिधर्मितावच्छेदकतयाविवादानंतरगीततयाचंद्रभेदस्यैवध
र्मितावच्छेदकतांदर्शयति चंद्रभेदमिति यद्विशिष्टविशेषणान्तरवैशिष्ट्यंभासतेतत्रसैवधर्मितावच्छेदकतादित
र्थः मुखत्वेनेति मुखंचंद्रभिन्नमित्याकारकस्येत्यर्थः प्रकांतनयेति विशिष्टवैशिष्ट्यमिति विषयताशालिबोधेवि
शेष्यतावच्छेदकप्रकारकनिर्णयस्यहेतुत्वात् वह्निव्याप्यधूमवान्नवापर्वतइतिसंशयेवह्निव्याप्यधूमवा
न्पर्वतोघटवानितिज्ञानानुदयात् चंद्रभिन्नंमुखंचंद्रगतधर्मवदितिबोधहेतुतयामुखंचंद्रभिन्नमितिनिर्ण
योविशेष्यतावच्छेदकप्रकारकनिर्णयविधयापूर्वमपेक्षणीयइतिभावः तथाचमहावाक्यार्थबोधात्पूर्व
मवांतरवाक्यार्थज्ञानस्योक्तविधयाततोपिपूर्वंयोग्यताज्ञानविधयापेक्षासमानाकारकस्यमुखंचंद्रभि
न्नमित्यपिज्ञानस्यावांतरवाक्यार्थज्ञानहेतुताविधयापेक्षेतिभावः ननुमास्तुशाब्दबोधेतथाविधज्ञानहेतुता
याः स्फुटत्वात्तदपेक्षायांकोदोषइत्यतआह तत्पदार्थमिति भेदोधर्मस्तद्वत्त्वमपीत्यर्थः ततश्चेदंपदा
र्थधर्मितावच्छेदकीकृत्यमुखपदार्थविशेष्यकधर्मरूपतत्पदार्थप्रकारकबोधोव्युत्पत्तिविरहान्नस्वीक
र्तुंशक्यतइत्यर्थः ननुएवंगृहंसंमार्ष्टीत्यत्रएकत्वकर्मत्वयोर्विभक्त्यायुगपदेवबोधान्नैकत्वविशिष्टोद्देश
नसंमार्गविधिरितिमीमांसकाः नन्वदर्शनमात्रमप्रयोजकमितिचेत् न तत्पदार्थप्रकारकशाब्दबुद्धिता

वह्नित्वप्रतिविशेष्यतासंबंधेन पदान्तरजन्योपस्थितेर्हेतुत्वकल्पनात् नचैवैकस्य धर्मितावच्छेदकत्वाख्यप्रकार
ताख्यान्यस्य च विधेयताख्येति वैषम्यानौचित्यात् युगपदेव तदर्थद्वयोपस्थित्या वैषम्ये प्रमाणाभावात् भेदप्रका
रकबोधे मुख्यपदजन्योपस्थितेः पृथक्कारणत्वं कल्पयित्वा धर्मिप्रकारकबोधे भेदनिष्ठधर्मितावच्छेदकतानि
रूपितमुख्यनिष्ठविशेष्यतासंबंधेन मुख्यपदजन्योपस्थितेः कारणत्वकल्पने चातिगौरवात् ननु चैत्रः पच
तीत्यत्रैकत्वविशिष्टश्चैत्रः पाकानुकूलकृतिमानित्याख्यातार्थैकत्वधर्मितावच्छेदककतदन्यचैत्रविशेष्य
काख्यातार्थकृतिप्रकारकबोधः प्रसिद्ध एवेति नच तत्रैकत्वस्य प्रथमैकवचनार्थत्वान्नाख्यातार्थैकत्वं आ
ख्यातार्थैकत्वस्य साधुत्वमात्रार्थत्वेनानन्वयात् चैत्रस्य समानाभिधानश्रुत्या स्वान्तर्वर्त्तिविभक्त्यर्थसंख्या
वरुद्धत्वेनाख्यातार्थसंख्यायास्तदन्वयाभावादिति वाच्यं नैयायिकैराख्यातार्थसंख्याया एव तत्रान्वयोपगमात्
यं यं भावनानुधावतीति नैतत्संख्यापीति तत्सिद्धान्तात् नचोक्तरीत्या सिद्धान्तो निर्युक्तिक इति वाच्यं प्रथमायाः
प्रातिपदिकार्थमात्रविधानेन तात्पर्यग्राहकतया एकत्वस्यापि तदर्थताभावे दृष्टान्तविरहात् तन्मतेऽपि सर्वत्रा
स्याध्याहारस्यावश्यकतया आख्यातार्थसंख्याया एव तादृशस्थले सर्वत्रान्वयोपपत्तेः प्रथमायास्तात्पर्यग्राह
कत्वस्योक्तमतयोः संख्याशेषितत्वकल्पने लाघवाच्च अत एव शुद्धप्रातिपदिकार्थप्रतिपिपादयिषायां प्रथमे

निमज्ञाभाष्यादिग्रंथानुकूल्यमितिचेत् सत्यं एकशक्ततावच्छेदकावच्छिन्नवाचकताया विवक्षितत्वात् तत्रैक
त्ववाचकतायाः एकवचनत्वावच्छिन्नाः घटमित्यादावप्येकत्वबोधात् कृतिवाचकताख्यातत्वावच्छिन्ना पच
त इत्यादावपि कृतिबोधात् प्रकृते तिपे वेदत्वावच्छिन्नैव इत्यपदस्योभयवाचकतेति भेदात् वस्तुतस्तु तत्रापि
कत्वस्य कृतिधर्मितावच्छेदकत्वे मानाभावः पाकानुकूलवर्तमानकृतिमानेकश्चैत्र इत्येव बोधासंभवात्
श्यामश्चैत्रः पचतीत्यत्र श्यामत्वधर्मितावच्छेदकीभूतस्य चैत्रपदार्थविशेष्यकाख्यातार्थकृतिप्रकारकबोध
दर्शनादुक्तं तत्पदार्थधर्मितावच्छेदकीभूतस्येति तत्र श्यामत्वस्याख्यातार्थत्वाभावाददोषः चैत्र एव पचती
त्यत्र चैत्रान्यः पाकानुकूलकृत्यभाववानित्येवकारार्थभेदं धर्मितावच्छेदकीभूतस्यैवकारार्थाभावप्र
कारकबोधोद्भवत्येवेत्यत उक्तं अन्यपदार्थविशेष्यकेति धर्मितावच्छेदकान्तरावच्छिन्नविशेष्यताकेत्यर्थः
तत्र चैत्रान्यत्वेनैव तस्य भाने तत्तद्रूपान्तरेण विशेष्यतेति भावः एकपदार्थधर्मितावच्छेदककान्यपदार्थविशे
ष्यकबोधोऽपि श्यामश्चैत्रः पचतीत्यादावेवाप्रसिद्ध इत्यत उक्तं तत्पदार्थप्रकारकेति यस्य पदस्यार्थो धर्मिता
वच्छेदकत्वेन भाति तत्पदार्थस्येत्यर्थः कृतिस्तु न श्यामपदार्थ इति न दोष इति भावः संप्रति स्वात्मविशिष्टश
क्तिपदत्वसमानाकारकबोधमंगीकृत्य स्वाभिमतं विशिष्टस्यैव शिष्टमिति न्यायेन बोधमाह चैत्रमित्रेति रक्तं द

उवाप्रकृष्टरसवरक्तत्वविशिष्टदंडस्यापकृष्टरूपवचंद्रभिन्नवृत्तित्वविशिष्टवंद्रवृत्तिधर्मस्य मुखेवैशिष्ट्यं पता
दृशबोधे च विशेषणतावच्छेदकप्रकारकनिर्णयः कारणं रक्तोदंडोनवेति संशयसत्वे रक्तदंडवानिति
बोधानुदयात् विशेष्ये विशेषणं तत्र च विशेषणांतरमिति न्यायेनाप्याह अथवेति यथा रक्तदंडवान्प्रकृष्ट
इतिज्ञाने प्रकृष्टदंडस्य दंडे वरक्तत्वस्य वैशिष्ट्यं भासते तथा मुखे चंद्रगतधर्मस्य धर्मे च चंद्रभिन्नवृत्तित्वस्य
वैशिष्ट्यं भासत इत्यर्थः चंद्रभिन्नं मुखं चंद्रगतधर्मवदिति बोधे मुखं चंद्रभिन्नमित्यादिज्ञानापेक्षाभिधानानन्व
युक्तौ गौरवोपन्यासमुखेन दूषयितुमाह तथाचेति चंद्र इवेति इंद्रभिन्नं मुखं चंद्रगतधर्मवदिति चंद्रभेदा
वच्छिन्नमुखनिष्ठविशेष्यताकचंद्रगतधर्मप्रकारकशाब्दबोधजनिकायाः सामग्र्या इत्यर्थः मुखं न चं
द्र इवेति मुखवृत्तिचंद्रसादृश्याभावविषयकत्वाद्दोषेत्यर्थः समानविषये प्रत्यक्षसामग्र्याः प्रबलत्व
त्वान्मुखं चंद्र इवेति चाक्षुषप्रतिपाद्यसादृश्यसामग्र्याः प्रतिबंधकत्वमित्युक्तौ विनाऽप्रसिद्धमिति चाक्षुषसाम
ग्र्या अभावविषयकत्वमुक्तं तथा च सादृश्यविषयकशाब्दसामग्र्याः सादृश्याभावरूपभिन्नविषयकत्वा
त्तत्प्रतिप्रतिबंधकत्वभिन्नविषये प्रत्यक्षसामग्र्यपेक्षया शाब्दसामग्र्याः प्रबलत्वस्वीकारादिति भावः
बाधाभावेति अप्रमाण्यानवधारितत्वे मुखे चंद्रत्वेनादृश्यशाब्दसामग्रीसत्त्वेपि मुखं न चंद्र इवेति चाक्षुषस्यैवानुभ्या

अ.टी.

२५

25

तादृशबाधनिश्चयेन तादृशशाब्दसामग्र्यभावे तेन तत्र व्यभिचारापत्तेः ननु तदापि शाब्दबोध एव कुतो न भवतीत्यत आह मु
खत्वेति मुखं चन्द्रभेदाभाववदिति ज्ञानस्य मुखं चन्द्रभिन्नमित्याकारकज्ञानप्रतिबन्धकत्वात् तादृशज्ञानसत्त्वे मु
खं चन्द्रभिन्नमिति ज्ञानानुदयात् तद्व्यतिरेकेण च विशेष्यतावच्छेदकप्रकारकज्ञानविरहेण चन्द्रभिन्नं मुखं चे
न्द्रगतधर्मवदिति शाब्दबोधासंभवात् तथा चाहुः प्रकृते न वाक्यार्थायोग्यत्वनिर्णयदशायां महावाक्यार्थ
ज्ञानानुदय इति अत्र मुखं चन्द्रभेदाभाववदिति ज्ञानं मुखत्वावच्छेदेन चन्द्रभेदाभावप्रकारकमवसेयं अ
न्यथा विशेष्यतावच्छेदकसामानाधिकरण्येन वा यज्ज्ञानस्य विशेष्यतावच्छेदकसामानाधिकरण्येन विशि
ष्टबुद्धिं प्रति विरोधितया मुखत्वसामानाधिकरण्येन चन्द्रभेदाभावग्रहेऽपि मुखत्वसामानाधिकरण्येन चन्द्रभेद
प्रकारकज्ञानसंभवात् मुखत्वावच्छेदेन तदभावग्रहे तु मुखत्वसामानाधिकरण्येनापि तच्चन्द्रभेदग्रहासंभवः
विशेष्यतावच्छेदकावच्छेदेन तदभाववत्ताज्ञानस्य विशेष्यतावच्छेदकावच्छेदेन विशेष्यतावच्छेदकसामानाधि
करण्येन च तद्विशिष्टबुद्धौ विरोधित्वात् ननु तादृशबाधाभावो भवतापि निवेश्य एवेति साम्यमेवेत्यत आह
मन्मते त्विति उक्तबोधस्येति चन्द्रभिन्नाभिन्नविशिष्टचन्द्रगतधर्मवदित्यस्येत्यर्थः निर्द्दमितेति चन्द्रभिन्नेत्यत्र
हि चन्द्रभेदप्रकारक एव बोधो न तु मुखत्वादिकं धर्मितावच्छेदकीकृत्य वह्निव्याप्यवान् पर्वत इतिवत् प्रमतायनालिं

२५

मिनव्याप्तिप्रकारकज्ञानवदित्यर्थः अनाक्रान्तत्वयेति तद्धर्मावच्छिन्नविशेष्यताकतद्विशिष्टबुद्धिं प्रतित
द्धर्मावच्छिन्नविशेष्यताकतदभाववत्ताज्ञानस्यैव प्रतिबन्धकत्वात् मुखं चन्द्रभेदाभाववदिति मुखत्वावच्छिन्न
विशेष्यताकचन्द्रभेदप्रकारकज्ञानस्य किंचिद्धर्मानवच्छिन्नविशेष्यताकचन्द्रभेदप्रकारकज्ञाने प्रतिबन्ध
कत्वासंभवाद्विशेषणतावच्छेदकप्रकारकज्ञानसामान्येन तादृशशाब्दबोधे तस्मै बाधकाभावात् तथो
क्तरीत्या मुखत्वावच्छिन्नविशेष्यताकचन्द्रभेदप्रकारकज्ञानस्वीकारान्मुखत्वावच्छिन्नविशेष्यताकचन्द्रभे
दाभावप्रकारकज्ञानसत्त्वे च तादृशज्ञानानुदयाद्विशेष्यतावच्छेदकप्रकारकज्ञानाभावे च तादृशविशिष्टबो
धानुपपत्तेरवश्यं उक्तबाधाभावो निवेशनीय इत्याशयः उभाभ्यामेवेति मुखं चन्द्रगतधर्मवैशिष्ट्यस्योभयमते
पि ग्राह्यत्वाभ्युपगमादित्यर्थः लाघवसंभवादिति सामग्र्यां बाधाभावनिवेशे इतरकारणैः सह विशेष्य
विशेषणयोर्वैविनिगमनाविरहेण गौरवमित्यर्थः प्रतीत्यापत्तेरिति चैत्रो दण्डी कुण्डलीत्यादौ दण्डकुण्डलयो
र्द्वयोरपि विधेयत्वप्रतीतेः विसंवादादिति धर्मस्यैव विधेयत्वानुभवात् न तु भेदस्यापीति अत एवेति विशे
ष्यविशेषणमिति रीत्या बाधाभ्युपगमादेवेत्यर्थः यत एव चात्र चन्द्रभेदांशे निर्द्धर्मितावच्छेदकत्वं बाधः अत एव
मुखं चन्द्रभिन्नं नवेति मुखत्वावच्छिन्नविशेष्यताकसंशयोऽननिवर्तते मुखं चन्द्रभिन्नमिति बाधाभ्युपगमेन

सोपितिवर्त्तेनेत्यर्थः तद्वतीति भेदवतीत्यर्थः एकस्यापवेति शक्तिवाकल्पस्यैव गौरवावहत्वादित्यर्थः विषय
गौरवमुन्नाययति नचेति भेदइति तथाचतयाभेदवतः शक्यते भेदस्यशक्यतावच्छेदकताभेदत्वस्यचशक्य
तावच्छेदकतावच्छेदकताकल्पना ज्ञानातिरिक्तपदार्थनिष्ठावच्छेदकतायाः किंचिद्धर्मावच्छिन्नत्वनियमादि
तिगौरवमितिभावः तस्यापीति भेदत्वस्याखंडोपाधित्वप्रमाणाभावेनभेदघटितत्वखंडोपाधिरेवभेदत्वमिति
तन्निवेशस्यतत्रापिसत्वादित्यर्थः तस्मात्सर्वमनेवृत्तित्वशक्तिरत्रत्वभिन्ने धर्मेवृत्तित्वंचमतद्वयेपिशक्तिरि
त्यर्थं अतएवपूर्ववृत्तित्वपृथग्गेवार्थइत्यत्रोक्तंग्रंथसंमतिरपिदर्शितेति भिन्नपदार्थेति भेदवतः पदार्थ
त्वेभेदस्यतदेकदेशत्वात् अन्यथाइवपदार्थेत्वभिन्नपदार्थेत्यसंगतंस्यात् तथाचभिन्नरूपोयः पदार्थइ
तिकर्मधारयः नचपदार्थः पदार्थेनान्वेतिनतदेकदेशेनेतिकथमेतदितिवाच्यं ससंबंधिकस्थलेचैत्रस्य
मातेत्यादावेकदेशान्वयाभ्युपगमात् अतस्तादृशस्थलेतत्पदार्थप्रकारकशाब्दबुद्धौप्रवच्छेदकतासंबंधे
नतत्पदजन्योपस्थितेर्हेतुत्वमभ्युपेयं मदपेक्षयेति चंद्रस्यभेदान्वयोवृत्तित्वान्वयापेक्षोभयत्रतुल्यः भिन्नस्य
वृत्तित्वेपुनरन्वयस्तुतत्राधिकइतिगौरवमितिभावः भेदप्रतियोगीति यद्यप्येतदपेक्षयाउपमानार्थकपदजन्यो
पस्थितित्वेनकारणत्वकल्पनेगौरवभेदाभावः तथाप्युपमानत्वस्यसादृश्यप्रतियोगित्वरूपतयासादृश्यस्य

तद्भिन्नत्वादिवक्तृधर्मेच्चरितितयागौरवमेवेत्यवधेयं यदितु चंद्रादिपदजन्योपस्थितित्वेनैवकारणताकल्प्यते
तत्राह उपमानानामिति नचमदिति तथाचहृतित्वनिष्ठत्वादिहेतुहेतुमद्भावोऽसिद्धएव तथानुहृतित्वेषा
मितत्तद्भिन्नान्वयायहेतुहेतुमद्भावस्यकल्पइतिगौरवमितिभावः सांप्रदायिकेति विशेषणतायाःस्वरू
पसंबंधत्वेऽतिरिक्तत्वेवागुरुत्वमेवेतितत्रतत्रयथदर्शनात् तथाचाप्यरूपीतिन्यायेनमन्मतएवलाघवमि
त्यर्थः इदंचाभ्युपेत्योक्तमस्तुवस्तुतस्तयेत्तमदेतेहृतित्वसंबंधमात्रेणभिन्नस्यधर्मान्वयः तथाचसामानाधि
करण्यापेदतयातस्यसंसर्गत्वेस्पष्टमेवलाघवमितिनाभ्युपपत्तिः पुनरुक्तत्वेति चद्भिन्नाश्रयहृतित्वेधर्म
स्यावगाह्यमानेमुखस्यापिचंद्रभिन्नतयातहृतित्वस्यावगाहनात् सामानाधिकरण्येनेति विशेषण
तासंबंधेनचेद्भेदाधिकरणेसमवायादिनारमणीयत्वादेर्हृतित्वेसंसर्गतयावगाह्यमानेमुखस्यापि
तादृशभेदाधिकरणतयातत्रापिधर्मस्यहृतित्वग्रहात् सामानाधिकरण्यस्य उभयत्रापिसंसर्गत्वाविशे
षादित्यर्थः सांसर्गिकेति यद्यपितत्रापिमुखेधर्मवैशिष्ट्यंविशिष्यनभासते इतितथापौनरुक्त्यावकाश
स्तथापितदभ्युपेत्येदमुक्तम् मुखविशेष्यकेति अयमाशयः पौनरुक्त्यंहिशाब्दसमानाकारकज्ञानेन
तत्सर्वसत्त्वेचेति अतएव [illegible] शाब्दप्रमायांयथार्थयोग्यतानातत्वंनहेतुरितितूक्तञ्चिवाक्यमणिकारव्याख्या

नावसरे बाधाभावस्य योग्यतारूपस्य यावाक्यार्थज्ञानजनकत्वापत्तिरिति तत्कापक्षधरमिश्रैरुक्तं अनुमाने हि द्व
साधनवत्त्वहेतुनरूक्तस्य सदोषत्वादिति शाब्दत्वेऽपि वैशेषिकानुमानप्रकरणे क्वचिद्योग्यताज्ञानस्यापि शाब्द
धीहेतुत्वं इति मूलमधिकृत्य तथा सति वाक्यार्थबोधसत्वात्कथं शाब्दस्यकतद्दोषकत्वमित्याशंक्य शाब्देज्ञा
यतांऽशे नीत्यामाश्रित्य शाब्दबुद्धिः समर्थिता अत्र च वक्तव्यं द्दभिन्नवृत्तित्वेवुद्धेऽपि मुख्यत्वं विशेष्यतावच्छेदकीभू
तत्वतादृशधर्मप्रकारकः शाब्दबोधो विवक्षितः तत्समानाकारकबोधस्य पूर्वमसिद्ध्यानन्तथ्यात् अत एव
विशाकलितयोरेव पदार्थतत्संसर्गयोस्तात्पर्यग्रह इति न तदर्थमनुमानपूर्वं विशिष्टोपस्थितिरभ्युपेयेति
वदद्भिः पक्षधरमिश्रैस्तात्पर्यविषयत्वस्य संसर्गांशे विशेषणत्वे हेत्वनुज्ञानदशायामेव वाक्यार्थबोधाप
त्त्या कथं शाब्दरूपानुमितिरिति दोषो निराकृतः तात्पर्यज्ञानस्य शाब्दधीहेतुतावादिभिरपि नैयायिकैस्ता
दृशरीत्यैवानुसर्तव्यत्वादिति दिक् लाभेपीति घटत्वस्य घटवृत्तित्वं विना घटवदन्योन्याभावप्रतियोगिता
वच्छेदकत्वानुपपत्तेः तदवृत्तिधर्मस्य तद्वृत्तिभेदप्रतियोगितावच्छेदकत्वनियमात् घटावृत्तेः पटत्वस्यैव
घटवृत्तिभेदपटत्वावच्छिन्नप्रतियोगिताकभेदस्य घटे सत्वादिति भावः अंगीकृत इति रामकृष्णभट्टाचा
र्यादिभिरिति शेषः एवं च यत्र वस्तुतस्तद्वृत्तित्वं भासते तत्रापि शाब्दसमानाकारकबोधाभावात्तत्रैवानु

त्नमिति स्थितिः अतएव मुखभिन्नत्वमिति त्वं विनापि चंद्रभिन्नत्वमिति त्वज्ञानपर्यवसानमिति कुतस्तदाशयेनो न तत्त्व
प्रसंगवारणीपीति अभिप्रायवानाह नहीति तदन्येति मुखान्येत्यर्थः बाधादिति नादृशरमणीयत्वादेर्य
त्रादावभावादित्यर्थः विलोपापत्तेरिति तत्राप्युपमायाएवसंभवात् तथापीति धर्मविशेष्यभेदान्वय
वादिनइत्यर्थः ननु चंद्रभेदस्य चंद्रान्वयानर्हत्वाच्चंद्रं चंद्रभिन्नत्वे सति चंद्रगतधर्मवानिति बोधो म
न्तेन तन्न संभवतीति कथं साम्यमित्यत आह उभयेति घटचंद्रोभयभेदस्य व्यासज्यवृत्तिधर्मावच्छि
न्नप्रतियोगिताकभेदस्येत्यर्थः व्यासज्यवृत्तिधर्मेति उभयत्वस्वरूपेत्यर्थः आदिपदाद्घटत्वादिविशि
ष्टचंद्रत्वादिसंग्रहः। विशेषणादिति उपमानान्वयाभ्युपगमात् तथाचोपमानस्य चंद्रादिपदार्थ
स्य उपमानतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकत्वसंबंधेन इवार्थभेदेऽन्वयस्वीकारात् उभय
त्वादेश्चोपमानतावच्छेदकत्वविरहात्तदवच्छिन्नप्रतियोगिताकत्वेन विशिष्टस्यान्योन्याभावस्य चंद्रा
न्वयानर्हत्वान्न दोषइत्यर्थः विशेषणमिति इवार्थभेदे उपमानस्य उपमानतावच्छेदकावच्छिन्नप्रतियो
गिताकत्वेन विशिष्टस्यान्योन्याभावस्य चंद्रान्वयानर्हत्वान्न दोषइत्यर्थः विशेषणमिति इवार्थभेदे उपमा
नस्य उपमानतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेनैवान्वयो भवतीति न तदंशे शंकामिति भावः ननु उप

ग्र॰टी॰
२८
२४

मानोपमेयतावच्छेदकयोरैक्ये उपमानस्वीक्रियतएवेत्याशंकते नचात्रेति उपमानोपमेययोरैक्येप्युपमास्वी
कारेऽनन्वयोच्छेदापत्तेरित्यर्थः सामानाधिकरण्ये इति वाचस्पतिमिश्रादिभिरित्यर्थः दृष्टाधिकरणादावुपमानो
पमेययोर्भेदविकल्पने भेदमात्रस्योपमेतिभाषमत्वादांगीकृतत्वात् नचानन्वयप्रस्तावे दर्शयिष्यते
भिन्नत्वमुपमीति नचवृत्तित्वस्यधर्मस्यचइवपदार्थत्वं उपमानतावच्छेदकावच्छिन्नप्रतियोगिताकभेद
वदुपमेयकत्वं विवक्षितमित्यपि प्रागुक्तनविमर्शमेव यथोक्तबोधस्वीकारेपिन नत्रदतिरिक्तमभ्युपगम
वादेनाह अन्यथेति प्रकृतेसंगमयति अतएवेति यतस्तद्वृत्तित्वेनधर्मस्योपमानवृत्तित्वंचेद्वभिन्नवृत्ति
त्वेनचमुखचन्द्रयोपमेयवृत्तित्वंबोध्यतेइवपदेनअतइत्यर्थः अन्यतीति अतएवाशादृष्टाबोभयवृत्तित्वस्यध
र्मैबोधादित्यर्थः सामान्यतइति चंद्रभिन्नत्वरूपेणेत्यर्थः इवपदेनेति रमणीयादिपदप्रयोगस्तत्वरम
णीयत्वादिरूपेणेवधर्मस्यइवपदाद्बोधइत्युक्तत्वात् निराकांक्षत्वादिति रमणीयत्वत्वरूपेणवारद्वयमु
पस्थितेनानयोः परस्परमन्वयानुपपत्तेः एकरमणीयत्वान्वयेनैवनिराकांक्षतयाद्वितीयस्यनतस्यभ्रमत्वाघ
न्वयानुपपत्तेः नत्वापिधर्मत्वेनैवोपस्थित्यभ्युपगमेनतुभिन्नप्रकारकोपस्थितिस्तेरमणीयत्वादरभेदेनधर्मान्व
यसंभवान्नाहशरमणीयत्वाभिन्नधर्मवदितिधीसंभवात् एकमेवेति एकस्यनान्यपर्याहकत्वोपगमानइवा

देरेव रमणीयत्वत्वादिरूपेण धर्मोपस्थापकत्वोपगमादिति भावः तदेतदनाकलय्य प्रत्यवतिष्ठते तावतापीति
चेद्रूढ इव मुखं रमणीयमित्यादौ रमणीयत्वा रमणीयादिपदार्थत्वान्मुखादावन्वयो यद्यपि तावपि स्वाह्लादयतीत्या
दौ न तत्संभवादित्यर्थः ननु तत्रापि धात्वर्थस्याह्लादकत्वस्याश्रयतया मुखादावन्वयः कुतो न स्यादत आह
धात्वर्थेति तंडुलं पचतीत्यादौ विभक्त्यर्थकर्मतान्वयद्वारा नामार्थस्य तंडुलस्य धात्वर्थपाकान्वयांगीकारात्
साक्षादित्युक्तं विभक्त्यर्थाविशेषणीभूयेत्यर्थः स्तोकं पचतीत्यादौ नामार्थस्य स्तोकस्य तादात्म्येन पाकान्वय
दर्शनात् भेदेनेत्युक्तं अभेदातिरिक्तसंबंधेनेत्यर्थः ननु एवं तत्र इति तत्रपदार्थस्यानर्थकत्वेन स्वापाभावसे
वबोधात् विशेषणेनेति बलवदनिष्टाननुबंधित्वाभाववत्कलंजभक्षणमिति बोधोदयात् अन्यथे
ति निपातातिरिक्तनामार्थधात्वर्थयोरपि साक्षादभेदान्वयस्वीकारे इत्यर्थः तंडुल इति नचतार्हि शाब्दे प्रथमा
या असाधुत्वान्नदोष इति वाच्यं असाधुत्वज्ञानाभावदशायां तदापत्तेः कर्मत्वप्रकारकबोध एव तत्र द्वितीया
याः साधुत्वं अतः कर्मत्वसंसर्गकबोधः स्यादेवेत्यत आह इवपदेन विशिष्य धर्मोपस्थापनेन रमणीयादिपदानामेव ता
त्पर्यग्राहकत्वमिति एवकाराभिप्रायं विशदयति तादृशस्थल इति इत्यर्थ एवेति तथाच धात्वर्थत्वविरहात्तत्
स्य नामार्थान्वयानुपपत्तिरित्यर्थः नचात्र आश्रयत्वस्याख्यातार्थतामते त्विनस्याह्लादकत्वस्य मुखादावन्वयः सं

अ॰टी॰
२९
29

भवत्येवेति किमर्थं यातोऽस्मात्पर्यग्राहकत्वकल्पनमिति एवमपि चेद् सहृदयत्वसंबंधेनाह्लादकत्वानुपपत्तेः चेदभि
त्रहृत्यिं चेद्हृत्वाह्लादकत्वाश्रयोमुत्वमिति वा थासिद्धेः न च इवार्थहृत्वावेव चेद्वादेरन्वयः ततस्तद्दहृतीत्यस्याह्ला
दकत्वाऽन्वयः निपातार्थस्य धात्वर्थाऽन्वयव्युत्पत्तेरिति वाच्यम् नापि शास्त्रबोधप्रतिकूलत्वनैयेवोपमादोषत्वमिति
नियमोऽप्यस्तीत्याह हीनतादीति क्वचित्सहृदयोद्वेगः क्वचिन्नेत्यत्र किं नियामकमत आह सहृदयेत्यादि नचैत
दिति न चैतदाह यत्र लिंगवचनान्तराभावेनान्यथानुपपत्त्या व्यधिकरणयोरपि लिंगवचनयोः प्रयोगः प्रयोक्तृरसा
कानुत्वयनाद्दोषाभावादित्यर्थः ननु काव्यादर्शकारिकायां सहृदयोद्वेगाभावइत्येव दोषत्वाभावबीजमुक्तं न त्व
त्वदुक्तो लिंगवचनान्तराभावस्तत्कथं त्वयास्वोक्तार्थे तत्संमतिर्दर्शितेत्यत आह एवमेवेति तत्तद्बीजं नरसानु
पपत्तेर्हृद्संमतत्वाद्वयथोक्तमेव तद्बीजमिति भावः ननु प्राणाशाहस्यैकवचनान्तस्यापि सर्वसम्मतत्वात् प्राणाइ
व प्रियो यं मे इत्यत्र तदुक्तोद्वेगकत्वाभावो वचनान्तराभावमूलकान्यथानुपपत्तिरूपो नास्तीति कथं मूलानुमतं त्वदु
क्तव्याख्यानमित्यत आह स्वभावेति उभयत्रस्त्वपदं एकवचनादिपरं नियतवचनत्वं चैतस्य च वचनान्तरनिष्ठं नियतत्वं चे
त्यर्थः एकवचनादीनामेकत्वद्वित्वबहुत्वान्निशकार्थाः द्वेकयोर्द्विवचनैकवचने बहुषु बहुवचनमित्यादिवचनात्
तदभिधानेऽप्यनियतत्वं स्वेषां तत्कत्व तदेव बहुत्वाति प्राणादाराइत्यादि बहुवचनस्य बहुत्वशक्यार्थः तद्विनापि दाराइमा

२९

दोषकस्मामपिबहुवचनस्यैवविधानेनतत्रसमस्यबहुवचनस्यतदभिधानानियतत्वमित्यर्थः नन्वभिधानंप्रतिपादन
मात्रंतन्नस्त्रलक्षणादिनाएकवचनादेरपिबहुत्वादिप्रतिपादकत्वात् पादानयोग्यस्याप्येकवचनादेरनियतत्व
प्रसंगइत्यतआह तत्त्वेनेति नन्वेवमपिननिस्तारः जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यामित्याद्यनुशास
नसमइत्यतआनतयाबहुवचनस्यापिबहुत्वाभिधानानियतत्वात् ततश्चसत्तंसीवामलंननभइत्यादिवचनभे
दस्यउत्पत्त्याभिधानविरोधापत्तिरितिचेत् मैवम् प्रकृतिविशेषपुरस्कारेणानंदनुमननत्वस्यविवक्षितत्वात् अ
स्तिचतथाप्राणदारादिशब्देषु पुंसिभूम्न्यसवःप्राणाइत्याद्यनुशासनदर्शनात् जात्याख्यायामितितुसामान्यत
एवतत्प्रवृत्तिश्चानुपपत्तिः एवंचयच्छब्दस्यार्थेकोपिबहुवचनांतत्वविशिष्यानुशासनसंमतं नत्रवचनभेदान
दोषइत्यत्रतात्पर्येणतुनत्समानवचनांतशब्दानांतत्रानुपपत्तिरपि वर्णशक्तेस्तावतैवानुन्नयनात् प्रन्यथाप्राणाइ
वेत्यादेरदोषत्वाभिधानानुपपत्तेरितिफलितार्थः तल्पादिपदप्रयोगेप्राप्तौकथमित्याशंकाह चंद्रेणेति तुल्य
पदस्यापिसादृश्यमात्रपरत्वेवज्ञेनानस्यादतआह केवलेति इवपदस्यापिकेवलसादृश्येप्रयोगाभावादाह सा
दृश्याभिन्नमिति निपातातिरिक्तनामार्थयोरभेदान्वयस्यैवव्युत्पन्नत्वादित्यर्थः इवार्थसादृश्यस्यतुनिपातातिरि
रिक्तनामार्थत्वाभावेनभेदान्वयसंभवन्नधर्मिपरत्वकल्पनमितिविशेषः तदेकदेशेति तदर्थैकदेशस्यसादृश्य

सेत्यर्थः सामानाधिकरण्यं स्वरूपमिति शेषः यद्वा सादृश्यस्य तदर्थकतुलाशब्देत्यर्थः अन्यथापदबोध्यसादृश्य
सामानाधिकरण्यमर्थ इत्यन्वयानुपपत्तेः तुल्यशब्दस्तावत् नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्रा
प्यवध्यानाम्यसमसमितसंमितेषु इति सूत्रेण तुलया संमितमित्यर्थे यत्प्रत्ययान्तत्वेन व्युत्पादितः तच्च यद्यपि व्यु
त्पत्तिमात्रमिति सिद्धान्तस्तथापि चंद्राभेदसामानाधिकरण्यं आश्रयस्य तुल्यपदार्थ इत्यत्रैव तात्पर्यं तुल्यार्थैरिति
तुल्योपमाशब्दव्यतिरिक्ततुल्यार्थकपदयोगे उपमानार्थकपदात्तृतीया विकल्पेन भवतीति सूत्रार्थः यद्यपि तृ
तीयाविधानमात्रेण वृत्तित्वं तृतीयार्थ इत्यत्र सूत्रसंमतिर्नायाति तथापि तत्रानुगतो विभक्त्यर्थो वश्यं कल्प्य इत्य
पेक्षावशेन वृत्तित्वमेव तृतीयार्थः कल्प्यत इत्यभिप्रायः इदमेवाह अत एवेति इवादिस्थले उपमानोत्तरविभक्तेः सा
धुत्वमात्रार्थतया यावत्प्रमाणतात्रोपमेयविभक्तिरेव अत्र तु निपातार्थपरतया उपमेयलिंगतिरस्कृतैकैव तृ
तीयाविभक्तिरित्यर्थः आश्रयस्यापि तुल्यपदार्थकल्पने प्रमाणमाह अन्यथेति आश्रयस्य तुल्यपदार्थत्वकल्पना
दित्यर्थः तस्मादिति आश्रयत्वसंबंधेनेति शेषः धर्ममुखयोर्नामार्थतया आश्रयत्वादिभेदसंबंधेनान्वयासंभवा
दिति भावः आश्रयस्यापि तदर्थत्वे तु अभेदसंबंधेन तस्य मुखेनान्वये धर्माश्रयाभिन्नं मुखमिति वत्प्रमाणबोधः सं
भवतीत्यर्थः नन्वेवमपि सामानाधिकरण्यस्य धर्मस्य च तुल्यरूपनामार्थतात्कथं तयोः परस्परं भेदान्वयः पव

नाश्रयत्वस्यतुल्यपदार्थत्वेन्तु अभेदसंबंधेन तस्य मुखेन्वये धर्माश्रयाभिन्नं मुखमिति विलक्षणबोधः संभवतीत्यर्थः न
न्वेवमपि सामानाधिकरण्यस्य धर्मस्य च तुल्यरूपनामार्थत्वात्कथं तयोः परस्परं अभेदान्वयः एवमाश्रयत्वस्य तुल्यप
दार्थत्वे आश्रयत्वाभिन्नं मुखमित्येव बोधः स्यात् अथोभयत्र भावार्थस्याः निवक्षितत्वात्सामानाधिकरण्याश्रयत्वस्य तदर्थः
तेन आद्यस्य धर्मे द्वितीयस्य च मुखे अभेदान्वयोः न एवं धर्माश्रयाभिन्नं मुखमिति समनंतरमेव वक्ष्यति इति भवदाशयः
तथापि धर्मस्य आश्रये भेदान्वयानुपपत्तिरस्त्येव न हि धर्माभिन्नाश्रय इति बोध इष्ट इति चेन्न सत्यं धर्माश्रय एव तुल्यपदा
र्थ इत्यत्र तात्पर्यात् तत्रैकदेशे धर्मे सामानाधिकरण्यं न तस्य च अभेदान्वयः चंद्रेणात्र चंद्रस्य वृत्तित्वेन तस्यापि धर्म एवा
न्वय इति यथोक्तबोधोपपत्तिरित्यवधेयं वृत्तित्वमपि तुल्यपदार्थ एव कल्प्यतां न तु तस्य तृतीयार्थत्वे वैषम्यस्यानर्ह
त्वादित्यत आह अत एवेति नामार्थयोरभेदान्वयापत्तेरेवेत्यर्थः तथा च तत्र चंद्रपदार्थस्य भेदान्वयो न स्यादिति तस्य तृ
तीयार्थत्वकल्पनमिति प्रकृतार्थः चंद्रस्य प्रत्ययार्थवृत्तित्वान्वय उपपन्न इत्यर्थः वृत्तित्वस्य धर्मान्वयो न स्यादित्यर्थः अम
स्तु न कार्यः वृत्तिमत्तयैव तुल्यार्थकल्पनया तादात्म्यान्वयोपपत्तेः अत एवाग्रे वृत्तित्वादीनां नामार्थत्वेन तत्र चंद्रादेर्भे
दान्वयानुपपत्त्येति स्वयमेव वक्ष्यति इदमुपलक्षणं भेदसमानाधिकरणमात्रस्य तुल्यपदार्थत्वकल्पनेऽपि नामा
र्थस्य चंद्रस्य प्रतियोगिता संबंधेन भेदान्वयो न स्यादिति चंद्रप्रतियोगिकत्वविशिष्टभेद एव तुल्यपदार्थ उक्तरूपापि वा

प्र॰टी॰
३१
31

ध्यं प्रकृतमाह अथेति धर्मोपस्थापकेति तुल्यपदस्य चंद्रभेदसमानाधिकरणत्वमात्रबोधकतया उपमेयवृत्तित्वमात्रं तेन धर्म
स्य बोध्यते उपमानवृत्तित्वं तु चंद्रेणेतिपदेन अतउपमानोपमेयोभयवृत्तित्वं धर्मवाचकतुल्यपदस्यार्थो न भवतीति इवपदा
द्यत्रवैषम्यमिति फलितार्थः इवादाविति तेषां सादृश्यार्थकतया धर्ममात्रपरत्वात् तुल्यादाविति तेषां सादृश्यवत्परत
या विशेषणीभूतसादृश्ये पलत्वाणांगीकारात् तथा च बोधवैषम्यं स्पष्टं तत्वाध्ययोर्न व्यवस्थापकं तन्मतेपि वृत्तिभेद
स्वीकारेपि उभयत्रापि बोधसाम्येन तद्व्यवस्थानुपपत्तेरितिभावः तथापि तत्पदे किं विनिगमकमित्यत आह प्रत्येनेति ॥
सादृश्यं तावत्प्रतियोग्यनुयोग्युभयनिरूप्यमिति सर्वसंप्रतिपन्नं तत्र च फललाभो धर्मस्योभयनिष्ठत्वं भासते तद्वयत्र ध
र्मवाचकपदादेव निर्वहति साकांक्षोनी यत्र तु पदद्वयेन साकांक्षार्थी पदद्वयसमभिव्याहारसामर्थ्यादित्येव विवेकः साधीयान्
अतएव व्रीहीनवहंतीत्यादौ द्वितीययानिरपेक्षतयैव व्रीहीणां क्रियाजन्यफलशालित्वबोधनात्तस्याः श्रुतित्वमिति मीमांस
कसंप्रदायः यदाहुः अभिधातुपदस्य स्मिन्निरपेक्षो नवः श्रुतिरिति न चात्र इवशब्दस्य निरपेक्षत्वेन सादृश्यबोधकत्व
मसिद्धं चंद्रादिपदसमभिव्याहारेणैव तद्बोधकत्वादिति वाच्यं द्वितीयाभेरपि क्रियायाः प्रकृत्यर्थसमभिव्याहारेणैव बो
धकतया तस्याः श्रुतिविरहापत्तेः पदांतरसमभिव्याहारापेक्षेणापि विवक्षितार्थबोधकत्वसामर्थ्यं तत्र द्वितीया
मात्रस्यास्तीति चेत् तदीहापि चंद्रादिपदसापेक्षत्वेपि उभयवृत्तित्वबोध इवपदेन निर्वहति तुल्यादिपदानां तूभयवृत्ति

३१

तद्बोधार्थं पदांतरापेक्षाप्यसत्त्वात् आधिकस्यापेक्षणीयत्वात् वैषम्यमिति आद्ये श्रौती द्वितीये त्वार्थीति क्रमेण च प्रद्वेषः न च
चैत्रपदसापेक्षत्वं इवादौ तुल्यादौ च समानमेवेति वाच्यं तथापि तत्र प्रत्ययार्थस्य वृत्तित्वस्याधिकस्यापेक्षणात् चैत्रमि
वेत्यादौ च विभक्तेः साधुत्वमात्रार्थत्वतया तदर्थाभावेन तदर्थस्यानपेक्षणीयत्वात् न च स्यादप्येवं यदि चैत्रभिन्नवृ
त्तित्वे सति चैत्रवृत्तिधर्मः सादृश्यस्वरूपं स्यात् तद्भिन्नत्वे सति तद्वृत्तिधर्मः सादृश्यस्वरूपं स्यात् तद्भिन्नत्वे सति त
द्गतधर्मवत्त्वस्यैव तत्स्वरूपत्वादिति वाच्यं तस्यापि फलतो विवक्षितविवेकेन तद्भिन्नवृत्तिधर्म एव सानस्य प्रागेव
व्यवस्थापितत्वात् अनेकवृत्तित्वं सादृश्यमिति मूलग्रन्थव्याख्यानावसरे अनेकवृत्तित्वं हि नैकजातीयानेकवृत्ति
त्वमात्रं किंतु भिन्नजातीयानेकवृत्तित्वं तच्च चंद्रादिभिन्नवृत्तित्वे सति चंद्रादिवृत्तित्वमेव पर्यवस्यति अतः सादृश्य
स्य इवादिपदैस्तुल्यादिपदापेक्षया न्यूनपदसापेक्षत्वेन प्रतिपादनात् तुल्यादिपदैस्तु इवादिपदापेक्षयाधिकपदसा
पेक्षयाधिकपदसापेक्षत्वेनेति यथोक्तरीत्यैव श्रौतत्वव्यवस्थापनं युक्तमिति तदेतत्सर्वं मनसि कृत्वाह भिन्नपदे
ति श्रौतार्थिके ति विभक्त्यन्तरकल्पने नियामकाभावेन प्रधानभूतविशेष्यविभक्तेरेव तत्र प्रयोगात् अत एव
कण्ठं करोति भीष्ममुदारं दर्शनीयमित्यादौ कर्मत्वस्य कण्ठपदोत्तरद्वितीयैव प्रत्यायनात् कण्ठसामानाधिकरण्या
देव भीष्मादिपदादपि द्वितीयेत्यनभिहिते इति सूत्रे महाभाष्ये स्पष्टमित्यर्थः उक्ताभिप्रायमविद्वान् शंकते न चेति

अ॰टी॰

३२

32

नामार्थेति उद्भूतादेस्तु रक्तादिरूपनामार्थान्तरविशेषणीभूतत्वान्न दोष इति भावः ननु चंद्रमिवेत्यत्रापि इवादिरूपनामा
र्थान्तरविशेषणीभूतत्वाच्चंद्रादेः साम्यमेवेत्याह नचेति निपातेति तथा च निपातातिरिक्तनामार्थान्तराविशेषणीभूत
त्ववाच्यो न तस्य चंद्रादेर्नामार्थान्तरविशेषणत्वाभावविरहेपि निपातातिरिक्तनामार्थान्तराविशेषणत्वमस्त्येवेति भा
वः चंद्रेणेति तत्र चंद्रस्य निपातातिरिक्ततुल्यरूपनामार्थविशेषणत्वात्तन्न तथेति भावः यद्यप्येतादृशं नियामकं न
प्रमाणसिद्धं तथापि वक्ष्यमाणप्रमाणानुगृहीतत्वात्कल्पनायाः इदमुक्तं ननु निपातातिरिक्तनामार्थान्तराविशेष
णीभूतविशेषणस्य विशेष्यविभक्तिकत्वकल्पनायेत्याससाचादिविशेषणत्वस्य विशेष्यसमानविभक्तिकत्वक
ल्पनेस्ताघवमितिचेत् सत्यं अतएवापरितोषाद्भाष्यप्रयोगादिरूपमेव प्रमाणं वक्ष्यतीत्यदोषः शाली
वत्पणमेति उपमानानिसामान्यवचनैरिति सूत्रे भाष्यकृतामयं प्रयोगः तथा च इवार्थे विशेषणत्वापन्नाया
अपि शस्त्र्यानपुंसकत्वादर्शनात्तन्न क्लीवत्वमित्यर्थः अवांतरसमाधिमुक्त्वा वास्तवसमाधिमाह अनियतेति
नियतलिंगानां लिंगानपेक्षतया तत्सापेक्ष्यविशेष्यनिघ्नपरतायाः एवचनस्य युक्तत्वात् आकांक्षितविधानं
ज्याय इति न्यायात् अतएवादिपंचतीसादावादिशब्दस्य पुंस्त्वादिः पूर्वपोरस्येत्यादिकोषे नियतपुंलिंगताद
र्शनात् क्रियाविशेषणत्वेपि न क्लीवत्वमित्यभियुक्तानां सिद्धांत इत्यर्थः उपमानस्योपमेयविभक्तिकत्वे सर्व

३२

प्रमाणानुपन्यासात्सिंहावलोकितन्यायेनाह भाष्यादीति यद्यपि भाष्यकारादन्येषां कवीनां प्रयोगो न स्वातन्त्र्येण प्र
माणं सूत्रवार्तिककारयोश्चेत्याह शप्रयोगाभावस्तथापि भाष्यप्रयोगस्य स्वातन्त्र्येण प्रयोगान्तराणां च तात्पर्यग्राह
कत्वेनोपयोगादादीत्युक्तं यद्वा निरुक्तकारादिपरमादिपदं इति नत्वा ननु शास्त्रीवश्यामेत्युक्तो महाभाष्यप्रयोगो
नोपमानस्योपमेयसमानविभक्तिकत्वप्रमाणं भवितुमर्हतीति पदद्वयसाधारण्यात् प्रथमोपस्थितत्वेन प्रथमे
तिवादिनोपि तस्य विरोधाभावात् सत्यं विभक्त्यन्तरान्तानां तदीयानां प्रयोगान्तराणामेवात्र प्रमाणत्वेनाभिमतत्वा
त् किंच उपमानादाचारे इति सूत्रे अधिकरणाच्चेति वार्तिकमत्र प्रमाणं तद्धि प्रासादीयति कुट्यामिति उपमेये
सप्तमीश्रवणादुपमानमपि सप्तम्यन्तमिति कर्मविवक्षायामेव तत्प्रयोगासंभवादारभ्यत इति कैयटेन प्रति
पादितं किंच तत्र तस्येवेति सूत्रमप्यत्र मानं तद्धि तेन सप्तम्यन्तेन षष्ठ्यन्तेन च उपमानपरामर्शीउपमेयेपि तत्र
सप्तमीषष्ठीप्रयोगादित्यलं बहुना अन्वयासंभवादिति तुल्यपदवाच्यसादृश्यस्य निपातातिरिक्तनामार्थ
त्वाभेदान्वयाभावादित्यर्थः चशब्द एवेति तथा च चशब्दस्य युगपदनेकार्थान्वयित्वरूपसमुच्चयार्थकतया तुल्य
पदार्थधर्मस्योभयान्वयो न तु तुल्यपदमहिम्नेति न श्रौतत्वापत्तिरित्यर्थः लोके श्रौतार्थत्वविभागमुपसंहरति
तस्मादिति उपमानादीनि प्रतियोगित्वानुयोगित्वेनार्थः इवाद्याविति चंद्र इव मुखमित्यादौ चंद्रस्य सादृश्यप्रतियो

अ.दी

३३

गित्वरूपोपमानत्वस्य मुखे च तदनुयोगित्वरूपोपमेयस्य नियमतः प्रतीतेः तथा च वक्ष्यद्बोध्यसादृश्यविशेषण
तापन्नपदार्थस्य नियमत उपमानत्वं तत्र श्रौतीति तदन्यत्रार्थीति भावः तुल्यार्थकवतिप्रत्ययप्रकृत्यर्थस्योपमानत्व
प्रतीतिनियमात्तत्रापि उपमायाः श्रौतत्वापत्तिरिति पत्तमतेऽपरितोषमुद्भावयन्नुक्तदपहाय चित्रमीमांसामत
माह दीक्षितास्तु सादृश्यं मुख्येति यद्यपि पदान्तरसमभिव्याहारे इवादिपदानामपि सादृश्यमुख्यविशेष्यकज्ञानज
नकत्वमस्तीदं सादृश्यतत्राश्रयत्वसंबंधेन मुखादिविशेषणतापन्नत्वेन मुख्यविशेष्यत्वाभावात् तथापि येषां
सादृश्यमात्रे शक्तिस्तत्र श्रौती येषां तु न इति तत्रार्थीति भावः वक्ष्यमाणयुक्त्या वतिप्रत्ययस्यापि सादृश्यमात्रश
क्तेः तया सादृश्यमुख्यविशेष्यकज्ञानजनकत्वमस्तीति तत्रापि श्रौतत्वं स्यात् एवं वतिप्रत्ययेनापि सादृश्यमनुयो
गित्वेनैव बोध्यते न तु सदृशाभेदेनेति श्रौतत्वं स्यादिति पक्षेनैवापरितोषेण दीक्षितपदस्यान्यपदस्य चोपादानं अ
नुयोगित्वेति चंद्र इवेत्यादौ चंद्रप्रतियोगिकसादृश्याश्रय इति बोधात् सदृशाभेदेति चंद्रतुल्यमित्यादौ चंद्रसाद
श्यवदभिन्नमिति बोधोदयात् तथा चैकत्र सादृश्यं विधेयं परत्र तु सदृशाभेद इति विधेयभेदादेव वैषम्यमित्येषामा
शयः प्राम्राप्रामेति न हि यावद्वाक्यार्थभासने तावदेव तात्पर्यं वाक्यभेदादिप्रसंगात् अपित्वप्राप्तमेव तदेव च वि
धेयं तदाहुः यत्परः शब्दः स शब्दार्थ इति अत एव दध्ना जुहोतीत्यादौ दध्यादिविशिष्टहोमादेः प्रतीतावपि धात्वर्थस्याप्रा

३३

होत्रं जुहोतीत्यादि नैव प्रामाण्यात् दध्यादि तत्पदं द्रव्यमेव विधेयं तया पर्यवस्यतीति गुणविधित्वव्यवहारो मीमांसकानां
एवमत्रापि सदृशाभिन्न इति प्रतीतावपि धर्म्यंशेन तात्पर्यं किं सादृश्यमात्र इति नैवमिवादितुल्यादीनां वैषम्यामि
तिभावः उपपन्नत्वेनेति प्रकृत्यर्थस्य प्रत्ययार्थे भेदान्वयव्युत्पत्तेः नन्वलक्षणयैतद्याहृतिनत्वस्य वतिप्रत्यया
र्थत्वकल्पनमेवयुक्तं नचात्र श्रौतत्वापत्तिरेव बाधिका प्रकारान्तरेण श्रौतत्वादिव्यवस्थायाः एवतावता कर्मसुवि
नत्वात् स्वकल्पितप्रयोजनानुरोधमात्रेण तदाश्रयणस्याशक्यत्वादित्यत आह उक्तरीत्येति समत्वादिति
यद्यपि वतिप्रत्ययविधायकशास्त्रस्य प्रकृते सत्त्वहृत्तित्वे लक्षणोत्पत्त्वं नो हत्वसमभिव्याहारात्तथापि तुल्यार्थस्य
हृत्तित्वातिरिक्तस्यैव प्रागेव व्यवस्थापितत्वात् तदर्थस्यैवतत्त्वेनालाभेन हृत्तित्वस्य तदर्थत्वकल्पनायां सत्त्ववि
रोधापत्तेरर्थतस्तत्संभवतिरायातीति इति भावः वत्यादीनां सदृशार्थकतया सादृश्यमात्रार्थकत्वेनास्तीत्यर्थी
तित्वउक्तव्यवस्थायामपि प्रकृते हृषणस्याग्रमूलएववाच्यत्वात् वतिप्रत्ययप्रकृत्यंशे लक्षणापि प्रामाणिकी
तिलक्षणांशे संमतिं दर्शयति अतएवेति यदाश्रानुशासनिकपदार्थशक्तिः कल्प्यते तदन्यत्र प्रकृतेरेवल
क्षणेत्यत्र संमतिराह अतएवेति एवं च यत्र सत्तं तत्र प्रमाणतया वाचनिकत्वेनापि समर्थपितुं शक्यस्य तत्र का
रप्रयोगस्यापि तत्रानुरोधेन लक्षणयैव समर्थनं तत्र का कथा परेषामिति भावः यद्यपि भाष्ये सर्वस्मादिवेतिकं

ग्र॰टी॰
३४

24

वतोनोक्तं तथापि पंचम्यंतसमनुशब्दसमभिव्याहारात् वतिप्रत्ययप्रकृतिसमर्थकपूर्वशब्दस्य पंचम्यंतत्वस्पष्टमेव
किमिदं पूर्वग्रहणं सनपेक्षं प्राक्सनो येभ्य आत्मनेपदमुक्तं तेभ्यः सन्नन्तेभ्योपि भवतीति आहोस्वित् योगापेक्षं प्रा
गस्माद्योगाद्येभ्य आत्मनेपदमुक्तं तेभ्यः सन्नन्तेभ्योपि भवतीति आहोस्वित् योगापेक्षं प्रागस्माद्योगाद्येभ्य आत्मने
पदमुक्तं तेभ्यः सन्नन्तेभ्योपि भवतीति भाष्येपि येभ्य इति पंचम्यंतेन तदर्थविवरणात् भाष्येपि पंचम्यंतत्वव्या
ख्यानमित्याशंकायां उक्तं कैयटग्रंथावतारणात् दर्शनगत्या परिकल्पितभाष्यवाक्यस्य पूर्वस्मादिवेत्यनुभवाद् इति
ध्येयां तुल्यार्थे इत्यादिमूलोपन्यस्तकैयटग्रंथादव्यवहितपूर्वमेव हि कैयटः प्राह पदद्वयेपि तेन तुल्यमि
ति तृतीयांतादिति : ननु पंचम्यंतात् लक्षणाभावादिति पदद्वयेपीति पूर्वपदस्य संबंधिकत्वात् पूर्वत्वं स
प्तम्यापेक्षया योगापेक्षयो वेति भाष्योक्तेरित्यर्थः पंचम्यंतादपि वतिः कुतो न स्यादत आह लक्षणेति तृ
तीयांतादेव वतेर्विधानेन पंचम्यंतात् तदनुशासनविरहात् नन्वेवं पंचम्यंतादपि वतिः कुतो न स्याद्रुतसामानाधि
करणमनुपपन्नं स्यादत आह तृतीयार्थेति अंतर्भावयतीति नमहि भक्त्यार्थे प्रकृतेर्लक्षणास्वीकारादित्यर्थः ननु
ब्राह्मणपादानकाध्ययनस्य कुतो लाभ इत्याशंकाभिप्रायं विशदयति तत्रचेति ब्राह्मणपादानकाध्ययन इत्यर्थः व
र्तनेति ब्राह्मणपदस्य स्वार्थोपादानकाध्ययने लक्षणया तत्परत्वादिति कैयटस्यार्थः ननु तुल्यार्थविहितवतिप्रयो

गेपि श्रोतीस्यात् तत्रापि निरुक्तदोषव्यपदेन विवरणादर्शनादिति श्रोतात्माशंकामसंगातिराकरोति यत्विति प्रथमान्तादि
ति षष्ठीसप्तम्योश्चात्रानुपप 'त्तानाहशवतेरनंगीकारात् इवार्थकवतिप्रत्ययेश्रौतत्वेइष्टापत्तेश्चेतिभावः एत
त्वेतत्वार्थकवतिप्रयोगेश्रौतत्वमापादयतापरेणसादृश्यार्थकपदप्रयोगेश्रौतीसदृशार्थकपदप्रयोगे
त्वार्थीतिसोक्ताव्यवस्थानिर्दोषेत्यभिमतं ग्रन्तः स्वपदेदोषं परिहृत्य परपदेन मङ्गावयति किंचेति नामार्थता
भावादिति तद्धितान्तस्य नामत्वेपि तद्धितमात्रस्य नामार्थत्वाभावादितिभावः वस्तुतस्तु वत्यर्थसादृश्यस्य नामा
र्थत्वाभावादितिभावः वस्तुतस्तु वत्यर्थसादृश्यस्य नामार्थत्वेपि तद्धितस्याप्यसर्वविभक्तिरिति सूत्रात्तस्याव्ययत्वेन नि
पातातिरिक्तनामार्थत्वाभावात् भेदान्वयोपपत्तिरित्यत्र तात्पर्यं निपातातिरिक्तेत्यत्र निपातपदस्याऽव्ययमात्रपर
त्वात् अतएवाव्ययनिपातातिरिक्तेष्वपि केचित्तत्र तत्र लिखन्तयेवति इवार्थविहितवतिप्रत्ययस्य सादृश्यमा
त्रार्थत्वस्वीकुर्वतात्वया पित दर्थस्याश्रयत्वेन मुख्यान्वयस्यानुमतत्वात् भेदान्वयानुपपत्ति तत्सादिपदानां सादृ
श्यमात्रपरत्वेनस्याश्रयतया उपमेयान्वयोनस्यादित्यनस्तत्र सादृश्यवदर्थकत्वं वतिप्रत्ययार्थसादृश्यस्तु निपा
तरूपनामार्थत्वेनाश्रयतया मुख्यान्वयः स्यादेवेति धर्मिपरत्वकल्पनबीजाभूतानुपपत्तिरत्रनास्तीति कुतः
सादृश्यवत्परत्वं वतिप्रत्ययस्य येन तावन्मात्रेण तत्र तदभिमताश्रौतीत्वव्यवस्था स्यादितिभावः निर्मूलेति नहि

अ.टी.
३५
35

तुल्यपदवतिप्रत्यययोरर्थवैषम्येन तदर्थविहितत्वमात्रेणार्थीत्यत्र किंचित्प्रमाणमस्तीत्यर्थः समालंबितेति तुल्यार्थे
विहितस्य वतेस्तत्समानार्थकतायाः अनुशासनसमन्वत्वादित्यर्थः वस्तुतस्तु तत्पदे तुल्यार्थवतिप्रत्यययोगेश्रो
तीति न संभवति तस्य धर्ममात्रपरत्वात् धर्म्यंशपरत्वे वा गौरवात् अत एव वद्वायप्यान्तेष्वेवं साम्येऽस्तमरः वदि
ति वतिप्रत्ययमात्रस्य ग्रहणं अविशेषादित्यर्थः तुल्यार्थेति विशेषानादरणात् रायमुकुटादौ वद्वेति पाठोपप्या
सेष स्वलीरत्नाभ्याघभियुक्तसंमतत्वात् यत्तुहरदेविद्विवचनं प्रशस्तमिति तत्त्वेशाहकौस्तुभे मनोरमायां च भट्टोजिदीक्षि
तैः कृतं प्रातिपदिकप्रकृतिकेवदितस्य वतेरननुशासनत्वादिति तद्रूपेऽत्यं यथादिशब्दानामपि नहि नत्वाविशेषादनुपा
दानापत्तेः अव्ययत्वस्य वतावप्यविशेषात् यत्नावीस्तु विशेषः घ्यालप्रत्ययस्य प्रकृतिविशेषनियतत्वेन यथा
तत्पेति समकृतिकस्यैवोपादानं वतेस्तु प्रकृतिविशेषनियमाभावात्केवलस्यैव तदिति अत एव व्याख्यानवाद
शिरोमणिविवरणे धात्वर्थप्रातिपदिकार्थयोः साक्षाद्भेदान्वयो नास्तीति तत्कार्यकारणभावविचारावसरे
अत्र प्रातिपदिकमव्ययातिरिक्तत्वेन विशेष्यं इति प्रकम्य अत एव तत्त्वानवदित्यादावपि वत्यर्थस्य धात्वर्थानु
योगिप्रतियोगिकतया साक्षात् अन्वयो नानुपपन्न इति मिथुरानाथमहाचार्यैरभिहितं इत्यहितमानेन तुल्येति तु
ल्यार्थ एव वतिरिति तदर्थस्य प्रतियोगित्वादिना धात्वर्थान्वयाभिधानात् सादृश्यस्यैव तदर्थत्वमभिमतं सह

३५

शार्थत्वेन तस्य तादात्म्यसंबंधेनैव रक्तान्वयोपपत्त्या अनुयोगित्वस्य तत्संबंधत्वकल्पनानुपपत्तेः तत्पादिपदानां तु भेदान्व
यानुपपत्त्यैव धर्मिपरत्वकल्पनं तस्य न्याय्यत्वात् अतएव तिप्रत्ययेन व्यक्तित्वानयोः साहस्यमभिनीयते इति लीलावत्
पाये सामान्यप्रकरणे एकव्यक्तिवदिति मूलव्याख्यावसरे वर्द्धमानचरणैरुक्तं अतः कथं साहस्यार्थकवत्तायुपमा
या आर्थत्वं स्यात् अस्मन्मते तु चेद्रहति तस्य वृत्तिप्रत्ययार्थत्वाभावेपि धर्ममात्रपरत्वेन तस्य यथोक्तविरोधाभा
वात् वृत्तित्वस्य वतिप्रत्ययार्थत्व बहिर्भावस्तु तत्पार्थे तद्विधानानुरोधादिति यथोक्तरीत्यैव श्रौतार्थत्वविभागो
निरवद्य इत्याशयवानुपसंहरति दिगिति मीमांसकैः साहस्यस्यातिरिक्तपदार्थत्वस्वीकारात्तन्मतेन विचारयि
तुमुपन्यस्यति केचिदिति स्यादृश्यमिति साहस्यपदेनाभिलप्यमानमित्यर्थः पदार्थान्तरमिति तद्गतधर्मद्व
द्विकंग्यंतरातिरिक्तं समानियोगिकभावमित्यर्थः एव देशाइति सुंदरपदस्य सौंदर्यवदर्थकत्वात् ननु पदार्थः प
दार्थेनेति व्युत्पत्तेर्घटपदशक्यत्वादेर्घटत्वनिष्ठप्रकारतानिरूपितकर्मत्वीयविशेष्यताशालित्वानवारणाय पदार्थनिष्ठ
विशेष्यतानिरूपितप्रकारतयान्वयबोधं प्रति विशेष्यतासंबंधेन पदजन्योपस्थितेर्हेतुत्वमिति कल्पनत्वात् कथं प
दार्थतदेकदेशान्वय इत्यत आह चैत्रस्येति स्वजन्यपुरुषजन्यपुरुषस्य नप्तृपदार्थत्वात् तदेकदेशे जन्ये चैत्रस्या
न्वयाभ्युपगमात् विशेष्यपुरुषे तदन्वये चैत्रपुत्रेपि चैत्रस्य नप्तेति प्रयोगप्रसंगात् स्वपितृजन्यचैत्ररूपपुरुषमन्य

अ॰ती॰
३६
36

त्वस्य तन्त्रेऽसत्त्वात् अत उक्तरीत्या चैवसंबंधिजन्यत्वाश्रयपुरुषजन्यपुरुष इति तत्र बोध इति भावः अथ तत्र जन्यत्वे पुरुषे
च तत्पदस्यदेपवशक्तीलाघवात् तत्र चैत्रस्य जन्यत्वेन तस्य पुरुषे तस्य पुनर्जन्यत्वेन तस्य च पुनः पुरुषेन्वय इति यथा
क्रमिद्धेः तत्र जन्यत्वस्य पदार्थैकदेशत्वाभावात् पदार्थ एव तदन्वय इत्यत आह इत्यादाविति चैत्रादन्य इत्यादावित्यर्थः
अन्यपदस्य भेदवत्येव शक्तेस्तदेकदेशे भेदे प्रतियोगितया चैत्रादेरन्वयः न चात्रापि भेदे आश्रये च शक्तिद्वयमेवेति
वाच्यं भेदप्रकारेणैवात्रानुभवेन आश्रयत्वप्रकारकानुभावाभावात् अत एव भिन्नपदादन्यपदस्य विशेषः भेदा
श्रययोः क्रमेण प्रकृतिप्रत्ययार्थतया भिन्नपदस्य भेदाश्रयपरत्वादन्यपदस्य च भेदविशिष्टपरत्वात् अत एवाव
यवदीधितौ इतरभेदानुमानस्थले इतराणि न इतरेभ्यो भिन्नानि इतरेभ्यो भिद्यंते इतरेभ्योऽन्यानि चेति प्रतिज्ञा च
तुष्टयमुपन्यस्तं अत्र प्रथमपदे भेद एव पदे प्रकारः आश्रयत्वं संसर्गः तत्र अर्थभेदस्यानुयोगित्वसंबंधेन पदा
न्वयात् द्वितीये निष्ठार्थस्याश्रयस्य भेदाश्रयत्वेन रूपेणोभेदो भासते तृतीये आख्यातार्थस्याश्रयत्वस्य साक्षान्नाम
र्थे प्रकारत्वं धात्वर्थनामार्थयोः साक्षादन्वयबोधे न प्रकारीभूतविभक्त्यर्थोपस्थितेरावश्यकत्वात् चतुर्थे इतरभे
दप्रकारेणैतादृशभेदवदभेदो भासत इति अन्यभिन्नपदयोर्विशेषस्य व्याख्यातत्वात् समुदायस्येति अस्त्यमितप
दपदार्थविभागस्यारविंदसुंदरमितिसमासवाक्यस्येत्यर्थः एक इति वैयाकरणमतानुयायिन इत्यर्थः तैः समा

३६

सेविशिष्टशक्तिस्वीकारात् सुंदरपदमुपलक्षणं सुंदरपदस्यैवतावानर्थः अरविंदपदंतात्पर्यग्राहकमित्यपिवो
ध्यं ननुमास्तुअत्रवाचकलुप्तत्वमित्यतआह सिद्धान्तेति उपमानस्यसाधारणधर्मेणसहसमासस्यलुप्तवत्समा
सेवाचकलुप्तोपमायाः सर्वैर्ग्रन्थकारैरुदाहृतत्वात् सादृश्यपार्थकेति येनयत्रैवसादृश्यलक्षणास्वीक्रियते तन्म
तेतत्पदस्यैवसादृश्यपार्थकत्वात्तस्यचसुघमाणत्वात् वाचकपदस्यचबोधकमात्रपरत्वादितिभावः मुख्यवा
चकत्वमादायशंकते नचेति तथाचसादृश्यपार्थकपदसत्वेपितस्यलाक्षणिकतयावाचकलुप्तत्वमव्याहतमे
वेत्यर्थः अभिप्रायमाह वाचकत्वंहीति गौरवादिति वृत्तित्वस्यसामान्यरूपतयातदपेक्षयाशक्तेर्विशेषत्व
निवंधनादित्याशयः तमनाकलय्यन्त्वरूपगौरवंतत्रोद्भावयति नचहीति स्वाभिप्रायंविशदयति शक्ति
जन्येत्यादिना अतएवाह शक्तिनिवेशइति तथाचस्वरूपलाघवापेक्षयासंख्याकृतलाघवमेवबलीयइतिवृत्ति
त्वनिवेशएवयुक्तोविशेषनिवेशप्रयोजनाभावादित्यर्थः चमत्कारेति यद्यप्येवंइवादितुल्यादिपदभेदेनाप्यु
पमाविभागोनस्याद्विजातीयचमत्कारस्यतत्राप्यनुदयात् तथापिसादृश्यपार्थकशब्दभेदादिनैवउपमाविभागे
नतद्वृत्तिभेदेनेत्यत्रतात्पर्यम् नचयन्मतेतुल्यादीनांसादृश्यलक्षणत्वापत्तौइवादीनांतुसादृश्येशक्तिरितिप्रो
क्तेतिविभागस्तद्वृत्तिभेदेनाप्युपमाविभागोऽस्त्येवेतिवाच्यं वृत्तिभेदेनलुप्तत्वादिविभागोनास्तीत्यत्रतात्पर्यात् ॥

प्र.टी.
३८
37

ननु तत्रैवायं विवाद इति कथमेतदित्यत आह अन्यथेति सादृश्येऽपि लक्षणास्थलेऽपि वाचकलुप्तत्वस्वीकारे इत्यर्थः वतिप्रत
यादेरिति आदिपदात्तुल्यादिपदसंग्रहः तथा च चंद्र इव तुल्यं मुखमित्यादावपि वाचकलुप्तत्वापत्तिरित्यर्थः श
क्त्यभावादिति अन्यथा तत्रापि श्रौतत्वापत्तौ तत्सिद्धान्तभंगापत्तेरित्यर्थः शक्तिलक्षणान्यतरेति धर्मिण्येव श
क्तिस्वीकारेण सादृश्यरूपधर्मे शक्तेर्विरहः स्पष्ट एव तत एव सादृश्यबोधोपपत्तौ लक्षणाया अपि तत्र वि
रह एव विशिष्टशक्तिपदानां विशेषणबोधार्थं तत्र लक्षणानंगीकारात् सादृश्यशक्त्या श्रौतत्वं तल्लक्ष
णया चार्थत्वमिति विभागस्य च त्वयानभ्युपगमात् येन ममेव तदर्थत्वापि लक्षणास्यादिति भावः नहिव
षयतेति तथा च तत्र शक्त्यभावेऽपि सदृशबोधस्य सादृश्यविषयितानियमात् तज्जनकत्वमस्यैवेति न वाचक
लुप्तत्वापत्तिरित्यर्थः ननु तत्र वाचकलुप्तत्वे इष्टापत्तिरित्याशंक्य तत्रापसिद्धान्तमुद्भावयति अत एवेति
उपमानलोपाभावादिति वाचकलोपाभावादित्यपि द्रष्टव्यं तथा च लक्षणायां लुप्तत्वाभ्युपगमे तत्र वाच
कोपमानोभयलुप्तत्वापत्तिरिति तद्विरोध इति भावः ननु तत्रापि त्रिलुप्तत्वे इष्टापत्तिरेवेति रसगंगाध
रोक्तिमनुवदति यद्यपीति अप्रसिद्धेश्चेति स्वेतरबोधकत्वस्येति शेषः तामेव दर्शयति उपमानादीति च
न्द्रत्वेति चंद्रत्वप्रकारकचंद्रविशेष्यकसमवायादिसंसर्गकत्वानवच्छिन्नचंद्रपदशक्तिज्ञानकार्यतावच्छेदकत्वा

३८

भ्युपगमात् ग्रथस्येति स्वंउपमानादि तद्विषयकत्वाभाववत्घटादिज्ञानं तद्व्यक्ति विषयिताकान्यत् ज्ञानं चंद्रा
दिज्ञानं तज्जनकत्वंचंद्रादिपदानामस्त्येव चंद्रत्वादेरधिकस्याभानेपिचंद्रादिविषयकत्वस्यापितत्रसत्वादधिकाभि
तिव्याप्यादितिभावः एवंसतिप्रकृतेपिस्वतन्त्रबोधकत्वंननिवेश्यत इत्यत आह नहीति इतरबोधकत्वेपिसा
दृश्यबोधकत्वस्यापिसत्वादित्यर्थः ननुउपमानविषयकत्वव्यापकविषयताप्रतियोगिशाब्दबोधविषय
त्वमेवविवक्षितं चंद्रादिपदजन्यशाब्दबोधस्यचंद्रत्वादिविषयकत्वनियमात् सादृश्यादिकंतुनतज्ज्ञानवि
षयत्वनियतमित्यस्वरसाद्दोषान्तरमाह किंचेति चन्द्रसीमिति यथासादृश्यादिमात्रार्थकपदाभावान्नत्रवि
लुप्ता तथोपमेयमात्रार्थकपदाभावादुपमेयलुप्तापीतिचतलुप्तापितत्रोपमास्यात् नचेष्टापत्तिः त्वया
पितस्याअनभ्युपगमात् ग्रंथान्तरविरोधमाह अपिचेति ग्रंथान्तरविरोधस्यतथाहृषणत्वाभावात्तद्
ध्यविरोधमेवाह किंचेति नचार्थत्वेपिवाचकलुप्तत्वंतत्रकुतोनभवतीतिवाच्यं लुप्तोपमायांतस्यपरिग
णनापत्तेः तेनाप्यपरिगणनाच्च तस्मादरविंदसुंदरमित्यादौसमासवशात्प्रयुज्यमानेपीवशब्दं
स्मरतएवसादृश्यंबोधयतीत्येवालंकारिकाणामाशयः तदनभिज्ञस्यसादृश्यप्रत्ययस्त्वसिद्धएव उपमा
चेयंश्रौत्यार्थीवेत्यत्रविद्वांसएवमाने अरविंदवत्सुंदरमितितल्यार्थकवतिप्रत्ययेनापितदर्थोक्तेरेवदर्शनात्

ग्र.टी.
३८

वस्तुतस्तु शस्त्रीश्यामेति भगवतां महाभाष्यकाराणां उपमानानि सामान्यवचनैरिति सूत्रे प्रयोगाणां बहुल
मुपलंभात् तदनुरोधेनैव निर्णयो युक्त इति सहृदयैर्विचारणीयं वैयाकरणास्तु पूर्वपदं तदर्थसदृशे लाक्ष
णिकमिति सूचयितुमेव विग्रहवाक्ये इवशब्दस्य प्रयोगस्तत्र मृगीव चपला मृगचपलेति सामानाधिकर
ण्यनिमित्तः पुंवद्भावश्चान्यथा; तदेतत्सर्वं ध्वनयन्नाह दिगिति रसगंगाधरोक्तं बोधांतरमपि विचारयति
यद्वेति निरूपितत्वेति निपातार्थनामार्थयोर्भेदेनापि साक्षादन्वयाभ्युपगमात् प्रकारतेति निपा
तार्थधात्वर्थयोः प्रकारीभूतविभक्त्यर्थोपस्थितिं विनापि साक्षादेव भेदान्वयस्य न कलंजं भक्षयेदित्यादौ
व्युत्पन्नत्वात् धात्वर्थ इति भाधातोर्ज्ञानार्थत्वस्यापि प्रसिद्धेः तदुत्तराख्यातस्य तु विशेष्यत्वमर्थः तदाह
धीविशेष्य इति अन्यत्केचोक्तमेव अन्वय इति तृतीयार्थप्रयोज्यत्वस्येति शेषः बोधद्वयं तन्त्रेणादर्शयति
तेनेति अत्र प्रयोज्यत्वस्य धीपदार्थेन समन्वये प्राप्यः सादृश्येनान्वये द्वितीयो बोध इति विशेषः प्रकारत
येति सादृश्यनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन सादृश्यान्वयबोधं प्रतीत्यर्थः लाघवमेव दर्श
यति अरविंदमिवेति तथा च तत्र इवार्थसादृश्यप्रकारकबोधे मुखादिरूपोपमेयार्थकपदजन्योप
स्थितिर्हेतुरिति हेतुहेतुमद्भावस्य त्वयाप्यवश्यं कल्पनीयत्वात् अरविंदमिव मुखं भातीत्यत्रापि सादृश्य

३८

स्यमुख्यत्वेपदार्थान्वयोयुक्तोनन्वधात्वर्थेज्ञानइतिभावः ननुत्वदुक्तरीत्यासादृश्यस्यसौंदर्यप्रयोज्यत्वेनलभ्येतेतत्रप्रादृ
सादृश्यप्रयोजकेति मानसेनेति तथाचतादृशस्थलेसादृश्यनिष्ठसौंदर्यप्रयोज्यत्वज्ञानस्यशाब्दत्वमसिद्धमे
वेत्यर्थः नचेति नञ्इवार्थसादृश्यप्रतियोगिनासंबंधेननञर्थाभावान्वयात् अभावस्यचविशेषणतयामुख्या
न्वयात् चंद्रप्रतियोगिकसादृश्याभाववन्मुखमितिबोधोदयात् क्वचित्सादृश्यस्योपमेयभिन्नेपिविशेषण
त्वदृष्टमेवेतिभावः प्रतियोगित्वेति तथाचप्रतियोगितातिरिक्तसंबंधेनसादृश्यप्रकारकशाब्दत्वंकार्यता
वच्छेदकंकल्प्यते अभावेचप्रतियोगित्वसंसर्गेणैवसादृश्यप्रकारकबोधोदयान्नव्यभिचारः प्रकारतासंबंधस्य
तुतदतिरिक्तत्वेनसादृश्यस्यतेनसंबंधेनधात्वर्थान्वयेव्यभिचारःस्यादेवेतिभावः नन्वेवमपिचंद्रसादृश्यवा
न्कालइत्यत्रकालिकसंबंधेनसादृश्यप्रकारकबोधेव्यभिचारइतिचेत् सत्यं इवपदजन्योपस्थितिविषयसा
दृश्यप्रकारकशाब्दत्वस्यकार्यतावच्छेदकत्वोपगमात् अत्रचसादृश्यस्यइवपदजन्योपस्थितिविषयत्वविर
हात् कालिकविशेषणताविवक्षायांचंद्रइवकालइतिशब्दस्त्वनप्रयुज्यतएव तादृशसादृश्यस्यानुयोगि
नाविशेषसंबंधेनैवान्वयनियमात् यथारजतत्वस्यकालिकविशेषणतयाकालेगृहेपिकालोरजतत्ववा
नितिरजतत्वेनरूपेणरजतत्ववत्तावगाहिबोधजनकएवशब्दः प्रयुज्यते ननुरजतत्वांशेनिरवच्छिन्नप्र

व्यु.टी.
३५
39

कारताकबोधजनकः कालोरजतमित्यादिरपि रजतशब्दशक्त्यारजतत्वांशे समवायस्यैव संसर्गतयानिवेशा
त् तथाप्रकृतेपि नन्वेवं चेद् सादृश्यं मुखं वहतीत्यत्र सादृश्यस्य प्रकारतयान्वयबोधविरहाद्व्यभिचारसमानम
नुपपन्नं तत्र तस्य इवपदार्थत्वाभावादेव तच्छक्यानुदयादिति चेत् सत्य तस्य यथाश्रुतपरत्वात् परंतु प्रकार
कत्वमनिवेश्य सादृश्यविषयकान्वयबोधत्वमात्रस्य कार्यतावच्छेदकत्वोपगमे चंद्रादिपदस्यापि प्रतियोगित
यातदन्वयित्वात् सादृश्यविषयकान्वयबोधत्वावच्छिन्नस्य तत्राप्युपजायमानत्वात् तस्य तदनुयोगित्वाभावे
व्यभिचारः स्यात् अतः सादृश्यस्य प्रकारकत्वं कार्यतावच्छेदके निवेशितमित्यत्रैव तात्पर्यं व्यभिचारापत्तेरिति
तदनुयोग्युपस्थापकपदजन्योपस्थितिं विनापि तत्र इवार्थसादृश्यप्रकारकबोधत्वावच्छिन्नोत्पत्तेः ननु तदनुयो
ग्युपस्थापकपदयातुपत तदन्यतरजन्योपस्थितेरेव तत्र हेतुत्वं कल्प्यतामत आह नादृशेति ज्ञानाभावेपीति मु
खत्वानसत्वेचत्वपि दृष्टव्यं ज्ञानेलाभादिति उक्तस्थले च सादृश्यप्रकारज्ञानाभावात्तद्बोधकशब्दप्रयोगइत्य
र्थः रूपांतरेणेति इवत्वादिनेत्यर्थः प्रकारत्वेति तृतीयारूपेत्यर्थः तज्ज्ञाने मुखत्वादेः प्रकारत्वेनउल्लेखाय
तद्विषयकशाब्देपि मुखत्वेन मुखं जानातीत्येव प्रयोगः स्यात् मुखत्वेन मुखं भातीत्यत्र यथा ज्ञाने मुखत्वप्र
कारकत्वं लभ्यते नैवं मुखत्ववन्मुखं भातीत्यत्र तत्र वस्तुतो मुखत्ववत्तायां मुखपदान्वयादिति भावः अतएवेति

तादृशशाब्दे नैवेत्रं निरुक्तज्ञानेन मुख्यत्वप्रकारकत्वानुल्लेखादित्यर्थः वस्तुत इति स्वोल्लेखज्ञानस्य सादृश्यप्रकारकत्वा
भावदर्शनमात्रार्थं नतु ज्ञानस्वरूपानिर्गमनमित्यवधेयं वाक्यार्थेति वाक्यप्रयोगहेतुभूतशाब्दबोधसमानविष
यकज्ञानेनान्यविषयातादृशप्रयोगेन बोधस्य हेतुत्वात् अतएव ईदृशस्थले ज्ञानस्य सादृश्यप्रकारकत्वलाभाद
प्रज्ञापितत्वैवस्यादिति न भ्रमित्वमित्यर्थः व्यभिचारेणेति रजतत्वप्रकारकधीविशेष्यत्वनायांशुक्तौर
जतत्वाभावादित्यर्थः प्रमेति नहृत्वं विनान तद्विषयस्य तत्प्रकारकप्रमाविशेष्यत्वानुपपत्तेः तदभाववति त
त्प्रकारकज्ञानत्वस्य भ्रमत्वनियमादित्यर्थः कुमुदमिति तत्र दृष्टोपमेयालंकारिकसंप्रदायादित्यर्थः त
थापि तत्र सादृश्यमस्त्येवेत्यत आह प्रमायाइति ज्ञानमात्रस्यैव वाच्यत्वर्थत्वात् लक्षणायां च गौरवान्माना
भावाच्चेत्यर्थः ननु तत्प्रकारकधीविशेष्यत्वस्य तत्त्वव्यभिचारेपि अरविंदसादृश्यप्रकारकधीविशेष्यत्वशा
ब्दबोधानन्तरं अरविंदसदृशं मुखमिति ज्ञानेनानरोत्पन्नत्वेन किं बाधकं नत्वत्र मुखं अरविंदसादृश्यवत् तत्प्रका
रकधीविशेष्यत्वादित्यनुमानविषयाअरविंदसदृशत्वं मुखेग्राह्यं येन तत्र व्यभिचारित्वानं विरोधिस्यात् किं
तु मानसमेव तादृशज्ञानमपेक्षितं तत्र च तद्विषयता प्रमाणांपदार्थानांउपस्थितिमात्रमपेक्ष्यते तच्चास्त्येव
अरविंदसादृश्यमुखयोः शाब्दद्वैताभासमानत्वात् अतस्तादृशशाब्दबोधोत्तरमरविंदसादृश्यप्रकारकमुख

अ॰टी॰
८॰

विशेष्यकमानसे तामसेवाधकाभावात्कथमेवं संगच्छत इति चेत् सत्यं नियतप्रतीतिर्निःस्यादित्यत्र तात्पर्यात् अनुमाने
न तदुपपादनेनोक्तव्यभिचारज्ञानसत्त्वेन तदसंभवात् नचैवमिति नत्वमुक्तानुवादेन साहश्यस्य विधेयत्वे न वा
धादित्याशयः स्वप्रकारकेति स्वपदं साहश्यपरं एवं च साहश्यस्य विधेयत्वानुभवो रहितो भवतीति
भावः नन्वेवं भातीत्यनन्वितं स्यादित्यत्राह यातो रिति ननु पूर्वमनुयोगिताविशेषसंबंधेनैवउ
पमेये साहश्यान्वयो व्यवस्थापित स्तत्कथं स्वप्रकारकज्ञानविषयत्वसंसर्गेण मुखेन्दन्वयं उच्यते
कालिकाविशेषतावाहन्नेरेवनेन विवक्षितत्वात् नचैवं चंद्रस्येत्यादावपि उक्तसंबंधेन साहश्यप्रकारक
ज्ञानापत्तिरिति वाच्यं भातीत्यादिसमभिव्याहाररूपतात्पर्यग्राहकाभावात् अथैवमपि अरविंदसह
शं नेवेत्यादिसंशयनिवृत्तिरुक्तग्राहवाधात्र स्यात् इति चेत् त्वापितत्सामग्र्यात् अरविंदसाहश्यप्र
कारकधीविशेष्यत्वप्रकारकज्ञानस्यापि ताहशसंशयप्रत्यविरोधित्वात् नच यत्रारविंदमिव भा
तीत्युपमेयार्थकपदरहितमेव वाक्यं प्रयुक्तं तत्र तस्य पदजन्योपस्थितेरभावेन साहश्यस्यानुयोगि
त्वेनान्वयासंभवात्तत्र प्रकारतासंबंधेन तस्य थालवर्थे ज्ञानएवान्वयो वक्तव्य इति वाच्यं तत्रापित
दध्याहारादेवश्यकत्वात् साहश्यस्य प्रतियोग्यनुयोग्युभयनिरूपणं विना निरूपयितुमशक्यत्वा

त् अन्यथाऽऽख्यातार्थविशेष्यत्वस्यापि प्रमाणं न पदोपस्थाप्यरूपविशेष्याभावेनान्वयापत्तेः तदेतत्सर्वं ध्वनय
न्नाह दिगिति सादृश्यस्य धात्वर्थतयान्वयस्वीकारे दूषणान्तरमप्याह अनयैवेति नानुपेति उपमेयस्य पुं
लिंगतयान्वय इत्यस्यापि तथात्वापत्तेः मुखपदस्य नपुंसकत्वात् तत्तुल्यपदस्य क्लीवत्वाविशेषकत्वा
त् तत्र क्रियाविशेषणत्वप्रयुक्तक्लीवत्वापादने इष्टापादनमेव स्यादित्यत उक्तं पुंस्त्वसंपादनार्थं विवक्ष
तमुक्तं इदं च प्रसिद्धाभिप्रायेण हस्त्यादेः सहजपुंलिंगस्य सत्त्वात् ननु तत्रापि सादृश्यस्य प्रकार
त्वसंबंधेन तत्तानपदार्थान्वयो भविष्यतीत्याशंक्याह तन्मत इति भेदेनेति अभेदातिरिक्तसंबंधेन निपाता
तिरिक्तनामार्थप्रकारकबोधे विभक्तिजन्योपस्थितेर्हेतुत्वात् तत्तानस्य च धात्वर्थेनान्वयोक्तहेतुत्वाभावा
दभेदान्वयेन सादृश्याभिन्नत्वानेति बोधः स्यात् स चायोग्यतापराहत एवेति भावः लक्षणेति तथा च
सादृश्यप्रकारकस्य नामार्थत्वे तस्याऽभेदेन तत्तानान्वयः स्तोकं पचतीत्यादौ नामार्थधात्वर्थयोरभेदान्व
यस्य व्युत्पन्नत्वात् संकोच इति क्रियाविशेषणानां नपुंसकत्वस्य वाचनिकत्वादित्यर्थः तद्वचनं
उक्तरूपं तत्रापि दृश्यत इति वेत्यत्रादेत्तत् ननु क्रियाविशेषणानां कर्मत्वं तावत्साधु प्रसिद्धमेव न
त्ववाचनिकं स्तोकं पचतीत्यत्र पाकं करोतीति द्वितीयान्तपाकपदेन धात्वर्थविवरणात् द्विशेषणत

अ॰टी॰
५१

यातत्सामानाधिकरण्येन स्तोकस्याधिकर्मतायाएवौचितत्वात् अत एव यजेतेत्यत्र विधिवलेन यागत्वर्थस्य कर
णत्वावगमात् तत्र तद्विशेषणेन याज्योतिष्टोमेनेति तृतीयैवेति वैयाकरणमतमभिसंधायदोषांतरमाह
अपिचेति नवत्विति अरविंदतुल्यं भातीत्यत्र सादृश्यस्य प्रकारत्वसंबंधे ज्ञानान्वयानुपपत्त्या तुल्यपदस्य तुल्य
त्वप्रकारिकलक्षणोपगतत्वात् तुल्यत्वप्रकारकविशेषणतया अभेदस्य संसर्गतया ज्ञानं विशेष्यतया भासते अ
रविंदवज्जानीत्यत्र तु सादृश्यलक्षणास्वीकारेपि तस्य वतिप्रत्ययार्थतया निपातातिरिक्तनामार्थत्वाभावेन तत
स्य प्रकारत्वसंबंधेन ज्ञानान्वयः संभवत्येव सादृश्यं विशेषणतया प्रकारत्वं च संसर्गतया ज्ञानं च विशेष्यत
याप्रतीयते तत्र च विशेषणांशे संसर्गांशे च विषयभेदावगतिरिति भावः वतिप्रत्ययपर्यंतानुधावनं च तत्स्या
र्थविहितत्वात्तत्समानविषयकबोधस्यैवौचितत्वादिति ध्येयम् अरविंदमिव भातीत्यनेनापि सहवैषम्यं
ज्ञेयमेव इवादौ सादृश्यं प्राश्रयत्वसंबंधेन तुल्यादौ तु तद्वानभेदसंबंधेन उपमेयेन्वीयत इति वैषम्यांगीकारे
पि अरविंदमिव भाति अरविंदतुल्यं भातीति द्वयोरुक्तरीत्या वैषम्यांगीकारे प्रमाणाभावात् एतावन्मात्र
स्यापि तथा दोषत्वाभावात्साह अरविंदेति अरविंदतुल्यत्वप्रकारत्वप्रकारकज्ञानाभाववज्ज्ञानस्यारविंदतुल्य
त्वप्रकारकज्ञानज्ञानं प्रत्यविरोधित्वादित्यर्थः क्रियाविशेषणत्वयुक्तम्जीवनत्वपरिहारार्थं केषांचित्कल्पनां

५१

सिंहावलोकितन्यायेन दूषयितुमनुवक्ति यदपीति तात्पर्येति तथा च क्रियाविशेषणतामिति नपुंसकत्वा
पत्तिरिति दोषाभाव इति भावः ननु तथैव परिभाषाकरणे दोषाभावः किंच सादृश्यमात्रस्य धात्वर्थत्वाभा
वात्पूर्वोक्तमप्ययार्थत्वमव्याहतमेवेत्यत आह किंचेति तथापीति क्रियाविशेषणतात्पर्यग्राहकत्वेपीत्यर्थः
तदाहेति यदि तुल्यपदं क्रियाविशेषणं तदा तत्वेन क्लीबत्वापत्तिः यदि तात्पर्यग्राहकमात्रं तदापि पुंलिंग
विशेषणत्वाभावेन तदापत्तिः लिंगविशेषाविवक्षायां नपुंसकमेव प्रयुज्यत इति सामान्ये नपुंसकमिति म
हाभाष्यकारादिभिर्व्यवस्थापितत्वात् तदाह सामान्येइति तथा च विशेषानिश्चये व्यभिचारो भवति किमस्य जात
स्त्रीपुमान्वेत्यादि अतस्तुल्यपदस्यैव सादृश्यादिकमर्थः तस्य च प्रयोगादावन्वय इत्येव युक्तमित्यर्थः अपि च
पूर्वोक्तविषयवैषम्यरूपदोषोऽप्यवसेयः तथाहि सादृश्यप्रकारकत्वेन लक्षणाभ्युपगमे प्रकारे कृति
संसर्गोल्लेखो विशेषणं वा आद्ये प्रकारत्वसंबंधेन सादृश्यप्रकारकज्ञानविशेष्यस्य द्वितीये च तादात्म्यसंबंधे
न सादृश्यप्रकारकप्रकारकज्ञानविशेष्यकस्य शाब्दबोधस्य पूर्ववदेवोदयात् द्वितीये तावदरविंदवदरविंद
वदरविंदमिव वा भातीत्येतद्वाक्यजन्यात्सादृश्यप्रकारकप्रकारत्वसंसर्गकज्ञानविशेष्यतावगाहिनः शा
ब्दबोधाद्वैषम्यस्य स्पष्टमेव आद्ये तु विषयसाम्यरक्षायामपि तुल्यपदस्य तात्पर्यग्राहकताभ्युपगमे तद्योगे

अरविंदादिपदे तृतीयानुपपत्तिः तुल्यार्थैरिति सूत्रेण तदर्थकपदयोगएव तद्विधानात् यदि तु प्रथमं लक्षप
दस्य स्वार्थविवक्षया तद्योगे तृतीयां विधाय पश्चादेव तस्य तात्पर्यग्राहकता कल्प्यते अत एव गौणमुख्ययोर्मु
ख्ये कार्यसंप्रत्ययः इति न्यायात् गौर्वाहीक इत्यादौ गोशब्दस्य गौणत्वात् कथं तत्र हष्यादिकार्यमित्याशंक्य मुख्य
एव स्वार्थे गोशब्दस्य हष्यात्वेन ततः पश्चादेव गौणत्वं न चांतरंगत्वेन प्रवृत्तः पदसंस्कारो बहिरंगगौणत्व
प्रतीतावपि निवर्तत इति समादधिरे शाब्दिकाः एवमिहापि इति न तृतीयानुपपत्तिरिति विभाव्यते नचापि
सादृश्यस्य यथा तथा तत्र निरूपितत्वसंबंधेनारविंदादेः सादृश्यनिरूपयथा तथान्वयः कल्प्यते एवमप्येकदेशान्व
योऽदुर्वारएव यदि तु सादृश्यएव लक्षणा ज्ञाने तु शक्तिरेव अतो नैकदेशत्वं सादृश्यस्येत्युच्यते नहि सादृश्य
स्य मुख्यपदार्थत्वाद् उपमायाः श्रौतत्वापत्तिः नचेष्टापत्तिः त्वयापि तदनभ्युपगमात् अथ सादृश्ये लक्षणा
यामपि न श्रौतत्वं तत्र शक्त्यैव श्रौतत्वोपगमात् यद्वा सादृश्यज्ञानएव लक्षणा ससंबंधिकस्थले एकदेशा
न्वयस्यापि व्युत्पन्नत्वात् यद्वा अरविंदपदमपि तात्पर्यग्राहकमेव तथा चारविंदसादृश्यज्ञानएव लक्षणा इ
त्यादिकं विभाव्यते तथाप्यस्मदपेक्षया गौरवं स्पष्टमेवेत्यादिकं ध्वनयन्नाह अलमिति पूर्वोक्तस्थलेपि साद
श्यस्य यथा तथान्वयाबाधकयुक्तिं प्रदर्शयन् अन्यत्रापि सादृश्यस्य यथा तथान्वयं वारयितुमाह गजरवेति गज

निरूपितसादृश्यस्यागमनेवाथाङ्गजपदस्य नञ्समनपरत्वाश्रयणं तस्येति गजगमनस्येत्यर्थः प्रतियोगित्वेनेति निपा
तार्थनामार्थयोर्भेदान्वयस्यापि व्युत्पत्तेः तस्येति सादृश्यस्येत्यर्थः इत्यादीति पिकशाद्वस्य तदीयकृते लक्षणान
स्यइवार्थे सादृश्ये प्रतियोगित्वेन सादृश्याश्रयतया धात्वर्थे समेनान्वयः तेन पिककृतसदृशकृततानुकूलकृतिमा
निति बोधः एवमन्यत्रापीति भावः सादृश्यस्य धात्वर्थान्वयवादिनामेकेषां मतं मतान्तरेणाप्यासम्भवेन दूष
यति धात्वर्थेति ननु क्षेत्रात्तादृशाकार्यकारणभावबलेन धात्वर्थविशेष्यकइवार्थसादृश्यप्रकारकबोधो न स्वी
कर्तुमर्हः सादृश्यविभक्त्यर्थत्वाभावात् धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंबंधेनान्वयबोधस्यैका
रेव्यभिचारप्रसंगात् अत्र प्रकारतासंबंधेनान्वयबोधे विभक्तिजन्योपस्थितिर्हेतुरिति उक्तौ नीलो घट इत्या
दौ व्यभिचारः नीलत्वस्य प्रकारतयान्वयबोधात्तस्य च विभक्त्यर्थत्वाभावात् एवं घट इत्यादौ घटत्वस्य प्रका
रतयाबोधाद् उक्तदोषो दुष्परः अतो धात्वर्थनिष्ठविशेष्यतानिरूपितेत्युक्तं तत्र त्वद्घटादिरूपनामार्थनिष्ठ
विशेष्यतानिरूपितेन नीलादिप्रकारेतेत्यदोषः ननु क्तकार्यकारणभावो नांगीकर्तव्य इत्यत आह एवेप
ति घटो न पश्यतीत्यादौ घटत्वेन तस्याभावस्य विषयतासंबंधेन धात्वर्थदर्शनान्वये घटाभावं पश्यतीति वद्घटा
भावविषयकदर्शनग्राह्यबोधापत्तेस्तद्वारणाय यथोक्तकार्यकारणभावः कल्प्यते तत्कल्पने चाभावस्यानि

प्र॰ टी॰
५२

पत्तार्थतया विभक्त्यर्थत्वाभावादेभावादेव न तथा बोध इति भावः गमनकर्त्रैवेति गजसदृशो गमनानुकूलकृ
तिमानित्यर्थः नन्वेवं धर्मिनरेणावधयोः सादृश्यं सिध्येन्नानुगमनेनेत्यत आह गजसादृश्यं चेत्यादि स्वगमने
ति गजगमनेनेत्यर्थः अन्येरिति आख्यातवादटीप्पितिविवरणकृद्भट्टाचार्यादय इत्यर्थः अत्र सांगभावेरोक्तं दूष
णमाह केचित्तिति भिन्नविधेयकत्वेति ययश्चवयः पुरुषः सगच्छतीत्यत्र गजसादृश्यविशिष्टपुरुषा
नुवादेन गमनस्य विधेयत्वं पुरुषोयः सगज इव गच्छतीत्यत्र पुरुषानुवादेन गजगमनसदृशगमनस्य
विधेयत्वं प्रतीयत इत्यर्थः एवं च विधेयतयेत्यस्य विधेयप्रकोटिप्रविष्टतयेत्यर्थः अनन्वयेति गजसदृशोदे
वदत्तो गमनानुकूलकृतिमानित्यत्र वनस्यान्वयाबोधात् एवं विवक्षापत्रकाक्रमात्रस्याप्यनन्वयो बो
ध इति भावः ननु धात्वर्थनिष्ठत्वादिकार्यकारणभावस्याक्लृप्तत्वात् कथं सादृश्यस्य धात्वर्थान्वयः अतः प्र
तीतिमात्रं प्रकिंचित्करमित्यत आह उक्तेति ननु यथोक्तकार्यकारणभावानंगीकारे घटो न पश्यतीत्यत्र घटस्य
प्रतियोगितयानन्वयीभावान्वयेनत्सय च विषयतया धात्वर्थदर्शनान्वये घटाभावे पश्यतीति बोधः स्यादित्याशं
कते न चेति धात्वर्थेति तथा च घटो न पश्यतीत्यत्राभावस्य नञ्जन्योपस्थितिविषयत्वेन तत्र धात्वर्थनिष्ठविशेष्य
तानिरूपितप्रकारतासंबंधेन नान्वयबोधः नन्वेवं पाको न यागः इत्यत्र नञर्थान्योन्याभावस्य याकादावन्वयो न स्या

न्‌ पाकस्य धात्वर्थेन यागेन निष्ठविशेष्यतानिरूपितप्रकारतासंबंधेनान्योन्याभावस्यान्वयबोधायोग्यादिति वाच्यं
नामार्थातिरिक्तत्वेन धात्वर्थस्य विशेषणात्‌ उक्तस्थले च धात्वर्थत्वेऽपि पाकादेर्नामार्थत्वात्‌ धात्वर्थनिष्ठवि
शेष्यतानिरूपितप्रकारतासंबंधेनान्वयबोधं प्रति विभक्तिजन्योपस्थितेर्हेतुत्वं कल्पयता परेणापि धात्वर्थ
स्य नामार्थभिन्नत्वेनावश्यं विशेष्यत्वात्‌ अन्यथा पाकेन याग इत्यादावुक्तकार्यतावच्छेदकावच्छिन्नस्यान्य
र्थसत्त्वेन विभक्तिजन्योपस्थितेस्त्वभावेन व्यभिचारापत्तेरिति तन्मतशेषः अत्रेदं बोध्यं एतादृशप्रतिबध्यप्रति
बंधकभावकल्पनेन न कलंजं भक्षयेदित्यत्र विध्यर्थस्य बलवदनिष्टाननुबंधित्वस्य प्रतियोगितेन नञर्थाभावान्वये
न स्याभक्षणे धात्वर्थे विशेषणतादिविशेषसंबंधेनान्वयो न स्यात्‌ अभावस्य नञ्पदजन्योपस्थितिविषयत्वेन
धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंबंधेनान्वयबोधासंभवात्‌ न च तदुक्तरीत्याप्येतदनुपपन्नं अभा
वस्य विभक्त्यर्थत्वाभावादिति वाच्यं तत्र विशिष्यधातुजन्योपस्थितित्वेन कारणतांतरकल्पनात्‌ न च ममममा
प्येवमेव निस्तार इति वाच्यं प्रतिबंधकसत्त्वे हेत्वंतरेणापि कार्यानुदयात्‌ वने गज इव गृहे देवदत्तो गच्छती
त्यत्र च वनगृहयोरभेदान्वयः देवदत्ते गजसादृश्यं च वनसंयोगानुकूलगमनसदृशगृहसंयोगानुकूलग
मनकर्तृत्वं तथा चोक्तरूपेण गजसदृशः पुरुषो वनाभिन्नगृहकर्मकगमनानुकूलकृतिमानित्यादिः शा

ग्र.टी
५५
55

द्बोधार्थः एवंच यथातत्र धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतयान्वयबोधे विशेष्यतासंबंधेन विभक्तिजन्योपस्थि
तेर्हेतुत्वे अवश्यं कल्पनीये अरविंदमिव भातीत्यादावपि प्रकारतया सादृश्यस्य त्वानान्वयोपि तन्मते प्रथमम्
पन्यस्तो निरस्तो वेदितव्य इत्याशयेन स्वरसमेतन्मते सूचयन्नेव स्वमतमेव समर्थयमान आह वस्तुत इति धर्मी
तेरति स्थूलत्वबलवत्त्वादिरूपेणेत्यर्थः आवश्यकत्वादिति स्थूलत्वादिप्रयुक्तसाम्यविवक्षायां गजगमनसद
शगमनेत्यादिबोधानुपपत्तेरित्यर्थः धर्मांतरप्रयुक्तसाम्यविवक्षायां तस्यकत्र्यन्वियस्वीकारस्यावश्यकतया
तथाचतत्र उक्तरीत्या धात्वर्थ एव सादृश्यान्वयाभ्युपगमो निर्बीज इति भावः नन्वेवमपि गमनप्रयोज्यसादृश्यविवक्षायां
तस्य धात्वर्थान्वयोपि स्वीकार्य इत्यत आह यद्यपीति मानसमेवेति उक्तविषया धात्वर्थे सादृश्यान्वयसंभवादिति भा
वः नन्वधर्मांतरेण सादृश्यविवक्षायां गज इव गच्छतीति प्रयोगो न भवत्येवेत्यत आह अतएवेति धर्मलाभेति तत्प्र
योजकस्थूलत्वादिधर्मवाचकपदाभावादित्यर्थः ननत्थेति गमनार्थकगामिरूपधातुप्रयोगसत्वेन न धर्मलाभ
इत्यर्थः असंभवेति चंद्र इव रमणीयमित्यादौ रमणीयत्वादिबोधेपि तस्याधारणतायाः शाब्दबोधविषयत्वात् तस्याः
पदार्थवाक्यार्थत्वाभावादित्यर्थः उक्तरीतिमन्यत्रापि अतिदिशति एवमपि कर इवेति अत्र हस्तत्वादिधर्मेणैव सादृश्यं चम
त्कारजनकतया कविप्रसिद्धं गज इवेत्यादौ तु उपात्तगमनादिव्यतिरिक्तधर्मेणापि न तथात्वमिति विशेषः चक्रेदेति रघुवंशे

५५

सीतां वाल्मीकितपोवने परित्यज्य लक्ष्मणो गत इत्यमुक्तिः एवं साहचर्यस्य गमनप्रयोज्यत्वं मानसस्य न विषय इत्युक्तं
तत्र शाब्दबोधे न रक्षणेन तज्ज्ञानं यत्र न संभवति तत्र साहचर्यस्य गमनप्रयोज्यत्वज्ञानेन निर्वहेत् सती यत्र च तद्वैशिष्ट्यं
गतो गमनसाहचर्यं शाब्दबोधविषय एवेति स्वीकार्यं तच्च न साहचर्यस्य धात्वर्थान्वयं विनेत्यर्थो तथा सेत्यनिरुक्ताभिप्राय
वा नाशंकते न चैवं तदिति गजसाहचर्येण तत्र राजपदं गजमनुपरं तथा च राजगमनसाहचर्याभावव्याप्यवद्गमनमिति
परामर्शाकारः गजगमनेत्यादिमावत्तस्य ह्योर्थः अत्र चोक्तपरामर्शः शाब्दसामग्रीवैशिष्ट्यकः क्षणः तदुत्तरं शाब्दज्ञा
यतामिति काचित्करणं द्वितीयः शाब्दबोधोत्पत्त्यधिकरणं तृतीयः तथा च तानसपक्षणाद्यावस्यापि तथा शाब्दो मति
क्षणे परामर्शनाशात्तदुत्तरं गजगमनसाहचर्याभाववद्गमनमित्यनुमितिर्निष्पाद्या तत्पूर्वक्षणे परामर्शस्वरूपकारणाभावा
त् अत उक्तं प्रत्यक्षानुयायात्मक इति परामर्शविशेषणं तथा चापेक्षात्मकत्वानस्य क्षणत्रयावस्थायित्वया शाब्दबोधोत्प
त्तिक्षणे विनष्टस्यः परामर्शोत्यवेति तदुत्तरं उक्तानुमित्यनुपपत्तिः अनुमितिक्षणे परामर्शाभावेपि तदव्यवहितपूर्व
क्षणे तत्सत्त्वादिति भावः ननु भिन्नविषयेऽप्यनुमितिसामग्र्याः शाब्दमात्रसामग्रीतो बलवत्त्वात् कथं तत्र गज इव गच्छतीति
शाब्दबोधो भविष्यतीत्यत आह शाब्दं जायतामिति इच्छाघटितसामग्र्या बलवत्त्वकल्पनस्य भावतः शाब्दसामग्र्याउ
र्बलवत्त्वेपि इच्छाघटिततेनतस्याबलवत्त्वमितीच्छावशाच्छाब्दबोध एवोत्पद्यत इति भावः बोध इति गजसहयोगमनाउ

प्र॰टी॰
५५
45

कूलकृतिमानितित्वदभिमतःसादृश्यप्रकारककर्त्तृविशेष्यकइत्यर्थः मानसत्वेनेति मानससामग्र्याः सर्वतोबलत्व
कल्पनादित्यर्थः ननुतादृशानुमित्यनंतरंशाब्दबोधानुत्पत्तौयत्क्षणएवगजगमनसदृशंगमनमितिमानसंभविष्य
तीत्यतआह एवंतद्रूपेति गजगमनसादृश्याभाववद्गमनमित्यनुमितिरूपेत्यर्थः तथाचानुमितिजननक्षणेवि
रोधिसामग्रीविधयाऽनुमितिसामग्र्याप्रतिबंधात्तत्तथाविधमानसंभवितुमर्हतीति नचानंतरक्षणेप्यनुमित्येवविरो
धित्वेनविधयाप्रतिबंधात्तत्संभवइतिभावः ननुतादृशस्थलेगमनेगजगमनसादृश्यंमाप्रतीयतामित्यतआह
सर्वानुभवेति गजइवगच्छतीत्येतद्वाक्यबोधानंतरंगमनेगजगमनसादृश्यग्रहनियमादित्यर्थः ममात्विति नचश्रा
द्धंजायतामितीच्छावशाद्गजइवगच्छतीत्येतद्वाक्याच्छाब्दबोधेउत्पद्यमानेतस्यगजगमनसदृशगमनानुकूलकृति
मानित्याकारकत्वस्यमयास्वीकारात्गमनेगजगमनसादृश्यग्रहसिद्धेः तथातच्छाब्दबोधस्यगजसदृशगमनानु
कूलकृतिमानित्याकारकत्वाभ्युपगमादिच्छावलाच्छाब्दजातेपिगमनेगजगमनसादृश्यस्यतदविषयत्वात्नतत्प्रती
तिनिर्वाहइतिभावः वस्तुतःक्षणविलंबकल्पनप्रयुक्तापरितोषादाह किंचेति उद्देश्यमिति गमनेगजगमनसादृ
श्यग्रहेपिपुरुषेशाब्दबोधस्यगजसादृश्यविषयकत्वविरहात् गजसादृश्याभावप्रकारकसंशयप्रत्यविरोधि
त्वात् गजसदृशोनपुरुषइतिबाधज्ञानप्रतिबध्यत्वात्तु एवमादिरूपदोषाभावः तादृशज्ञानंप्रतिप्रतिबंधकत्व

५५

स्याप्यसंभवात् ग्राह्याभावानवगाहनात् अदोषइति संशयनिश्चयत्वानुपपत्त्यादिरूपदोषाभावइत्यर्थः शाब्दबोधो
त्तरभाविनापुरुषविशेष्यकगजसादृश्यप्रकारकज्ञानेनतन्निश्चयादिनिर्वाहात् नचापीति गजसदृशोनपुरुष
इतिज्ञानस्यगजगमनसदृशागमनानुकूलकृतिमानितिज्ञानेनशाब्दबोधाविरोधित्वात् विषयभेदात् एवंचसंशयनि
श्चयादिरूपकार्यस्यशाब्दोत्तरज्ञानेनतत्त्वेनावलंबं कल्पयित्वाकथंचित्परिहारसंभवेपिगजसदृशोनेतिज्ञानसत्वे
गजइवगच्छतीत्येतद्वाक्यजन्यशाब्दबोधानुत्पत्त्यनुभवोनसमाधातुंशक्यः नचाशापितादृशज्ञानोत्तरंएतद्गमने
नगजगमनसदृशमितिज्ञानेनैवउक्तशाब्दबोधप्रतिबंधः संभवतीतिवाच्यं गजसदृशोनेतिज्ञानोत्तरमेवतदाप
त्तेरनिवारणात् ज्ञानस्यप्रतिबंधकत्वेपिगजसदृशोनेत्यस्यउक्तबाधज्ञानस्यप्रतिबंधकत्वासंभवात्दृष्टान्तरानु
भवविरोधइतिफलितार्थः अतएवयथात्वन्मतेधर्मिसादृश्यानुपपत्त्याधर्मिसादृश्यभानंनियमएवंममापि
धर्मिसादृश्यानुपपत्त्याधर्मिसादृश्यभाननियमइतिउभयानुभवरक्षार्थमाशंकते नचेति एवंचगजगमनसदृ
शगमनेत्यादिशाब्दबोधात्पूर्वंगजगमनसदृशइतिबाधधीसत्वेचधर्मिगमनमितियोग्यताज्ञानस्यावश्यकत्वात् त
त्सत्वेचपुरुषोगजसदृशइत्यस्यापिज्ञानस्याकरीत्यासत्वात् पूर्वंपुरुषोनगजगमनसदृशइतिबाधधीसत्वेचधर्मिसाद
श्याभावेधर्मसादृश्यस्याप्यभावेनगजगमनसदृशंगमनमितिज्ञानस्यासंभवात्तदभिमनबाधज्ञानस्ययोग्यताज्ञानवि

प्र॰टी॰
९६

घटकतया गजगमनसदृशं नगमनमिति । अस्मदभिमतबाधज्ञानस्य च ग्राह्याभावावगाहनविधया गजइवगच्छतीत्येतद्वा
क्यार्थबोधं प्रतिपकस्य च जनकत्वान्न विघटकतयैकस्य च विरोधिविषयकतयेति बाधद्वयस्यापि प्रतिबंधकत्वसंभवादुभया
नुभवसमर्थनं सुघटमिति भावः धर्मेति नियमाभावादिति न्यूनाधिकयोस्तासाम्याभावेपि नत्रैत्रसाम्याभीकारात्
ननु धर्मसादृश्यं विना धर्मसादृश्यवद्धर्मिसादृश्यं विना धर्मसादृश्यमप्युपपन्नमेवेत्याशंकामपाकर्तुमाह नात्रेति
व्यापातेति उपपत्तिरेकप्रयोजकव्यतिरेकप्रतियोगीत्युपपादकः नह्यतिरेकप्रयोजकव्यतिरेकप्रतियोगी चोपपाद्यः
तदुक्तं न्यायकुसुमांजलावाचार्यचरणैः अनियमस्य तु नायुक्तिर्नानियंतोपपादकः इति नचतादृशबाधधीसत्वेग
जइवगच्छतीत्येतद्वाक्यार्थबोधप्रतिबंधोसिद्ध एवेति वाच्यं अनुभवापलापेडपेक्षणीयत्वापत्तेः वक्ष्यमाणरीत्यास्मया
त्वदभिमतबाधधीकालेपि शाब्दानुभवस्यानुभवसिद्धत्वात् तदर्थमेवेत्याशंकामवतारयति नवेति पुरुषगमनवि
शेष्यकगजसादृश्याभावप्रकारकज्ञानस्य पुरुषविशेष्यकगजसादृश्यप्रकारकत्वादभिमतबोधे प्रतिकूलत्वाभावाद्विषय
भेदसाम्यादित्यर्थः सामग्रीति गजसदृशइति ज्ञानस्य पतत्कर्मकं गजगमनसदृशमिति ज्ञानमंतरेणासंभवात् धर्मसा
दृश्यं विना धर्मिसादृश्यानुपपत्तेरित्यर्थः एतच्च नदीत्यादिना स्फुटं गुरुत्वात् नचधर्मीतरप्रयुक्तसाम्यविवक्षायां
गमनसादृश्यत्वं न विना धर्मान्तरसादृश्येन गजसदृशइति ज्ञानं संभवत्येवेति वाच्यं तदानदुक्तबाधधीसत्वेपि गज

९६

२८/३

सदृशो गच्छतीत्येतद्वाक्यार्थबोधे इष्टापत्तेः यदा तु सर्वं गमनं न गजगमनसदृशं इति बाधबुद्धिरस्ति तदा गजसदृश इति योग्यता
ज्ञानाज्ञानाभावप्रयुक्त एव गजश्च गच्छतीत्येतद्वाक्यार्थबोधाभावो न तु स्निग्धबाधबुद्धिप्रतिबन्धकताप्रयुक्त इति न दोषः एवं च
सति समन्ततस्त्वित्युक्तबाधज्ञानस्य जनकज्ञानविघटकतया न गजसदृश इति ज्ञानस्य च यथा प्रामाण्याभावावगाहितया गजश्च गच्छतीत्येतद्वा
क्यार्थबोधे प्रतिबन्धकत्वमुपपादनं इति बाधद्वयकालीनयुक्तशाब्दबोधानुपपत्तेः उभयसमर्थनं तन्मतेन शाब्दबोधस्य गजगमन
सदृशगमनेत्यादिरूपतया नञ्गजगमनसदृशं न गमनमिति बोधपरस्परोपपाद्येवं चैतदनुपपन्नं न हि पीनत्वेन रात्रिभोज
नमिव रात्रिभोजनेन पीनत्वमपि कल्प्यत इति भावः ननु गजसदृशो नेति ज्ञानस्य जनकज्ञानविघटकत्वविषयता गजगमनस
दृशगमनेत्यादिबोधं प्रति प्रतिबन्धकत्वं न संभवतीति तन्मतेन तदनुभवविरोधः मयानुभवद्वयस्य बोधकविषयासमर्थि
तत्वादिति फलितार्थः एवं गजश्च गच्छतीत्येतद्वाक्यान्नञ्साहचर्यगजगमनसादृश्योभयप्रतीत्युपपादनानुरोधादपि
सादृश्यस्य कर्तृत्वेऽन्वयो युक्त इत्याह प्रत्नश्चेति गजसदृशो गच्छतीति शाब्दबोधाभ्युपगमे गजसादृश्यस्य शाब्दे गजग
मनसादृश्यस्य च तदाक्षेपेणोपपत्त्या प्रतीतिद्वयसमर्थनं तन्मतेन गमनेत्यादिशाब्दस्वीकारात् गजसादृश्यप्रतीतिसमर्थ
नेन न संभवतीति भावः ननु मास्तु आक्षेपेण गजसादृश्यसिद्धिः मानसादेव तद्ग्रहसंभवात् सत्यं तथापि नियतप्रतीतिर्न
स्यादित्यत्र तात्पर्यं शाब्दमात्रमिति तथा च सर्वत्र वाच्यैवानुमतमित्यर्थः प्रत्युचितमेवेति न तत्स्थले ज्ञानस्योपमेयताभावादिति

भावः इदं चाभ्युपेत्योक्तं वस्तुतः पूर्वोक्तकार्यकारणभावानुरोधेन सादृश्यस्य धात्वर्थान्वयोऽनुचित एवेति तात्पर्यं ननु गजप
दस्य तद्गमनलक्षणया गजगमनसदृशगमनानुकूलकृतिमानिति बोधवादिनां मते नामेदं दूषणं गजसादृश्यप्रयो
जकत्वादिबोधवादिनां सादृश्यस्य प्रयोजकत्वसंबन्धेन गमनान्वयमुरीकुर्वतां संसर्गगोचरकृतौ किं दूषणमभिहितं ते
षां गजसादृश्यबोधादिति चेन्न उच्यते एवं तावदुक्तमेव धात्वर्थे सादृश्यस्यान्वयानुपपत्तिरूपं परं च गजसादृश्यगज
गमनसदृशगमनान्यतरशाब्दबोधस्यानुपपत्तिरूपं तत्र तन्मते गजसादृश्यप्रयोजकत्वस्यैव शाब्दबोधविषयत्वात्
अन्यदपि पूर्वोक्तसंशयनिवृत्त्यनुपपत्त्यादिकमत्राप्यवधेयं न ह्युक्तवाक्यार्थबोधाद्गजसदृशो न वेति संशयनिवृ
त्तिः संभवति गजसादृश्यस्य तद्रीत्या पुरुषविशेषणत्वानवगमात् गजसदृशो नेति वाक्यज्ञानस्य एतद्वाक्यार्थबो
धप्रतिबन्धकत्वं च न स्यात् एतद्वाक्यविरोधिविषयकत्वविरहात् एवं उक्तशाब्दबोधाद्गजसदृशो नेति बुद्धिप्रतिबं
धोऽपि न स्यादिति स्पष्टमेव किं च मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगन्था परस्याः सृकं संशाय पविमिन्द्र ति
ग्मं वि शत्रून्ताढि वि मृधो नुदस्वेति वाजसनेयके मन्त्रः पठ्यते अत्र सिंहेनेन्द्र उपमीयते न शाब्दस्यैवेदं यत्र पदवत्मार्थिक
त्वे नेति प्रतिषेधार्थीयो भाषायामुभयमन्वयाप्रयमिति निरुक्तकृताभिधानात् अन्वयायं वेदे तूभयनिषेधार्थिकत्व
सादृश्यार्थकत्वं चेत्यर्थः कुचरः पृथ्वीसंचरणः यद्वा कार्यं न चरतीति कुचरः देवतायाः प्रभावातिशयेन सर्वत्र वर्तमानत्वात्

सिंहस्यापिस्ववीर्याहंकारेणनयनात् गिरौपर्वतेनिषण्णीतिगिरिशः परावनतः इतिहरनामस्कंदसंज्ञजगण्यागच्छ
ति स्वकंप्रसरणशीलंनीगमेनीहारंपविवक्षंसंशयसम्प्रश्रशान्तीकृतशात्रुनविनाटिमारयतीत्युपसर्गसन्ताटीति
क्रियायान्वयः व्यवहितनिष्पत्तिक्वादसमस्त्रेणनयाभ्युपगमात् एवंमस्थेविनुदर्शेत्तित्रापि अत्रनावस्त्रिरुक्तेभगवता
महर्षिणायास्केनवेदभाष्यकारादिभिश्चाभियुक्तैः भीमादिविशेषणानांइंद्रसिंहोभयान्वितोर्थोव्याख्यातः तत्र
भीमादिभिः शब्दैरिंद्रसहशास्त्रमागच्छसीतिवायेसाहश्यपरंद्वयवान्वयोवगम्यते त्वच्छीमान्तिसिंहसाहश्यप्रयो
जकागमनेन्द्रादिबोधवारणेकुचरादिपदानांसिंहान्वितार्थपरत्वोक्तिरसंगतास्यात् अतस्तत्रोपमेयपूर्वतदन्वय
कल्पनस्यावश्यकतयात्रापितथैवयुक्तं वैषम्येबीजाभावादित्यादिकंस्फोटयन्नाहदिगिति इतीवाद्यर्थबोध
प्रकरणे यथाशाहस्येति स्यादिवयथादियोगे इतिकापाठाभिप्रायेण इवपदादीतिपाठे तु यथाशाहोप्यादिपदसं
ग्राह्यः वाशब्दादीनमित्यादिपदाद्धकारादिसंग्रहः इवार्थवतेः स्वरूपेणैवोपादानात् प्रत्ययाइतिस्यान्तद्येणसह
शादिशब्दवत्प्रयोगवारणार्थं तेषांसाहश्यार्थत्वाभावमाशंकते नेचयद्यपीति ईषदसमाप्तौकल्पदेशीयरइति
सूत्रेणत्वर्थः सामर्थ्यादिति ईषदसमाप्तत्वेनकिंचिदूनत्वप्रालाभेनचात्रनसाम्यस्यलाभादितिकेचित्स्या
शयः साहश्यार्थकत्वाभावशंकामपास्यएवसमाधायप्रत्ययत्वकथनप्रयोजनमाह नेचेति प्रत्ययानामिति व

ग्र॰ली॰
४८
48

निषन्नयकल्पवादिप्रत्ययानामित्यर्थः यद्यपिवतिप्रत्ययोपिनहितसंज्ञएववनथापितस्याव्ययसंज्ञायाअपिसत्वाकल्पा
दिभ्योबहिः कृत्वरवादीनांकल्पवादीनांचमध्येपाठाभावात् इवादिवदव्ययत्वेकल्पवादिवत्तद्धितत्वंवायास्यतीतिलाघ
वार्थंपृथगभिधानं समादिपदानांचंद्रेणसममितिवाक्येप्राधान्यात् इवादिवदव्ययत्वेकल्पवादिवत्तद्धितत्वंचायास्य
तीतिलाघवार्थंपृथगभिधानं समादिपदानांचंद्रेणसममितिवाक्येनचंद्रसममितिसमासेनचप्रयोगाभिधाना
वपितथाप्रयोगमाभूदित्यभिप्रायेणाह निभादीनांत्विति विग्रहइति अविग्रहः स्वपदविग्रहोवानित्यसमासइ
तिसिद्धांतात् अविग्रहइति नस्वविग्रहेणविवरणमेवनकार्यमित्यर्थः अस्वपदेति समासांतर्गतपदेनविग्रहोन
कर्तव्यः किंतुतदर्थकपदांतरेणेत्यर्थः नदाह चंद्रेणसममिति नभवतीति समासंविनाकेवलनिभपदस्यास
युत्वेनप्रयोगानर्हत्वादित्यर्थः आहुस्मामिति विबुधाधिपत्तुवादाकेसूर्यस्तुतिरितितद्विषयकरत्वंगतत्वाद्भो
पमायाअलंकारत्वं वीप्सस्यअहमित्यन्वयः छेदस्यिपरेपिव्यवहितान्वेतिसत्वात् केतवः प्रधानभूताः अस्य
सूर्यस्यरश्मयः किरणाजलेपुविशेषेणदृश्यमानेत्वलंताः ग्रयइवेत्यर्थः अत्रभ्राजनंप्राकाशार्थेनपासामान्यध
र्मः प्राचीनैरिति इवेनसहनित्यसमासविधानात् नत्वयोगेउपमायावाक्यगतत्वोदाहरणविरोधादितिनेयामाश
यः अन्यथेति वामनइवेत्येवप्रयोगापत्तेः जीमूतस्येति जीमूतस्येवभवतिप्रतीकंयद्दमीयातिसमदास्तुपस्य ॥

अनाविद्धयातन्वाजयत्वंसत्वावर्मणोमहिमापिपर्त्त्वितिमंत्रः वर्मीकवचीसमदांशत्रूणांउपस्थेसंनिधानेयदाया
तिगच्छतितदानस्यवर्मिणोजीमूतस्यमेघस्येवप्रतीकमंगंभवति नीलमेघइवदृश्यतेइत्यर्थः अनाविद्धया
वैरिप्रहरणैरक्षतयातन्वादेहेनत्वंजयशत्रून् सप्रसिद्धोवर्मणः कवचस्यमहिमाशस्त्रक्षतप्रतिबंधकत्वरू
पस्त्वांपिपर्त्तुपालयतुपरशस्त्रभयादित्यर्थः समासेनेति जीमूतस्येवेतिपदद्वयानवच्छेदेनेत्यर्थः असमासेति
पृथक्पदद्वयपाठादित्यर्थः समासस्यनित्यत्वेनपृथक्पदद्वयपाठोनस्यात् समासेपूर्वपदेपृथगवग्रहाक
रणात् अर्वाचीनसंस्कर्त्रा केनचित्तत्कालप्रवृत्तिकामेवपदसंज्ञामादायावग्रहः कृतइतिवैदिकसंप्रदायादेतद
भिप्रायेणैवग्रीष्मचंडकरमंडलभीष्मज्वालसंसरणतापितमूर्त्तेः प्रावृषेण्यइववारिधारोमेवेदंतोहरत्वहमस्मिव
रेण्यइतिवाक्यगतपूर्णोपमायारसगंगाधरेणोदाहृतत्वादितिभावः यथैतेषामृषीणामेवंप्रस्कण्वस्यस्मरण
कानमितिनिरुक्तमाप्रसिद्धत्वार्थमाह प्रियमेधादीनामिति आदिपदेनअत्रिविरूपांगिरः सप्तकानांसुनीनांग्रह
णं अंगिरस्वदित्यत्रअंगिरोवदितिवक्तव्ये अयस्मयादीनिछंदसीतिभसंज्ञात्वाज्जत्वाद्यभावेन वेद इत्यग्निसंबुद्धिः
प्रस्कण्वोनामकण्वपुत्रऋषिविशेषः प्रस्कण्वहरिश्चंद्रावृषीइतिनिपातः अत्राग्निविषयविषयकप्रकरणत्वनिष्ठर
त्याख्यभावोत्कर्षकतयाउपमायाअलंकारत्वं नतुरसेति सेवनतत्रमालास्यात्समविंशतिमात्रिकैर्गणमरः नक्षत्र

मालामुक्तावलीविशेषः मेरुपदे समुदितानक्षत्राणां तारकाणां मालापंक्तिर्यत्रेत्यर्थः यदुक्तमिति काव्यप्रकाशोक्त
नेति शेषः रसादीति आदिपदेन भावरसाभासभावाभासभावोदयभावसंधिभावशबलतानां संग्रहः सर्वत्रे
ति तदभावे चमत्कारविरहेण काव्यत्वानुपपत्तेरित्यर्थः तदनादरेति रसादिरूपव्यंग्यराहित्यं न विवक्षितं किंतु
तदतिरिक्तव्यंग्यराहित्यमेवेत्यर्थः ननु रसाद्यतिरिक्तमपि व्यंग्यं तत्रास्त्येवेत्यत आह व्यंग्येति तथा च रसाद्यति
रिक्तचमत्कारजनकव्यंग्यराहित्यमेव चित्रत्वमिति भावः एवमेतन्मते रसादीनां चित्रत्वप्रयोजकाभावप्रतियो
गितावच्छिन्नभावउक्तः संप्रति रसादीनामपि विशिष्टाभावं चित्रस्थले ये मन्यन्ते तन्मतमाह केचिदिति तात्पर्ये
ति तथा च तत्र रसादिरूपव्यंग्यराहित्याभावेपि रसादिव्यंग्ये तात्पर्यविषयत्वरूपविशेषणाभावेन तात्पर्यवि
षयीभूतव्यंग्यराहित्यमस्त्येवेति भावः तदुक्तमिति ध्वनिकृतेति शेषः षष्ठ्यर्थेति तत्प्रकारकबोधं प्रति ता
मजन्योपस्थितेर्हेतुत्वकल्पनात् सामर्थ्येति यद्यपि नैयायिकमते हि [illegible]त्वमेव सामर्थ्यं [illegible] आधारत्वं भू
तलवृत्तिर्घट इति बोधस्य तैरभ्युपगमात् तथापि प्राचीनमताभिप्रायेणेदं अधिकरणत्वस्य सामर्थ्यस्य निरूपक
त्वसंबंधेनान्वयस्य तैरंगीकारात् नव्यमते आधारत्वमाधेयत्वमित्येव व्याख्येयं उभयथापि सामान्यधर्मप्रयोगा
वश्यकत्वेन तात्पर्यमत्र इव प्रतिकृताविति तथा च तस्य इवार्थविहितत्वेन तादृशवतिप्रत्ययवत्प्रयोगे उपमाश्रौती

स्यादित्यर्थः पताहृशेति शिलाइवशिलेयंदृषि शिलायाइतिढप्रत्ययः दृष्टमित्यर्थः पुंडरीकमिवपौंडरीकंमुखंइत
त्रापीत्यर्थः तत्रापिकठिनत्वरम्यत्वादिधर्मप्रयोगविरहेणनद्धितेश्रोतोधर्मलुप्तास्यादित्यर्थः नद्धत्यरत्वाभावेति
निपातातिरिक्तनामार्थयोरभेदेनान्वयासंभवादित्यर्थः पर्यवस्यतीति धर्मार्थकशब्दस्यधर्मिपरत्वादित्यर्थः
इवादीति इवाद्यर्थेत्यर्थः धर्मलुप्ताविभागस्यान्यूनत्वमाशंकते यत्विति प्रकारेइति प्रकारेसादृश्येपविवक्षितेगुण
वाचकशब्दस्यद्विर्भावोभवतीतिसूत्रार्थः वाक्यगतेति पटद्वयरूपत्वादितिभावः ननुसमासेनैकपद्येसमास
गतधर्मलुप्तायामेवनद्धतभावः स्यादित्यतआह नापीति पटुपटुरित्यादावपिइति पटुः पटुसदृशोत्यादावित्यर्थः
एवंचयथासमासस्योत्त्वादिषुभ्रतोदात्तत्वादिविधायकसूत्रेषुप्रातिदेशिकसमासोपिगृह्यते नद्धद्वत्रापिमुख्य
समासस्यैवग्रहणेवीजाभावादित्यर्थः चित्रमीमांसाकारमतंदूषयितारसगंगाधरकारमतमाह केचित्विति
भाष्यकैयटेति वाचकत्वेसंमतेद्वि द्योत्येइतिव्याख्यानेविरुध्येतेतिभावः द्योतकत्वपक्षइति वैयाकरणसंमत
इतिशेषः सवाचकोविशेषणासंभवात्द्योतकोपिवेतिवाक्यपदीयोक्तेः सहकारित्वेति तात्पर्यग्राहकविधयेति
शेषः नद्वाचकत्वस्येति नद्योतकत्वस्येत्यर्थः तथाच नत्वेकपदस्यसादृश्येलक्षणाद्विर्भावस्यद्योतकइत्यवश्य
माश्रयणीयइत्यर्थः अत्रदीक्षितैर्धर्मलुप्तापिकामापादितमेतेस्तुद्विलुप्ताधिकामितिकाव्यप्रकाशकारोपरिहृयो

ग्र.टी. ५०

रप्ययमादेपस्तुत्ल्यप्रवेत्यभिसंधायउभययथापिनाथिकामित्याह परीति तथाचप्राचीनकृतविभागस्यैवैतदनुवा
द्यत्वमितिभावः लब्धप्रासादेनचिरंसद्वंवदीपरिग्रहेनिशाचरपतिना सीतारावणसंवर्तितंदृष्टिविषगृहेविशेषथीव
उपनीता विशेषथीवेत्यत्रपदेइवपदेनसहसमासः सैतत्काव्यविभीषणंप्रतिश्रीरामोक्तिः एवंचयथासर्प
गृहेविशेषथीसंबंधेनैषामनिष्टंतथासीतानयनेनराक्षसानामपिभविष्यतीतिभावः साधर्म्यमिति स्वविरो
धानिष्टहेतुत्वमेवहेतुत्वरूपमित्यर्थः नचात्ररावणसंवर्तितदृष्टिविषगृहयोर्बिम्बप्रतिबिंबभावोप्यस्तीतिकथंध
र्मलोपइतिवाच्यं तस्यतत्सादृश्यानुपपादकत्वात् आजिघ्रतिस्पृशतिचुंबतिस्थापयतिहृदयेजनितरोमांचः
जायाकपोलसदृशानिपथिकोमधूकपुष्पाणि गाथाकोषेकस्यचिद्विरहावस्थावर्णनं क्रियासाम्यइति तेनतु
ल्यंक्रियाचेद्वतिरितिसूत्रेणक्रियानिष्टत्वेनैवोपमेयत्वस्यबोधनात् इतिभावः नत्वेवंसर्वसंबंधेतुल्यार्थकव
तियोगेनामार्थस्यउपमेयत्वकथनमसंगतमयुक्तंच वत्यर्थसादृश्यस्यक्रियायामेवान्वयस्यवाच्यत्वात् तथा
चवैयाकरणाः संबोधनांतंकृत्वोर्थाः कारकंचप्रथमोवतिः धात्वसंबंधाधिकारस्तिः प्रथमसमस्तनन् तथायस्यच
भावेनषष्ठीचेत्युदितंद्वयं साधुत्वमष्टकस्यास्यक्रिययैवावधार्यतां अस्यार्थः संबोधनांतस्यक्रियायामेवान्वयःश्र
ष्टिदेवदत्तेति पचतिङ्क्वाक्यमितिकात्यायनोक्तेः एवंचसमानवाक्येनिघातयुष्मदस्मदादेशाइत्येकवाक्यविहित

५१

स्लिङ्लिङ् इति निपातः सिध्यतीति: नञ्कर्मं हरिणा संबोधनपदं यच्च तत् क्रियाया विशेषणं व्रजानि देवदत्तेति ति
चानोत्र नथासतीति कृत्वार्थानामपि क्रियायामेव संबंधः यथा सकृत्पचति द्विः पचति पंचकृत्वः पचतीत्यादि
संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजिति वचनेन क्रियायोग एव तदनुशासनात् एवं कारकस्यापि तस्या
मेवान्वयः करोतीति कारकं इत्यन्वर्थसंज्ञाविज्ञानात् तंडुलं पचतीत्यादौ क्रियान्वयाभावे कारकत्वानुपपत्तेः प्र
थम इति तेन तुल्यमित्यनेन विहितो वतिप्रत्ययः तस्यापि क्रियायामेवान्वयः यत्तुल्यसा क्रिया चेदित्यभिधा
नात् यथा देवदत्तवत्पठतीत्यादौ चैत्रवत्सुंदर इत्यादावप्यनुशासनानुरोधात् साधुत्वार्थमध्याहृत भवतीत्यादि
क्रियायामेव तदन्वयः धातुसंबंधे प्रत्यया इत्यधिकृत्य विहितानां त्वम्नादीनामपि क्रियायामेव संबंधः यथा
भोक्तुं पचतीति पातंजलमित्यादौ अध्याहृत नेयादिपदबोध्यायामानयनादिक्रियायामेव तदन्वयः असम
स्तन ओपि नत्वं पचसीत्यादौ क्रियानिषेधस्यैव बोधात् तत्रैवान्वयः घटो नास्तीत्यादावपि घटास्तित्वप्रतियोगि
काभावबोधाभ्युपगमात् यस्य च भावेन भावलक्षणमित्यनेन विहिता सप्तमी गोषु दुह्यमानासु गत इत्यादौ
तस्या अपि भावेनेति क्रियार्थकभावपदानुरोधात् तत्रैवान्वयः एवं षष्ठी चानादरे इति सूत्रेण विहिता षष्ठी
रुदति रुदतो वा प्राव्राजीदित्यादौ तस्या अपि क्रियायामेवान्वयः चकारेण यस्य च भावेनेति सर्वस्य सूत्रांशानुक

भू.टी.
५१
51

षणात् आख्यातमप्रकृतमन्यत् वति प्रत्ययार्थस्य तु नामार्थान्वयः कथं अत एव महानसवदिति दृष्टान्तवाक्यो
पात्तवत्यर्थस्य षष्ठी अत एव नादावप्यनयोऽनुपपन्न एव अत एव वक्तिमान्नविनमर्हन्ति इति क्रियापदयुक्ता
मेव प्रतिज्ञां सांप्रदायिकाः कुर्वन्ति यदि त्वनुशासनमप्येवमेव यवत्यर्थस्य नामार्थान्वयोऽभ्युपगम्यते तर्हि
पुष्पेभ्यः स्पृहयतीति पदार्थाध्याहारोऽपि न स्यात् न चेष्टापत्तिः तत्र साधुत्वार्थं पदाध्याहारस्यावश्यक
इति तत्सिद्धान्तात् एतदप्युक्तं यदि पदेऽपि वत्यर्थः कारकं वा नञ्जादिषु अन्वेति तज्ज्ञानं तर्हि च तत्प्रत्यास
कल्पनेति वैयाकरणभूषणे अत एव क्रियाविशेषणत्वाद् इति प्रत्ययस्यासत्त्ववाचकार्थाभिधायकत्वेन
वव्ययत्वसिद्धौ वनेरव्ययमप्येपादोनकर्तव्य इति भाष्ये के पदयोर्व्यवस्थापितमिति चेत् सत्यं पर्यवसा
ने पुनस्तद्वतोरेव सादृश्यफलनीत्यभिप्रायेणोक्तं यथानां न दविरोधः संपादनीयः अत एव स्यादिति वदादे
शोनत्विधौ अस्त्रिद्वदध्याभादित्यादौ सादृश्यान्वयो नामार्थ एव पर्यवसितमादायेव प्रतीवर्तते वस्तुतस्तु
तेन तुल्यमिति सूत्रे महाभाष्यकारैः क्रियेति प्रकृत्यर्थविशेषणं प्रत्ययार्थविशेषणं वेति पक्षद्वयं व्याख्यातं येन तुल्यसा क्रि
या चेत् यत्तुल्यसा क्रिया चेदिति सादृश्यप्रतियोगिनः क्रियात्वविवक्षायां आद्यस्य सादृश्यानुयोगिनः क्रियात्वविवक्षायां
द्वितीयस्य पक्षस्य तत्तुल्यतासात् तत्राद्यपक्षे प्रत्ययार्थस्य सादृश्यानुयोगिनः क्रियात्वेन विशेषणं नास्तीति तत्तीयासमर्थात्

३१/३

क्रियावाचिनो गुणत्वेऽपि प्रत्ययः स्यात् यथाऽऽत्रेणानल्पः स्थूल इत्यादौ द्वितीयपदेन तत्साहश्यप्रतियोगिनः क्रिया
यात्त्वविशेषणं नास्तीति तत्तीयासमर्थाद् क्रियावाचिनोऽपि क्रियात्त्वेऽप्रत्ययः स्यादित्याशंक्य तल्पपदमहिम्ना प्रकृ
त्यर्थप्रत्ययार्थयोर्द्वयोरपि विशेषणसिद्धेः तथाहि यदा तावत् क्रियया प्रकृत्यर्थो विशेष्यते तदा प्रत्ययार्थस्य क्रियात्व
लाभः सामर्थ्यात् यदा तु क्रियया प्रत्ययार्थो विशेष्यते तदा प्रकृत्यर्थस्य क्रियात्त्वलाभः सामर्थ्यात्क्रियायाः क्रिया
साहश्यानुपपत्तेरिति न च प्रत्ययार्थविशेषणपदे क्रियायाः साध्यस्वभावत्वेन तत्संख्याविधीयमानो वतिः सत्त्वभू
तार्थाभिधायकत्वेन लिंगसंख्यान्वयात्त्वयमेव यन्न व्येति तदव्ययमिति लिंगसंख्यानन्वयित्वमव्ययत्वमिति ल
क्षणयोगादव्ययत्वं प्रतिपद्यत इति तदर्थं तद्ग्रहणपाठो न कर्तव्यः वतिना च क्रियासामान्यस्यैवाभिधानात् वतौ सा
दि क्रियाविशेषप्रयोगः प्रकृत्यर्थविशेषणपदेन तु क्रियाग्रहणेन क्रियावत उपलक्षणे क्रियाद्वारकं क्रियावतः
साहश्यमाश्रयणीयं तत्र क्रियावान्प्रत्ययार्थः ततो लिंगसंख्यावदर्थाभिधायकत्वादव्ययत्वं वतेर्न प्राप्नोतीति तद
र्थो वतेः पाठोऽव्ययमध्ये कर्तव्यः पाठसामर्थ्याच्च सत्त्ववाचित्वेऽप्यव्ययसंज्ञेति स्पष्टं कैयटे ततो द्वितीयपदाभिप्रा
येण तस्य नामार्थान्वयोक्तिरित्यलमतिबहुना एवं वक्ष्यमाणप्रत्यययोगेष्वपि ध्येयम् अलमोदाहार्यी कल्पवादितुल्या
र्थकत्वात् यथा ईडेमत्वोहकृत्स्तणं तव यहणंति नैनं मृगास्त्यजति तन्मृगतृष्णस्यैव श्रयोनि मोहमहिमा न हि मा

अ॰टी॰
५२
52

मुविंवलक्ष्मीविडंवि मुखि हसितु पाशवीशु ॥ लक्षणेन सदृशं वक्रत्वं विभाषास्तु पोवक्रच पुरस्तात्विति सादृश्यार्थक
वक्रच: शर्वप्रयोगः ॥ नदसंभवादिति न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्यय इति प्रकृतिविनिर्मुक्तप्रत्य
यमात्रस्य प्रयोगानर्हत्वादिति भावः काव्यप्रकाशविवरणकारोक्तविचारसौलभ्याय तदुदाहरणमेकोपन्यस्यति
सच्छलेति सकलकरणपरविश्रामश्रीविरचनं सरसकाव्यस्य सदृशपेनेत्यर्थवानन्ध्यनेसदृशांशांशशमात्रेणला
चवादाहृ केथमिति अप्रसिद्धप्रतियोगिकनिषेधस्यानिरूपणाभावादित्यर्थः विरोधादिति सादृश्यमुपमाभेदइ
तिभेदगर्भसादृश्यस्यैव उपमात्वादित्यर्थः ॥ [1] अत्रैवेति वक्ष्यमाणपरितोषादाह काव्यप्रकाशकृदिति जयरामभट्टा
चार्यव्याख्यानेन समाधिमाह अथाकृतिरिति ॥ [2] महेश्वरीत्या समाधिमाह अथैवत्विति लाक्षणिकमिति सादृश्याश्रयस्ये
वनदाचानया सादृश्यप्रतियोगिनि लक्षणेत्यर्थः यादृशेति उपमानतावच्छेदकरूपावच्छिन्नोपमानबोधकेत्यर्थः
नच सदृशेति नहि वेदइवेत्यस्य यथा सौम्यप्रतीतिस्तथा सदृशाइवेत्यस्मात् विशिष्ट उपमानतावच्छेदकानुप
स्थितेरित्यर्थः नथ्यावोपमानत्वातितिक्तप्रकारेण तदुपस्थापकपदप्रयोगपर्वोपमानप्रयोगो विवक्षित इति भावः
पदाभावेनेति सादृश्यविशेष्यकबोधजनकपदाभावेनेत्यर्थः सादृश्यपदस्येति लक्ष्यलक्षणावच्छेदकोभयसाधा
रणसादृश्यार्थकत्व सत्त्वादित्यर्थः श्रोतत्वमिति सादृश्यप्रतियोगितायत्र शब्देन तद्वचनेनैव श्रौतीत्वेन तन्मनत्र

५२

वस्थापनात् नचेष्टापत्तिः उपमानलुप्ताया आर्थत्वनियमस्वीकारादित्यर्थः उपमानेति उपमाननिष्ठविशेषणतानि
रूपितविशेष्यताशालिन्या इत्यर्थः प्रकृते चेति सादृश्यप्रतियोगिताश्रयस्योपमानपदार्थतया प्रतियोगितायाः
पदार्थतावच्छेदकतया उपमानविशेषणतापन्नत्वादित्यर्थः सर्वज्ञास्त्ररसंस्कृचयन्मतान्तरमवतारयति काव्यप्र
दीपेति एतदभिप्रायविवरणद्वारेण पूर्वोक्तरसं विशदयति तस्यायमिति उपमानलुप्ताया आर्थत्वनियमभङ्ग
भयेन यत्रोपमानलुप्तत्वमिति नियरेरिष्टापत्तिर्न कर्तुं शक्यते तेनाह श्लेषोदाहरणमाह रक्षांसीति अनर्घराघवनाट
के विद्याधरस्य विद्याधरान्तरं प्रत्युक्तिः नन्वर्तिश्रुदृशिभ्यश्चेति वार्त्तिकेन संपूर्वकाद्दृशेरकर्मकत्व एवात्मने
पदस्यानुशासनादत्र संपश्यध्वमित्यात्मनेपदमनुपपन्नं रक्षांसीति कर्मणः प्रयोगसत्त्वात् सत्यम् प्रमाद
एवायमिति केचित् अन्ये तु कथयध्वमित्यध्याहृत्य रक्षांसीत्यस्य तत्रैवान्वयं कल्पयित्वा रक्षसां कर्मत्वाविवक्ष
याऽऽत्मनेपदं समर्थयन्ते न च तथापि कर्मणः सत्त्वात्कथमकर्मकत्वमिति वाच्यम् अविवक्षितकर्मकत्वस्यैवात्रा
कर्मकत्वात् वस्तुतः कर्माभावस्य सकर्मकेष्वसंभवात् नन्वेवं धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् प्रसि
द्धेरविवक्षातः कर्मणोऽकर्मिका क्रियेति भारं वहतीत्यत्र सकर्मकत्वेऽपि नदी वहतीत्यत्राकर्मकत्वं अयमित
रेस्पंदरूपधात्वर्हितेः जीवतीत्यत्र धात्वर्थान्तर्भूतकर्मत्वात् जीवप्राणधारणे इति धारणकर्मीभूतस्य प्राणस्य था

अ.टी.
५२
53

र्थानभावात् प्रसिद्धेरिति मेघो वर्षतीत्यादौ जलस्य तत एव लाभात् तानि संतीति वा कार्थस्य कर्मत्वं कल्पनीय
मेव अतः साक्षात्कर्मसंबंधाभावात् विनाप्यध्याहारं आत्मनेपदं समर्थयितुं शक्यं अविद्यमानकर्मकत्वस्यैव
न्मतेपि बाधात् अश्रूयमाणकर्मकत्वस्य च समाप्तिसत्त्वादिति न कोपि दोषः कर्मत्वमोलं कर्मणि इत्यमरः तथा
च जगात्त्रयविपद्रूपकर्मत्वमेत्यर्थः यथाशाहृद्यटितमुक्ता इव शाहृद्यटितमाह त्वमिवेति नैषधे भैम्याः कामो
पालंभः स्वमदहो दहनाज्ज्वलनात्मना ज्वलयितुं परिरभ्य जगंति य इत्युत्तरार्द्धं अत्राप्युपमानलभ्रमतस्वीकारे
नु इवादिपदसत्त्वात् श्रौतत्वस्यादिति भावः यद्वक्ष्यति अथ कथं विदिग्म्यादि अत्र दहेशम्भुश्च एवेइत्सभयत्र कर्मख्यात
स्य स्वविषयकार्थधात् तरवर्तित्वेन लक्षणया विषयत्वमर्थः त्वंपदार्थस्य कामस्य प्रतियोगितया इव पदार्थे सा
दृश्येनान्वयः तस्याश्च यत्तया कोपीति पदार्थेः तस्मिन् आख्यातार्थविषयत्वस्य प्रतियोगितया नञर्थाभावेन तस्य वि
शेषणतया अन्यपदार्थे इति पदार्थान्वयरीतिः नैयायिकमते प्रथमान्तविशेष्यकबोधस्वीकारादेतादृशाकारमाह त
थाचेति वेदेपीति अपि शब्दात्तु देवेषु न यदेषु नाहरूपवती क्वचित् मानुषेष्वथवान्येषु दृष्टपूर्वा तथा श्रुतेति भैमी
परं महाभारतमवधेयं कामहन्नीति त्वंपदार्थस्य कामस्यानुयोगितासंबंधेन इवार्थे सादृश्येन तस्य च प्रतियोगितासं
बंधेन अन्यस्मिन् इति रीत्येति भावः चंद्र इवेत्यादौ सादृश्यनिष्ठविशेष्यतानिरूपितप्रकारतायां प्रतियोगितायाएव

सादृश्यनिष्ठविशेषणतानिरूपितविशेष्यतायामनुयोगितायाएव संसर्गत्वमिति सर्वानुभवसिद्धत्वात् प्रकृते
चकामनिष्ठविशेषणतायां सादृश्यनिष्ठविशेष्यतानिरूपितायामाधेयत्वस्य संसर्गत्वे सादृश्यनिष्ठविशेष
णतानिरूपितान्यनिष्ठविशेष्यतायां च प्रतियोगित्वस्येति तद्विरोधात् अनुभवस्यापि स्वरसवाहितया
विरहात् स्वकल्पितनियमानुरोधेन तत्कल्पने चातिप्रसंगादित्याद्यपरितोषसूचनाय कथंचिदित्युक्तं न
नु यत्र नेतरमिवेवादीनां प्रयोग इति नियमो नास्त्येव उद्बाहुरिव वामन इत्यादौ व्यभिचारात् तल्लङ्गेपि सा
पत्तिरेवमत आह श्रौत्याअपीति यदि तु स्वनिष्ठसादृश्यप्रतियोगिनिषेधस्यैव प्रकृतोत्कर्षहेतुत्वमिति
स्वोक्तिरक्षणमात्रनिर्बन्धेन इवोक्तप्रतिज्ञाविरोधदोषमप्यनाकलय्योपमानलुप्तायाः श्रौतत्वमिष्टापत्ते
वपरिहर्त्तुमिच्छन्नाह इवादीति नन्वेतत्प्रथममेव दूषितं उद्बाहुरिव वामन इत्यादावुद्बाहुपदोत्तरमि
वादीनां प्रयोगेपि तद्धर्मस्योपमानत्वाभावादिति तत्कथं पुनरप्ययमेव दोष उद्भाव्यत इति चेत् सत्यं यथाह
षितार्थाभिप्रायमभ्युपेत्य तदस्वरसादुपमानलुप्तायाः श्रौतत्वमापादितं इदानीं तु तत्रेष्टापत्तिमप्यंशका
न्तस्यैव निष्कर्षः कथ्यते तथाहि यदुत्तरमित्यादि यत्पदार्थनिष्ठविशेषणतानिरूपितविशेष्यताशालि
त्वार्थकत्वमित्यर्थः इवादिपदार्थसादृश्यनिष्ठविशेष्यतानिरूपितविशेषणताशालिनोऽर्थस्योपमानत्व

ग्र.ही. नियमात् नक्षत्राण्यपि

५४

54

ग्रन्थकोष्ठ

अ॰ सी॰

५५

55

आरोपितेवापीति अनयवनमेवभ्रांतमनुभातिसर्वमित्यत्र सूर्यादीनांब्रह्मानुकारसमर्थनायअयोदहनयोःस्वरू
पसाम्याभावेऽपिक्रियासाम्यंभवत्येव यद्यपिदहनक्रियावह्निमात्रवृत्तिस्तथापिवह्नेःस्वरूपेणअयःपिंडेनारोप
णेतिनस्याउभयवृत्तित्वात्साम्यंइत्युपपादितंउत्तरमीमांसायांप्रथमाध्यायतृतीयचरणेवाचस्पत्यादिषु वास्तविके
ति वास्तवपदस्यभावप्रधानत्वमाश्रित्यतदस्यास्तीत्यर्थेठका अस्तिदंस्यादिति नचैवमापत्तिः तेजगत्प्रभजन्मादि
भ्रंवाचेंद्रकलाधरमितिचित्रमीमांसायामेवोपमात्वांगीकारात् अस्माभिस्तुनछेदस्यार्थिकमात्रंनिराकरिष्यतइ
त्यन्यदेतदितिभावः प्रयोगसत्त्वादिति अतिशयोक्तौचउपमानतावच्छेदकरूपेणैवउपमेयवोधाभ्युपगमेनउ
पमेयार्थकपदाप्रयोगादितिभावः सादृश्यपार्थएवेति यद्यपिसादृश्यार्थविहितानामप्युत्प्रेक्षातात्पर्यस्यानभवत्येवत
स्याअपिसादृश्योपजीवकत्वात् कस्तूरीतिलकंतिभालफलकेदेव्यामुखांभोरुहेरोलंवंतितमालवालमुकुलो
त्तंसंतिमौलिंप्रति याकर्णेविकचोत्पलंतिकुचयोरंकेचकालागुरुस्यासंतिप्रथयंतुतास्तवशिवश्रीकंठकंठ
त्विषइत्यादौउपमाप्रक्रमोत्प्रेक्षेत्यलंकारसर्वस्वकारादिभिरंगीकारात् तथाप्यत्रसंभावनार्थत्वेसाधकाभावा
दौत्सर्गिकसादृश्यपरत्वेनेवकल्प्यतइत्यभिप्रायः इदमेवस्फोरयन्नाह दिगिति अनयैवेति वाक्यपदस्यतद्धितानुपल
क्षकत्वेनतद्धितेपियोनकल्पनाभेदात् न्यायादयेदित्यर्थः द्वितीयेत्यनेनश्रौतीपक्षेनकर्मधाररूपभेदद्वयंगृह्यतइतिभ्र

मोमाभूदित्यभिप्रायेणाकर्तृकर्मपरत्वेन व्याचष्टे कर्तर्णमुलीत्यादि दृश्यएवेविद्यमानान्तंसिंहराकृणगजेंद्रकुंभस्था
यं मंदरधातुकलंकितवासुकिमंडलवन्मलंरविवं सेवकाद्येसाधं सूर्यमंडलेणान्तरंरक्तत्वमाघवर्णितं गजेंद्रपे
त्रावत: णिचक्कलंवन्मलेदेशी त्रयाणामपीति यद्यपित्रयाणांसमासेपिउपमानानिसामान्यवचनैरितियावदंशे
समासस्तत्रैवहितीयसमासःसर्वपदभागेउपमानत्वहितीयांशेपि तथाप्युपमेयस्याप्येकसमासांतर्गतत्वमि
त्यभिप्रायेणायंपृथगुपन्यस्तइतिध्येयं उक्तविभागेचित्रमीमांसोल्लाखितंसूत्रत्वमाशंकतेयद्यपीति दीपदर्शि
मितिकर्मणिणमुल् कीटनाशमितिकर्तरिणमुल् अंत:पुरीयतीत्याधार:काचित् कुमारीयतीतिकर्मकाचित् स्तंभाय
तइतिकाउ. कोकिलालापिनीतिणिनि: कुवलयश्यामलेतिसमास: एवंचवाचकलुप्तायांणिनिश्रुत्ययस्या
पिदीक्षितैर्गणनादत्रचतद्युक्तेस्सूत्रत्वमितिभाव: उपपदमिति उपमानरूपस्योपपदस्यणिनिश्रुत्यायांतेनस
मासादितिभाव: यद्यप्येवंणमुलोपिपृथगुपादानमनर्हं तत्राप्युपपदसमाससंज्ञावात् यदिचनत्रसमासस
त्वेपितस्योपमार्थकत्वाभावात् णमुलएवसादृश्यार्थेविधानात्पृथग्गणनंसादृश्यार्थकत्वेनैवात्रविभागकरण
दिसुच्यते तर्हिप्रकृतेपिणिनेरेवसादृश्यार्थेविधानं नतुसमासस्येतिणिनिरपिपृथगेवगणयितुमर्हइतितुल्य
तथापि अनव्ययसमासत्वमत्रविभाजकोपाधितयाविवक्षितं णमुलंतस्याव्ययत्वात्पृथगुपादानमितिरहस्यं

उपमानादाचारइतिसूत्रं उपमानात्कर्मणः सुवंतादाचारेर्थेक्यच्स्यात् कादंबिनीमिवसौदामिनीमिववाऽऽचरतीइ
त्यर्थः चलमवाभ्रमालानवुधैःकादंबिनीस्यनेतिहलायुधः तडित्सौदामिनीविद्युदित्यमरः अधिकरणेविभी
ति एवंसूत्रस्यवार्त्तिकादित्यर्थः ननुकर्तुःक्यङ् सलोपश्चेतिसूत्रेसकारलोपसंनियोगविशिष्टःक्यङ् सका
रांतादेवप्रातिपदिकात्स्यात् ननतस्त्वंचउकरायतेइत्यादावकारांतात्कथंक्यङ् नीमामाशंक्यांपरिहरन्सूत्रंव्याच
ष्टे उपमानादिति एवंसूत्रात्उपमानादाचारइतिपदद्वयानुवृत्तेः उपमानादित्यनेनरंकर्तुःसुवंतादितिपदद्व
यमपिकंबोध्यम् उपमानवाचकेति तथाचशकाभेदात् चकारस्यचप्रत्ययविशिष्टत्वात्प्रत्ययःसर्वतोपिभ
वति सलोपस्तुसकारांतस्यैवेतिनदोषइत्यर्थः यद्यपिक्यङादयोवैकल्पिकाःपक्षेवाक्यस्यापिइष्टत्वात्
तथापिप्रकृतानुपयोगाद्विकल्पोत्रसूत्रार्थमध्येनोक्तःइतिज्ञेयं भेदादाविति मेघादेरुपमानस्यप्रतियोगित्वेन
भेदेनिरूपकत्वमेवहृत्तित्वसंबंधेनाभ्युपगमात् प्रत्ययार्थेति प्रकृतिप्रत्ययौसहार्थंब्रूतःइतिकात्यायनोक्त्या
प्रकृतिप्रत्ययान्यतरार्थनिष्ठविशेष्यताप्रकारताऽन्यतरसंबंधेनबोधंप्रतिविशेष्यतासंबंधेनतदन्यतरजन्योप
स्थितेःकारणत्वकल्पनात् प्रकृतेचमेघादिनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेनशाब्दबोधस्यभेदादावुत्प
त्तेःप्रकृतिप्रत्ययान्यतरजन्योपस्थितेश्चतत्रविशेष्यतासंबंधेनाभावात् भेदादीनांइवपदार्थत्वाभ्युपगमादित्यर्थः

वृत्तित्वरूपस्यैवपदार्थस्यआचारान्वयमप्युक्तरीत्याहृष इति प्रत्ययार्थ इति प्रत्ययार्थनिष्ठविशेष्यतानिरूपित
विशेषणतासंबंधेनशाब्दबोधंप्रतिविशेष्यतासंबंधेनप्रकृतिजन्योपस्थितेः कारणत्वकल्पनात् चैत्रः पचतीत्य
त्रप्रकृतेश्चैत्रविशेषणत्वेनभानात् प्रत्ययार्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधः कार्यतावच्छेदकतयात
निवेशनीय इतिप्रत्ययार्थनिष्ठविशेष्यतेत्यादिकमेवोक्तं प्रकृते च प्रत्ययार्थे आचारे वृत्तित्वादेरिवार्थस्यान्वया
त् वृत्तित्वेप्रत्ययार्थनिष्ठविशेष्यतानिरूपितविशेषणतासंबंधेनशाब्दत्वरूपकार्यतावच्छेदकावच्छिन्नोसम्भा
नस्यैवापदार्थत्वेनप्रकृतिजन्योपस्थितेस्तत्राभावेनव्यभिचाराप्रसक्तेरितिभावः वचनसामर्थ्यादिति यद्यप्यन्व
येआकांक्षैवबीजं न तु वचनं तथापि वचनरूपप्रमाणोपष्टंभेनतथैवाकांक्षोन्नीयत इति तात्पर्यं तथा च मेषा
देः साक्षादाचाररूपप्रत्ययार्थानन्वयेपिभेदादिविशेषणतापन्नस्यप्रकृत्यर्थस्य मेषादेः परंपरयातत्रान्वयस
त्वान्नदोषः अतएवप्रकृत्यर्थान्वयमात्रव्युत्पत्तेः सचयथाकथंचित्संबंधमात्रेणेति इष्टोपायविवरणेमिश्रैरप्यु
क्ताविनम् एवं च स्थलविशेषे प्रकृत्यर्थप्रकारकबोधंप्रतिप्रत्ययार्थान्वयार्थकपदजन्योपस्थितेरपिविशेष्यता
संबंधेनकारणतावच्छेदकीकृत्यकार्यकारणभावः कल्प्यप्रामाणिकत्वादतएवनातिरात्रेषोडशिनंगृह्णातीत्य
त्रषोडशिग्रहणाभावइष्टसाधनमितिबोधोदीधितिकारादिभिः स्वीकृत इतिभावः द्वितीयदोषंव्यभिचारेणदूष

ग्र॰टी॰
५८
५७

यत्ति आख्यातार्थेति चेन्न: पचतीत्यत्र पाकानुकूलवर्त्तमानकृतिमांश्चैत्र इति बोधात् कृतिवर्त्तमानत्वयो: प्रत्य
यार्थयोरपि परस्परमन्वयात् प्रत्ययार्थनिष्ठविशेष्यतानिरूपितविशेषणतासंबंधेन शाब्दत्वावच्छिन्नस्य वर्त्त
मानत्वेपि सत्त्वात् प्रकृतिजन्योपस्थितेश्चात्र विरहादिति भाव: नचैवमप्युक्तसंबंधेन शाब्दत्वावच्छिन्ने प्रकृति
स्ववाचकप्रत्ययान्यतरजन्योपस्थितेरेव हेतुत्वं कल्प्यते वर्त्तमानत्वस्य प्रकृतिजन्योपस्थितिविशेष्यताभावे
पि वर्त्तमानत्ववाचकप्रत्ययजन्योपस्थितेर्विशेष्यतासंबंधेन तत्र सत्त्वात् ततश्च द्वावर्थ इति तस्याख्यातार्थप्रत्य
यार्थे:न्वयो न युक्त: इति तस्य प्रकृतिप्रत्ययान्यतरार्थत्वाभावादिति वाच्यं प्राभाकरनयेन न कलंजं भक्षयेदि
ति वाक्ये कलंजभक्षणाभावविषयकं कार्यमिति बोधाभ्युपगमात् कार्यस्य तन्मते लिङर्थत्वात् प्रत्ययार्थ
निष्ठविशेष्यतानिरूपितविशेषणतासंबंधेन शाब्दत्वावच्छिन्नस्य नञर्थाभावे व्युत्पत्तेस्तत्र प्रकृतिजन्योप
स्थिते: स्ववाचकप्रत्ययजन्योपस्थितेश्चान्यतरस्याप्यभावेन तथापि व्यभिचारप्रतीकारविरहात् किंच तन्नञर्था
ध्वायोग्यभावकारणताविचारावसरे नानुपमृद्यप्रादुर्भावादिति न्यायसूत्रम् अनुपमृद्यकारणमविनाश्य प्रादु
र्भावो न भवति कार्यस्य नहि बीजमनुपमृद्याङ्कुर: प्रादुर्भवति अत: कार्यकाले कारणस्य सत्त्वविरहादभावस्य
कारणत्वमागतमेवेति तस्यार्थ: तत्र नानुपमृद्यप्रादुर्भावो यतस्तस्मादिति व्याचक्षाणो वाचस्पतिमिश्रैर्दीधिति

५८

कारादिभिरुक्तंकंठवेणैव प्रादुर्भावस्य नञर्थान्वयं कृत्वा नञर्थस्य पंचम्यर्थहेतुत्वान्वयः स्वीकृतः अनुपलब्धप्रादुर्भावा
भावादिति न तथा च हेतुत्वं न त्वनुपपन्नयार्थो निरुक्तविशेष्यतानिरूपितविशेषणतासंबंधेन शाब्दस्य नञर्थाभावेऽस्तु तस्मा
नस्य च प्रकृतिप्रत्ययार्थयोरनयोरर्थत्वाभावेन तद्वीरप्येव व्यभिचारः एवं तेषां मोहः पापीयान् मूढस्येतरेभ्यो नेरिति
सूत्रे ः पि इतरोऽन्यस्य भावादिति न्वयबोधाभ्युपगमात् न तु तत्रापि प्रादुर्भावपदोत्तरपंचम्यर्थहेतुत्वे नञ
र्थाभावस्य नान्वयः किं तु नञ्पदोत्तरपंचम्यर्थ एव तथा च नञोहेतुत्वार्थकपंचमीप्रकृतित्वेनाभावे प्रकृति
पश्चिनिरस्त्वेवेति न व्यभिचारः न च नञुत्तरं पंचमीश्रवणापत्तिरिति वाच्यं अव्ययादाप्सुप इत्यनुशासनेन बले
न तस्या लोपसंभवात् न च प्रादुर्भावपदोत्तरपंचम्या अनन्वयापत्तिरिति वाच्यं तस्याः प्रतियोगित्वार्थकत्वा
त् न च प्रतियोगित्वस्य संसर्गतयैव भानात् नैदयर्थमेव निपातातिरिक्तनाम्नार्थयोर्भेदान्वयस्वीकारादन्य
था घटो नोत्पादावनुपपन्नेति वाच्यम् तथापि साधुत्वार्थसंभवात् नैवम् अव्ययोत्तरविभक्तेरेव साधुत्वार्थ
त्वात् प्रथमैकवचनमेवाव्ययेभ्य उत्पद्यते तस्यैव लोप इति पदस्यैव महाभाष्यकारैः सिद्धांतितत्वात् न
ञुत्तरं पंचम्युत्पत्तौ प्रमाणाभावात् यत्तु एवकारस्य तदन्वयिपदसमानविभक्तिकत्वमिति लीलावतीशि
रोमणौ प्रतिपादितं तत्र अव्ययेभ्यः सर्वविभक्त्युत्पत्तिरिति अभ्युपगमयपदमाश्रित्य समर्थनीयम् न चैवं स्वः

ग्र॰टी॰
५८
58

पक्षेएतादृशस्वरादीनांकर्मत्वप्रतीतिःकथमितिवाच्यं तेषांसत्त्ववाचित्वेनसर्वविभक्त्युत्पत्तेः नचैवंअव्ययत्वंनस्याद
सत्त्ववाचित्वेपिएवंतथात्वादितिवाच्यं पाठसामर्थ्यादव्ययसंज्ञाप्रवृत्तेः एवंच यथोक्तव्यभिचारःस्फुटएवेत्यलम
तिप्रपंचेन एवमध्याहृतस्य इवपदस्यभेदादिकमर्थः इतिस्थिते संप्रतिभेदोपिकाङादेरेवार्थइतिजयरामभट्टा
चार्यमतमाह अत्रवदंतीति पौरमिति काव्यप्रकाशोपन्यस्तोदाहरणाभिप्रायेण पौरंसुतीयतिजनंसमरांत
रेसावंतःपुरीयतिविचित्रचरित्रचंचुः नारीयतेसमरसीम्निकृपाणपाणेरालोक्यतस्यचरितानिसपत्नसेना
सुतीयतीतिकर्मकाच अंतःपुरीयतिइत्यधिकरणकाच नारीयतइतिकाङ्. इतित्रयाणामेकश्लोकएवोदा
हरणम् काङादीनामिति आदिपदात्क्यच्संग्रहः विचारसाम्यसूचनाय स्वयंकाङ्. प्रत्ययेवोपयुक्ताकाङा
दीयतद्धितप्रत्ययमुपन्यास इति आचारमात्रेति मात्रपदात्भेदव्यवच्छेदः सुताद्यन्वितेति प्रत्ययार्थस्यप्रकृत्यर्थे
नैवसमन्वयस्थितनाकांक्षत्वेननतदन्वयस्योत्तरंगत्वात् पौरादीति एककर्मान्वयादेवनिराकांक्षतयाकर्मनिराकां
क्षाविरहात् नचप्रत्ययार्थाचारस्यनिराकांक्षत्वेपि पौरमित्यादिपदाकांक्षयैवतदन्वयःस्यादितिवाच्यं अन्वयप्र
तियोगिनामर्थेऽन्यतरस्यनिराकांक्षत्वेपरपदार्थानन्वयात् तदुक्तमाचार्यचरणैः नचान्यतराकांक्षान्वयवीजं
अपितूभयाकांक्षेति शाब्दत्वेउभिप्रेरणुक्तं ह्याकांक्षायांचान्वयधीर्नत्वन्यतराकांक्षायामिति सुताद्यनन्वितेतितथाचआचारस्य

५८

कर्मानन्वयेनतस्याकांक्षितत्वात् नत्रपौरमित्यादौभामन्वयोपपत्तिरितिभावः नचैवंपौराद्यन्वयसंभवेपिस्तनादिप्रकृ
त्यर्थानन्वयतादवस्थ्य निराकांक्षत्वसाम्यादितिवाच्यम् पौराद्यन्वयोपपादनमात्रेतात्पर्यात् तदाकांक्षायाश्चोत्तर
गत्वेनउत्तरत्रान्वयस्याभिप्रायाद्वा प्रकृत्यर्थेति प्रत्ययार्थान्वयितविशेष्यताप्रकारकान्यतररहितप्रत्ययार्थ
स्यपदार्थान्तरान्वयानर्हत्वात् अन्यथेति प्रकृत्यर्थान्वयिनस्यापिप्रत्ययार्थस्यपदान्तरार्थान्वयस्वीकारेनथः
नपचतीति पाकानुकूलकृत्यभाववानित्यर्थः चैत्रःकृतिमानिति चैत्रविशेष्यकपाकानुकूलकृतित्वा
वच्छिन्नप्रतियोगिताकाभावप्रकारकबोधज्ञानस्यचैत्रविशेष्यककृतित्वावच्छिन्नप्रकारताकबोधंप्रत्य
विरोधित्वात् नीलदंडाभाववानितिज्ञानस्येवदंडवानितिज्ञाने बाधबुद्धौप्रतियोगितावच्छेदकतापर्याप्त्यधिक
रणंयोधर्मस्तद्धर्मावच्छिन्नप्रकारताकज्ञानत्वस्यैवप्रतिबध्यतावच्छेदकत्वात् तादृशंचात्रपाकानुकूल
कृतित्वं प्रकारतावच्छेदकंनतुकृतित्वमेव नत्वप्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणमेव अतश्चैत्रः
पचतीतिवाक्याच्चैत्रः कृतिमानितिबोधस्तादृशबाधकालेपिदुर्वारः उक्तनियमस्वीकारेतुपाकरूपप्रकृ
त्यर्थान्वितायाः कृतेश्चैत्रादावन्वयासंभवात् पाकानुकूलकृतिमानितिबोधस्यचयथोक्तप्रतिबंधक
त्वसत्वेनानुत्पादात्तादृशबाधकालेतद्वाक्यस्यनवाक्यार्थबोधजनकत्वमित्यर्थः एवंचपदान्तरार्थनिष्ठ

अ॰टी॰ ५९ 59

विषयतानिरूपितविषयतासंबंधेनशाब्दबुद्धित्वावच्छिन्नंप्रतिप्रकृत्यर्थावच्छिन्नविषयतानिरूपितविषयतासंबंधे
नप्रत्ययजन्योपस्थितिःकारणमितिपर्यवसानात् अतः स्तनाद्यनन्वितस्यैवाचारस्यपौराद्यन्वयानर्हत्वादाचारेप्र
थमंस्तनादिप्रकृत्यर्थान्वयाभ्युपगमेचनिराकांक्षत्वान्नचपौराद्यनन्वयतादवस्थ्यमितिफलितार्थः ननुचैत्रो
नपचतीतिबाधज्ञानसत्त्वेचैत्रःपचतीतिवाक्याच्चैत्रःकृतिमानितिबोधानुत्पादेपिप्रकृतेप्रथममाचारेपौ
राद्यन्वयःस्यादेव नचपश्चादपिकृतेःप्रकृत्यर्थान्वयविरहात् अत्रचपौराद्यन्वयानन्तरंस्तनादावपितदन्व
याभ्युपगमेनवैषम्यात् यत्तुप्रकृत्यर्थानन्वितप्रत्ययार्थस्याप्यत्रनान्वयइत्युक्तं तदकिंचित्करं देवदत्तेनदृ
ष्टइत्यादौदेवदत्तकृतिविषयदर्शनविषयइतिबोधदर्शनात् निष्ठाप्रत्ययविषयस्यतृतीयार्थकृत्यन्वयान
न्तरमेवप्रकृत्यर्थदर्शनान्वयाभ्युपगमात् तथाचोक्तयुक्त्याप्रसिद्धमेवलिखित्वाद्यस्थितेत्यादौत्वाप्रत्यया
र्थस्याव्यवहितपूर्वकालस्याद्यतनेनसममभेदान्वयःसमर्थितोऽस्माभिःकिरणावल्युपायविवरणेपक्षधरमिश्र
जलदठक्कुरादिभिस्तुस्मात्प्रकृतिप्रत्ययार्थयोःपरस्परान्वयएवआवश्यकोनतुप्रकृत्यर्थान्वयास्तुसर्वप्रत्ययार्थ
स्यान्यत्रान्वयोपितावतैवनपचतीतिबाधकालेपचतीत्यस्मात्कृतिमानितिबोधवारणादित्यपरितोषादाह
किंचेति कजादिशक्तीतिकजादिनिष्ठशक्तीत्यर्थः नचगौरवमिति शक्तिकल्पनमपेक्ष्यःप्रत्याहारएवलाघ

५९

वादित्यर्थः इच्छादिशक्तीति इच्छादिविषयकशक्तीत्यर्थः विलोपापत्तेरिति नचेष्टापत्तिः तद्वाचकत्वस्यैव भाष्य
काराद्यभियुक्तसंमतत्वात् अत एवेति भेदस्यापि कर्जाद्यर्थत्वादिति भावः यद्यपि भेदस्य इव पदार्थत्वेपि सुतं
स्तुनीयतीत्यादिप्रयोगापत्तिर्नास्त्येव सुतादिभेदस्य सुताद्यन्वयानर्हत्वसाम्यात् तथापि कर्जादिस्थले भेदोवश्यं
प्रतीयत इत्यत्रैवायमुपष्टंभः सचलाघवात्कर्जाद्यर्थ एवेत्युक्तमित्यप्येतेन न सुतभिन्नेति अत्र प्रकृत्यर्थस्य सु
तादेः प्रतियोगितया प्रत्ययार्थे भेदेन्वयस्य विशेषणतासंबंधेन उपमेये पौरादौ तस्य हृत्तित्वे द्वितीयार्थे न्वयस्य सु
त्वविशेष्यभूते द्वितीयाचारे पुनः प्रकृत्यर्थस्य सुतादेः प्रथमाचारे एवं सुत भिन्न पौरादिहृत्तित्वविशिष्टस्य सु
त विषयकाचारजातीयाचारस्य धात्वर्थस्य प्रकृतान्वय इति क्रमः एवं च पक्षत्राचारे प्रकृत्यर्थस्यान्वय पक्षेत्र च पौरा
देरिति उभयत्रान्वयापपत्तिः यदजेत्यापस्थितिभेदस्य सत्वादिति फलितार्थः सादृश्यविशेष्यकेति कर्जादि
प्रकृत्यर्थस्य उभयमानत्वनियमात् यत्र सादृश्यविशेषणीभूतस्योपमानत्वनियमस्तत्रैव श्रौतीति इवमेत त्म
तव्यवस्थापनादित्यर्थः इवेणोपमेति कर्जादीनामेव सादृश्यार्थकत्वेन तेषां श्रूयमाणत्वेन च वाचलमत्वाभा
वादित्यर्थः नदेवदर्शयति नत्विति विवरणेति यद्यपि विवरणेऽमनुमानविधया कर्जादीनां सादृश्यार्थबोधवि
षयत्वविरहितेऽर्थस्य वाचकत्वपदेन तद्वाक्यार्थेव्याख्यायने इति नात्ययीत् नच सादृश्यप्रत्ययविवादाभावात्तत्र

169

प्र.टी.

६०

60

कृतं साधकोपन्यासेन किं सादृश्यं कर्मजादेरेवार्थः उत अध्याहृतस्य इवपदस्यान्यत्रैव विप्रतिपन्नेरिति वाच्यम् सादृश्यप्रत
ये उक्तरीत्या दृष्टीकृतेन कर्मजादीनामेव तत्र शक्तिकल्पने च तेषां तद्वाचकत्वस्य कल्पितत्वान्न तत्र एव तत्प्रतीतेर्लाघवादि
त्यभिप्रायात् अत एव सन्नन्तप्रत्ययादेरिच्छादिशक्तिविलोप इति वदितस्याह आचारेइत्यादि सचेति आचारस्य क
जर्यताप्रतिपादकः सूत्रार्थ इत्यर्थः अविरुद्ध इति इवाध्याहारे पि कर्मजादीनामाचारार्थकत्वाद्दूषणादित्यर्थः सन्नन्त
याद्यस्य वैषम्यमाह नहीति तथा च इच्छायाः स्थानीये सूत्रोपात्ते आचारे मया शक्तिरभ्युपगम्यत एव सादृश्यं तु प्रतीय
मानं किं अध्याहृतपदार्थः उत प्रत्ययार्थ इति वीतायां प्रत्ययशक्तिकल्पने गौरवादनुशासनविरोधाच्च भेदाध्युप
स्थितिरध्याहृतादिवपदादेव युक्तेति भावः किं च स्तनाद्यन्विते आचारे पौराद्यन्वयासंभव इत्युक्तं प्रथमं उक्तरीत्या
स्तनादिप्रकृत्यर्थान्विते आचारे पुनः स्तनाद्यन्ता धातव इति वचनेन कर्मजाद्यन्तस्य स्तनीयेत्यस्य धातुसंज्ञायां स
त्यां विशिष्टे तत्र पौरादिकर्मकत्वान्वयसंभवात् स्तनमिवाचरतीत्यनेन धात्वर्थेन कर्मान्तरस्यावश्यमाकांक्षितत्वा
दिति ध्येयं तत्राह दिगिति चंडीदासादय इत्यादिपदेन तदनुवादिन्याहित्यदर्पणादिसंग्रहः वाचकत्वसंदेहादि
ति तेषां द्योतकत्व इति वैयाकरणाभ्युपगमात् समुदितमेवेति पदस्फोटाभिप्रायकं राममित्यत्र इवपदस्य वा
मप्रकारककर्मत्वविशेष्यकबोधजनकत्वम् ननु रामपदेन रामस्य च प्रत्ययांशेन च कर्मत्वस्य प्रतिपादनमिति

६०

तत्राभ्युपगमात् स्वस्वार्थेति उभाभ्यां प्रत्येकं स्वस्ववाच्यार्थोपस्थापनेन तदन्वयबलेन विशिष्टप्रतीतिसंभवादिति
नैयायिकैरंगीकृतत्वात् तदप्यनपेक्षेति इवाद्यर्थपदसादृश्यमिति व्यवस्थापनादेवेत्यर्थः साधकाभावमुक्त्वा
बाधकमप्याह किंचेति अधिकारः इति ननु उपमानादाचारे इति सूत्रस्य क्यच्प्रत्ययविधायकत्वात्कथमधिकार
त्वोक्तिः कार्यविशेषोपादानेन परार्थत्वाभावात् सत्यम् स्वयं क्यच्प्रत्ययविधायकत्वेपि कर्त्तुः क्यङ्.त्वादा
वुपमानादाचारे इति पदद्वयानुवृत्त्यानत्वात्वोक्तेः अत एवाह सूत्रांतरैकवाक्येति परंत्वचङीदासंयोथेक्यङ्.
प्रत्ययमेवोपक्रम्य विचारात्तद्विधेयैकवाक्यतापन्नत्वमुक्तेनैव उपमानादाचारे इति सूत्रस्य मुद्राविते नस्यादिति
इवादिप्रयोगादेव सादृश्यप्रतियोगित्वरूपोपमानत्वनिर्वाहात् सदृशाचारस्य क्यजाद्यर्थत्वेनतन्नरमुपमा
नत्वप्रतीतावपि तदुत्पत्तिदशायां तथा नस्यात् नच तत्सामर्थ्यादेव क्यङ्.प्रत्ययादीनां सदृशाचारार्थकत्वसि
द्धिरिति तन्न तद्वैयर्थ्यमिति वाच्यं एवमपि सदृशाचारे इत्येव सूत्रन्यासापत्तेः अस्मदीत्याच यथान्यासमेव सूत्रो
पपत्तेः उपसंहारं ग्रंथपर्यालोचनया जयरामभट्टाचार्याणामपि इवाद्यध्याहारनिरासनिर्बंधोनात्युतीतिप्र
तीयत इत्यभिप्रायवानाह क्यजादीनामिति लक्षणयेति एवं हि तत्र स्वीकृतम् क्यङ्.र्थाचारो धर्मस्तत्र उपमा
नपदस्य तन्निरूपितसादृश्ये लक्षणा सादृश्यं च पदार्थांतरत्वेन. येन स्वप्रयोजकतासंसर्गेण समानधर्मात्मक

प्र॰टी॰
६१
61

त्वत्वभेदसंसर्गेण धर्मेऽन्वयः तस्याश्रयतयोपमेयेऽन्वय इति एवं "च सादृश्ये शक्त्यभावाद्वाचकलुप्तत्वमिति भावः
विशिष्टस्यैव पदस्य विशिष्टार्थे शक्तिरिति पदे सादृश्येपि शक्तिसत्वात्कथं वाचकलुप्तत्वमित्याशंक्याह समुदाय
स्यैवेति एतावानर्थः प्रकृतेरेतावान्प्रत्ययस्येति विभागस्याज्ञानभ्युपगमात् सादृश्येपति श्रौतोपमायां सादृश्य
मात्रवाचकपदसत्त्व आर्थोपमास्थले तु सादृश्यविशिष्टार्थमात्रवाचकसदृशादिरूपपदसत्त्वमिति तत्र वाच
कत्वस्यापि सत्त्वात् न तदन्यतरमात्रवाचकत्वमिति वाचकलुप्तत्वमव्याहतमिति भावः किंचोपीति नन्वप्रकृ
तेः सादृश्ये लक्षणायामपि तस्य वाचकलुप्तत्वे किं बाधकं सादृश्ये तस्य शक्त्यभावात् तावतैव एतन्मते वाच
कलुप्तत्वव्यवहारात् तथा च रसगंगाधर एव कुचकलशोच्चवलानामलकायामथ पयोनिधेः उल्लिने दिति
नाथकीर्तयस्ते हारंति हंसंति हीरंति इति किंवेन वाचकधर्मलुप्तामुदाहृत्योक्तं न च हारादिशब्दालक्षणया हा
रादिसादृश्यं बोधयंति लुप्तोपि स्तनः किं वाचारमिति पदेपि वाचकधर्मलोपः स्पष्ट एव हारादिशब्दा एव लक्ष
णया तादृशसादृश्यप्राभिमोत्रे चरमिति पदेपि सादृश्ये च धर्मस्यापि बोधात्तन्मात्रबोधकाभावाल्लोप एवेति न
त्वोपमनुपालंभ इति चेत् उच्यते सादृश्ये लक्षणास्वीकारेपि वाचकलुप्तत्वानुपपत्तेरित्यरविंदसुंदरं मुखमि
त्यत्र हाकारो बोधविचारावसरे प्रपंचिततत्वात्तदभिप्रायेणात्रकाट्. किंवादिसाधारण्येनानुपपत्त्यनुज्ञापनात्

६१

समुदायस्यैवविशिष्टार्थेशक्तिरितिपदेपिसादृश्यमात्रबोधकत्वाद्वाबोद्धावाचकलोपएवेतिद्वितीयपदंदूषय
ति वाचकमात्रेति इदंचकाङादिकमेवाधिकृत्यबोध्यम् किंचवाचकमात्रलुप्तताभावापत्तेरिष्टापत्त्यैवपरि
हारात् नचोभयलुप्ततांगीकारेणएकमात्रलुप्तत्वानंगीकारात् ननुकाङादिकमधिकृत्यरसगंगाधरोपरिनेदम
निष्पादनम् काङादावपिनेरुभयलुप्ततांगीकारेणवाचकमात्रलुप्तताभ्युपगमात् तथाहिक्वचकाङ
वीचकलुप्तोदाहरणत्वेप्राचीनोक्तमयुक्तमेव तन्मात्रलुप्तायाएववाचकलुप्तपदार्थत्वात् अत्रचधर्मलोप
स्यापिसंभवेनद्विलुप्तांतर्भावस्यन्याय्यत्वात् नचकाङादयुक्ताचारएवसामान्यधर्मोस्तीतिवाच्यंधर्ममात्ररूप
स्याचारस्योपमायामप्रयोजकत्वात् नारीयतेसमरसीम्निसपत्नसेनेत्यादौप्रकारांतरेणोपस्थितानांकांत
त्वादीनामाचाराभेदाध्यवसायेसत्त्वेवसाधारणस्वीकारात् अन्यथात्रिविष्टपंतत्त्वलुभारतायतेइत्यादौसु
प्रसिद्धत्वादिरूपाचारोपस्थितिमात्रेणोपमानिःपत्तिप्रसंगात् नचेष्टापत्तिरनुभवविरोधात् सुपर्वभिः
शोभितमंतराश्रितैरित्यादिबोधोत्तरमेवतदुल्लासात् अतआचारमात्ररूपोधर्मोनोपमानिर्वाहक इतिधर्म
लोपएवावश्यकः उपमाप्रयोजकतावच्छेदकरूपेणधर्मवाचकपदस्यानुपात्तस्यैवधर्मलोपशब्दार्थत्वात् अत
एवामुखरूपमिदंवस्तुमकुलमिवपंकजमित्यादौवस्तुत्वादिरूपधर्मोपादानेनश्रौतोपमापत्तेरित्यत्रैव

स्यापितत्वात् अतः काकादावुभयलुप्तत्वापादनमेवेति कथं लक्षणत्वेन तदुपन्यास इति चेत् सत्यम् तथापि प्राची
नमतानुसारिलक्षणायां तत्र तथाव्याख्यानत्वेन तदानीं यथोक्तस्यानिष्टापादनपर्यवसानसंभवेन दोषत्वेनोद्भा
वयितुमर्हत्वात् अवशिष्यते तु परमार्थतोऽत्र कथं वाचकमात्रलोप उक्तरीत्या धर्मलोपस्यापि सत्वादिति तदेत
च्चण्डीदासेनाप्युद्भावितमेव तथा चाह वस्तुतस्तु सतीयतीत्यादौ स्नेहनिर्भरत्वादेर्गम्यमानतया धर्मलोपोदाहर
णान्यत्रेति एवंविधविचारविरहदशायामपि चोभयलोपोदाहृतियोग्यानीति काकादीनामेवौपम्यप्रति
पादकत्वमिति व्यवस्थाप्य तदनन्तरमयं ग्रन्थः तथा च वाचकस्य सत्वाद्धर्मस्य चानुपादानाद्धर्ममात्रलोपोदाह
रणत्वमेव युक्तं यद्यपि काकादीनामौपम्यार्थकत्वपर्यन्तं न विभाव्यते तथापि धर्मस्याप्युपमानिर्वाहकस्यानु
पादानादुभयलोपोदाहरणत्वं सर्वथापि न वाचकमात्रलुप्तत्वमिति तस्यार्थः तत्कथं नात्र धर्मलोपोऽपीति
तत्रायं प्राचामभिप्रायः धर्मत्वव्याप्यरूपेण धर्मबोधकपदोपादानस्थले न धर्मलोपो वक्तुं युक्त इवादि
पदैस्तु धर्मत्वरूपेणैव तद्बोध इति चन्द्र इव मुखमित्यादौ धर्मलुप्तमव्याहतं व्याप्यत्वं च तदतिरिक्तत्वमात्रं
न तु न्यूनवृत्तित्वं वस्तुत्वादेः केवलान्वयिधर्मस्योपादानेन तस्य धर्मता न्यूनवृत्तित्वानुपपत्त्या धर्मलोपाप
त्तेः। न चैवं मुखरूपमिदं वस्तु घट इव पटो द्रव्यमित्यादेरपि प्रसक्तोपमात्वं स्यात् ॥ ॥

वस्तुत्वद्रव्यत्वादिरूपेणधर्मोपादानसत्त्वादिति वाच्यं दृष्टापत्तेः तथा हि किमत्र उपमात्वं आपाद्यते उत प्रकर्ष
त्वं आहोस्विच्चमत्कारः नाद्यो दृष्टत्वात् नान्त्यः आपादकाभावात् प्रकर्षत्वस्य उपमात्वस्य वा चमत्कारप्रयोजक
त्वविरहात् किं तु विषयविशेषस्यैव तथात्वात् यत्तु त्रिविष्टपं तत्त्वखलु भारतनायते इत्यादौ सप्रसिद्धत्वादिरूपा
चारोपस्थितेर्नाउपमातिःपत्तिप्रसंग इति तदप्यसत् तत्रापि उपमानिष्पत्तौ बाधकाभावात् परं तु सपर्वत्वादि
धर्मप्रयुक्तसादृश्यप्रतीतावेव चमत्कारोल्लासो न तु प्रसिद्धत्वादिप्रयुक्ततद्बुद्धिमात्रात् तत्रोपमायाः पर्यवसितिः प
त्तौ उपमानादावारइत्यादिसूत्राणां ग्रन्थभवस्य च विरोधापत्तेः न हि काण्डादिस्थले धर्मलोपस्वीकारेणापि नास्त्रो
पमातिःपत्तिरिति वक्तुं शक्यं धर्मलुप्तोपमाया उदाहरणत्वं काण्डादीनामिति तेनापि स्वीकृतत्वात् धर्मलोपोदा
हरणानीति वंशीदासग्रन्थस्यापि हि लुप्तोपमान्तर्भावस्य न्याय्यत्वादिति रसगंगाधरग्रन्थस्य च प्रागेवोपन्यासात् न हि
व्यापकधर्मानवच्छिन्नस्य तद्व्याप्यधर्मावच्छिन्नत्वं वक्तुमर्हति पृथिवीत्वाद्यनवच्छिन्नस्य जलादेरपि पृथिवीवि
शेषमध्ये परिगणनस्यानुक्तिसहत्वात् न च नारीयत इत्यादावेव तैरूपमातिःपत्तिरभ्युगतानन्तु भारतायत इ
त्यादाविति वाच्यं विशिष्यधर्मानुपादानस्योभयत्राप्यविशेषेणैव सम्यगनुपपत्तेः तस्मान्नारीयत इत्यादावावा
रस्यैव धर्मत्वाद्विषयविशेषमहिम्ना चमत्कारोल्लासाच्च न धर्मलुप्तत्वं इदं च सूत्रकर्तुर्भगवतः पाणिनेरप्यभि

मतं तस्याचाररूपस्यधर्मस्यसादृश्यानुपपादकत्वेउपमानादाचारेइतिसूत्राणामुक्तिसंभवः वस्तुतस्तुतत्रउपमानो
पमेयसमभिव्याहारवशात्काङ्.ादिभ्योविशेषप्रकारेणैवआचारोपस्थितिर्भवति आचारेइतितुनानाविधशाक्य
नावच्छेदकानुगममात्रंनतुतेनरूपेणशाब्दबोधोपि तदादिपदेषुबुद्धस्थत्वादिवत् नारीयतइत्यादौचकारान्तरत्वादे
र्नारीधर्मस्ययथोक्तसमभिव्याहारवशाल्लाडुक्करीत्यालाभइतिनधर्मलोपापत्तिः यथाह्युपमानादित्युपमानत्वे
नरूपेणनानाविधानांसंग्रहः तथाआचारत्वेनरूपेणतद्धर्माणामपि एतावांस्तुविशेषः यत्रधर्मःप्रसिद्धस्त
त्रतदुपादानमनावश्यकं यथाहंसायतेनायिकेति क्वचित्स्पष्टार्थंतदुपादानयोगोपि हंसायतेचारुगतेनकांतेयमा
दौ यत्रतुनतथाप्रसिद्धिस्तत्रतदुपादानमावश्यकं यथाचित्रविहंगपन्नत्वखलुभारतायतेइत्यादौसत्पर्वभिःशोभि
तमित्यादेः नचैवंतादृशानुभवेमानाभावः आचारत्वेनैवतदुपस्थितेरितिवाच्यं तावन्मात्रस्यसादृश्यानिर्वाह
कत्वमितित्वडुक्करीत्यासूत्राद्यसंगत्यापत्तेः तदाशयेनैवप्राचीनैरपिकाङ्.ादीनांधर्मवाचकत्वांगीकारात्
अतएवतत्रभाष्यकारैरपि कुटीयतिप्रासादेप्रासादीयतिकुट्यामितिधमार्थकशंकानरहीनमेवोदाहृतं
एवंआजायमानेयोअहिंजयोनेतिभाष्योदाहृतस्फुतावविततथैवप्रयोगः ॐजः पदंलक्षणयानहन्यते अहिर्हि
त्रासरेसर्पेइत्यभिधाने तदेवमुपन्यस्तनानाप्रमाणानुगृहीतानुभवबलात्स्वीकुरुवाआचारमात्रस्योपमा

निर्वाहकत्वं प्रतिजानीहि वा कडारादिभ्यो विशेषप्रकारकं बोधमिति सर्वथा कडारादयो धर्मवाचका इति सिद्धमि
त्यलमतिनिर्बंधेन प्रकृतमनुसरामः कडारादीनां सादृश्यबोधकत्वनिरासाय मतान्तरमाह उपमानेति एत
न्मतेन जयरामभट्टाचार्योक्तं दूषणमाह अत्रापीति अन्वेषणीय इति समानधर्मस्यैव नैयायिकमते सादृश्यप
दार्थत्वाभावादिति भावः मीमांसकमतमवलंब्य पूर्वमतं योजयति उभयत्रेति उपमानादिति यद्यपि उपमा
ने कर्मणि चेत्येव सूत्रस्वरूपं कर्मणि कर्तरि चोपमाने उपपदे धातोर्णमुल्भवतीति सूत्रार्थः तथापि कर्मणि
चेत्यंश एवात्र सूत्रस्वरूपकथनपरः तेन चैकदेशद्वारा उपमाने कर्मणि चेति सूत्रं विवक्षितं उपमानादिति
त्व उपमानोपपदाद्धातोर्णमुलित्यत्रान्वीयते यद्वा उपमानं यत्र तत्र प्राप्नोति स्वप्रकृतिभूतधात्वानुपूर्वं वर्तित्व
संबंधेनेति शेषः धातोः किं प्रत्यये प्रथमान्तमेव णमुलो विशेषणं यद्वा उपमानशब्दो भावव्युत्पन्नस्तस्मात्सादृश्य
परः अन्यत्पूर्ववत् ननु तीक्ष्णाग्रुतिदर्शिप्रश्णतीत्यत्र हशोर्वारहृदयंप्रयोगो व्यर्थः पुनरुक्तो व्यर्थश्चात्यन्तमाह
तत्कृतीति यस्माद्धातोर्णमुल्प्रयुज्यते तस्येत्यर्थः अनुशासनेनेति यस्माद्धातोर्णमुल्विहितः स एवानुप्रयो
क्तव्य इत्यर्थः केनकषादिषु यथाविध्यनुप्रयोग इति सूत्रेणेत्यर्थः णमुलो भेदशक्तिकल्पनेऽपि निदाघवर्मात्रूंप
पतीति प्रयोगो ऽदृष्टवीर एव वासस्तूहृतिधर्माघववक्रित्रप्रतियोगिताकभेदस्य स्वस्मिन्नपि सत्त्वादिति इत्यभिप्रायेण

र·गं·
६४
64

ह किंचेति ननु प्रकृत्यर्थस्य प्रत्ययार्थे भेदे ऽन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेनान्वयाभ्युपगमा
त् कथमुक्तप्रयोगापत्तिः आसज्यवृत्त्याद्विधर्मस्यान्वयितानवच्छेदकत्वात् तदवच्छिन्नप्रतियोगितायाः संस
र्गत्वासंभवात् नित्यद्वार्थीभूतत्वादिरूपेणादृशधर्मावच्छिन्नप्रतियोगिताकभेदस्य च निखिलधर्माभ्युपगन्तावसत्वा
दित्याशंक्याह अन्वयितेति तथा च णमुलर्थभेदे प्रकृत्यर्थस्योक्तप्रतियोगितयान्वयानियमाभ्युपगमे यत्रैकस्यै
वोपमानोपमेयत्रैकस्यैवोपमानोपमेयत्वं तत्रान्वयानुपपत्तिः उक्तसंसर्गेण प्रकृत्यर्थभेदान्वयस्य तत्र बाधित
त्वात् ननु णमुलस्थले तादृशप्रयोगो नास्त्येवेत्याशंकापरिहरन्नाह लंकेति रसगंगाधरे ननु योदाहरमेत
न् नैऋतो यातुरक्षसी इत्यमरः चवर्गीयजकारादिरपि जातुशब्दो रात्रसार्थे इति तद्व्याख्यानात् ननु तत्र भे
दस्यानन्वय एव इवपदार्थाहारहारत्वादिना त्वयापि इवार्थभेदस्य तत्रान्वयबोधवारणाय तथैव वाच्यत्वा
दित्याशंकते न च तत्रेति कल्पयित्वेति तथा च इवपदस्य भेदशक्तेरुभयसिद्धत्वात् तत्रानुपपत्त्याभेदा
न्वयस्वीकारेपि णमुलप्रत्ययस्य भेदशक्तेः प्रमाणांतरासिद्धत्वेन तच्छक्तिं कल्पयित्वा तदनुपपत्त्यान
न्वयकल्पनमयुक्तमेवेत्यर्थः किंच युगपदुभयार्थबोधकपदानामेकार्थान्वये ऽर्थीतरस्याप्यनन्वय
व्युत्पत्तिविरोधादपि नैवमित्याह ॥ अन्यथेति ॥ ॥

एकार्थ्यांऽन्वयाभावेप्यन्यार्थान्वयस्वीकारे इत्यर्थः ननु यत्र तदर्थान्वयायोग्यत्वे तत्पदस्यासाधुत्वं तत्रैव तदर्थान्वयव्यतिरेके-
णनार्थान्तरमात्रे तत्पदप्रयोगः यथाकृतेरत्नीनत्वं न दशायां पचतीति लटोऽसाधुत्वात् वर्तमाने लडिति वचनात् अ-
त्र तु भेदांशे नान्वयेपि न तस्यासाधुत्वप्रसक्तिरिति भेदातिरिक्तार्थान्वयबोधः स्यादेव अन्यथा इवपदाध्याहारवादिन-
स्तवापि कथं भेदानन्वयेपि तदन्यार्थान्वयः इत्यत आह एकार्थेति तत्पदशक्तिपर्याप्त्यधिकरणे तत्र तात्पर्यात् तथा च
भेदानन्वये तदन्यार्थमात्रस्य शक्तिपर्याप्त्यनधिकरणत्वात् न दोषः अर्थे लक्षणा स्यात् अत एव पुष्पवंतावित्यादौ ए-
कयोक्त्या पुष्पवंतौ दिवाकरनिशाकरनिशाकरावितिचंद्रसूर्ययोर्व्यासज्यशक्तिस्वीकारात् केवलचंद्रत्वादिप्रकारक-
बोधे लक्षणायैवेति संप्रदायः ग्रंथांतरसंवादे वेत्यर्थः प्रमाणशब्द इति शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्य-
प्रमितत्वविषयार्थकत्वे सति शाब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वस्योक्तिलक्षणत्वात् अत्र स्मृतिपुराणादिसा-
धारणाय प्रमाणशब्दमात्रपदवक्तिपदस्यात्र तात्पर्यं न त्र च कैश्चित्खंडशक्तिस्वीकारेण प्रमाणशब्दस्योक्तिप-
रत्वं शक्यैव विशिष्टशक्तिपक्षे विशेषणविशेष्यभावे विनिगमकाभावेन गौरवात् अतो न लक्षणेत्युक्तं तत्र च
दूषणं व्यासज्यशक्तेस्तथाप्यनपायेन एकांशमात्रबोधे लक्षणैव स्यादिति न्यायमालायां द्वितीयसूत्रव्याख्याना-
वसरे जयरामभट्टाचार्यैरेव लिखितमिति अवश्यं व्यासज्यशक्तिमतां पदानामेकमात्रार्थबोधकत्वे लक्षणेति

अत्रापि साम्यादेवेति फलितार्थः अत्रापीति इदं च त्वयाप्येवमभ्युपेयं इवपदस्यापि व्यासक्तशक्तिकत्वेन भेदविनिर्मु
क्तात्मार्थबोधे लक्षणाश्रयं स्यादिति भावः श्रौतीत्वेति ननु सादृश्ये लक्षणायामार्थी उपमेति मते पतद्दोषसंभवेपि
यत्पदार्थविशेषणस्योपमानत्वनियमस्तत्रैव श्रौतीति व्यवस्थापयतां जयरामभट्टाचार्याणां मते कथमेतद्दूषणं सादृ
श्ये लक्षणायामपि णमुलर्थसादृश्यविशेषणतापन्नस्य कर्मादिकारकस्योपमानत्वनियमस्य क्षतिविरहादिति
न चेन्मतं सादृश्ये लक्षणायामेवार्थीत्वमिति व्यवस्थावादिभिरप्यनन्यदत्तमालंब्य णमुल्प्रत्ययस्य भेदादिशक्ति
स्वीकारसंभवात् नान्यत्रेवार्थत्वापादनात् न च तेषामत्रेष्टापत्तिः उपजीव्यविरोधात् न चांशांतरे पवतदुपजी
वनमिति वाच्यं तदांशान्तरपर्यार्थत्वकल्पयित्वेत्यादि पूर्वोक्तदूषणस्य उभयसाधारण्येन तात्पर्यात् तदेन देवाह दिशी
ति श्रीः अत्येकलुप्तोपमाविवरणं उम् अन्वेषयन्नरिष्यसि कंटककलितानि केतकीवनानि मालतीकुसुमस
दृशं भ्रमर भ्रमन्नपि न प्राप्स्यसि अत्र कुसुमसेवोपमानत्वात् कथं तल्लोप इत्याशंकते यद्यपीति पूर्वोक्तरीत्या समा
येन तथापीति यत्र वसतीजाया असतः सुभगा यदयं न किं स्फुटत्वीजं तव समानो युवा नास्ति त्वत्सदृशयु
वांतराभावादेव त्वज्जायायाः पुरुषांतरसंगमाभावो ऽस्माकं च स्वपतीनपहाय त्वत्सेवं येति किमु भयत्रापि हेत्वंत
रगवेषणयेत्यर्थः ननु अत्र त्वत्समानो युवा नास्तीत्यस्य युवाभावस्य बाधितत्वेन तत्सादृश्यरूपविशेषणाभावप

र्यवसायित्वेन तत्सदृशाभावपर्यवविवक्षितत्व इति कथमुपमा अनन्वयस्यैवोचितत्वादित्यस्वरसादाह यद्वेति
इदं च सर्वं मालत्यादिनिष्ठसादृश्यप्रतियोगित्वमित्यर्थस्वीकारे प्रागुक्तरीत्या मालत्यादिप्रतियोगिकसादृश्याप्र
यमित्येवं वेधाभ्युपगमेन गोवर्द्धनाचार्यपद्यमुदाहार्यं वासरगम्यमनूरोरपि विधियदवनिष्ठं वामनैकपदं ज
लधिरपि पीतं लेखाः सतां मनः केन तुलयामः ॥ अत्र केनेति सामान्यनिर्देशादुपमानलोपः तुलयाम इत्यु
क्त्या तत्सदृशज्ञानाभावपर्यवसितत्वं तात्पर्यं न तु सत्त्वेपि तत्सत्त्वेपि ज्ञानाभावेन नास्तीति योगिकसादृश्याश्रयत्वेन प्र
तीतिरूपणानुपपत्तिरिति दोषस्य सत्त्वेन तात्पर्यकल्पने गौरवात् सतां मनः किं समं क्षम इति पाठे च वाक्यगतत्वं
बोध्यं स्वरूपत एवेति एतच्च दसैवप्राचीनैरपरिगणनात् नहि तेपीति तथा चात्र धर्मिणः परिगणिते
पि विभागे न्यूनत्वमिति भावः समासं विनाऽउक्तसूत्रार्थानुपपन्नावेव तदन्यथानुपपत्तिबलात्समासः
स्यादित्यत आह यथेति समासस्य निरेकप्रयुक्तां सूत्रार्थानुपपत्तिं प्रदर्शयिष्यन् सूत्रार्थं व्याचष्टे इवार्थेति अनुपपत्तिं
विभज्य दर्शयति नच इवार्थ इति इदं च प्रसिद्धिबलादुक्तं लुप्तोपमात्वेनापि समाससिद्धेः कैयटेनाभिहितत्वात्
वर्णितेन इति स्वसमवेतयत्किञ्चित्क्रियायां लक्षणया किमावः देवदत्तेनेति यज्ञो राणामस्य च समागमो यज्ञेनैव
योः सङ्गतः उपनतमेतदकस्मादासीदतः काकतालीयमिति चित्रमीमांसोदाहरणाभिप्रायकं तयोरिति ॥

काकागमनतालपतनयोरित्यर्थः तत्रैव वाचकलोपमपि दर्शयति इवशब्दस्य चेति अतर्कितेति काकतालीयादे
वदत्तस्य वध इति वाक्याभिप्रायेण उक्तश्लोके यकस्मादिति धर्मस्यापि निर्देशात् तृतीयचरणस्यान्यथा निर्माणे
तत्रापि धर्मलोपो द्रष्टव्यः ननु काकादीनामपि स्वातंत्र्येण प्रयोगायोग्यतानद्विभागोप्येवमसंगतः स्यादित्यपरितो
षादाह वस्तुतस्त्विति कैयटेनेति द्वितीयाध्याये प्राक्कडारात्समास इत्याकडारादेकासंज्ञेति सूत्रे इत्यर्थः पंच
माध्याये इवार्थे समास इति कैयटेन विशिष्यानभिधानात्स्थलान्तरानुसरणं तथा च इवार्थे समास इति कैय
टव्याख्यानात्सिद्धं समासस्यैव सादृश्यवाचकत्वं तदर्थविहितवतिप्रत्ययादिवदिति भावः किंच त्वयापि तदर्थ
विहितस्य तद्वाचकत्वमङ्गीकृतमित्याह अवश्यं चेति तथा च कल्पप्रत्ययांशे इवार्थविहितस्य सादृश्यवा
चकत्वमभ्युपगम्यते तत्प्रकृतिभूतस्य इवार्थविहितस्यैव समासस्य सादृश्यवाचकत्वं नास्तीत्यभिधाने तु रागा
रूढस्यैव तु रमविस्मरणमिति भावः तद्धितप्रकृतिभूतसमासगतोपमाया आर्थिकं निराकृत्य तद्धितार्थोपमा
याअप्यार्थिकत्वं निराकरोति एवमिति उपमानपरत्वेति तालकृतकाकवधस्यैवोपमानतायाः सर्वसिद्धत्वात्
तथा च पंचमाध्याये कैयटेनोक्तं तालेन तत्र यः काकस्य वधः स इव देवदत्तस्य दस्युना वधस्योपमानमिति वधादिषु
काकतालीयादिशब्दवाच्यः छप्रत्ययप्रकृत्यंशस्य तत्परत्वं विना तदुपमेयताद्विमो न स्यादिति भावः ननूक्तसमा

सस्यसादृश्यवाचकत्वेमानाभावः अध्याहृतादिवपदादेव तद्बोधोपपत्तेः नच इवार्थविषयादित्यनुवादसामर्थ्यान्नत्वे
तिवाच्यं तत्समासेन सादृश्यप्रतीतावेव तस्यतात्पर्यात् तस्मान्न इवपदादेवोपपत्तौ समासस्य तच्छक्तिकल्पने गौ
रवात् यदपि समासाच्चेति सूत्रे यदि समासोपि इवार्थेकप्रत्ययोपि तत्रैव तर्हि समासेनोक्तत्वात् प्रत्ययो नप्राप्नो
तीति शंकापरं भाष्यं तदपि तत्समासात्सादृश्यप्रतीतिरित्येतावन्मात्रतात्पर्यकं अतएव तत्रैकैकपदे न वचनसा
मर्थ्यादिति चेत् शस्त्रीश्यामादिभ्योऽतिप्रसंग इति व्याख्यानम् तथापि नात्र वाचकलोपोपीत्यपि शब्देनोपमा
नलोपाभावस्य विवक्षितत्वात् तथाहि काकतालशब्दयोस्तदागमनपतनयोर्लक्षणा सर्वसंमता तयोर्देव
दत्तागमदस्युपतिपातनिष्ठोपमेयतानिरूपितोपमानत्वं च सर्वग्रन्थसंमतं पंचमाध्याये कैयटेनाप्युक्तं हि तद्वि
षये काकतालशब्दौ काकतालसमवेतक्रियावाचिनौ तत्र काकागमनं देवदत्तागमनस्योपमानं तालपतनं
दस्युपतिपातस्येति एवं स्थिते लाक्षणिकोपमानवाचकपदयोः श्रूयमाणत्वात्कथमुपमानलोपः नच ल
क्षणास्वीकारेपि तत्र शंकाभावादुपमानलोप इति वाच्यं उपमानार्थकशब्दश्रवणमात्रस्य विवक्षितत्वेन वा
चकत्वपर्यंतस्यैवपर्याप्त्यप्रमाणाभावाच्च अतएव वाचकलुप्तत्वमपि सादृश्यार्थकपदमात्राभावे सत्येवस
र्वव्यवस्थापितम् विवक्षितं च सर्वेषां ग्रन्थकाराणां तथैव तर्हि सादृश्यलाक्षणिकपदयोगेपि लुप्तत्वस्वीका

र·टी·
९८
67

रेणार्थ्यां लुप्तोपमा कुत्र विषयमर्हतीति आर्थोपमायां सादृश्यवाचकपदाभावनियमात् नन्वेवं तदर्थमेव सादृश्यप्रत
द्विशिष्टान्यतरवाचकपदाभावे वाचकलुप्तत्वमिति रसगङ्गाधरादौ व्यवह्रियते न च सादृश्यवाचकपदाभावेपि
सादृश्यविशिष्टवाचकपदसत्त्वेन लुप्तत्वापत्तिरितिचेत् सत्यम् तथाप्यस्मदपेक्षया गौरवं स्पष्टमेव सादृश्यप्र
र्थकपदाभावस्य वाचकलुप्तत्वव्यवस्थापकत्वे उभयनिवेशापेक्षया लाघवस्य स्पष्टत्वात् आस्तां प्रागेव बहुशोऽदूषि
तं प्रासंगिकमेतत् प्रकृते उपमानार्थकलाक्षणिकपदसत्त्वान्नोपमानलुप्तत्वसंभवः अथात्रापि उपमानवा
चकपदाभाव एवोपमानलोपव्यवस्थापको वक्तव्य इति चेत् गौरवादिकं तावत्स्पष्टमास्तां एवं सति क्यङ्प्र
त्ययेपि उपमानलुप्तोपमा स्यात् न चेष्टापत्तिः केनाप्यनभिधानात् चित्रमीमांसारसगङ्गाधरयोरपि क्य
ङादावुपमानलुप्तमानभ्युपगमाच्च ननु क्यङ्स्थले कथमुपमानलोपापत्तिरिति चेत् अवहितो भूत्वा शृ
णुयाः ओजसोप्सरसो नित्यमिति तत्सूत्रस्य वार्त्तिके न विशिष्य ओजायते इत्यत्र क्यङ्प्रत्ययः सर्वसिद्धः न
त्र च ओजः शब्दो लक्षणया तद्वत्परः इति वैयाकरणैः कण्ठत एव व्याख्यातं अस्ति च तत्र वैदिकोपि प्रयोगः ओ
जायमाने यो अहिं जघानेति ननु तत्र मास्तु लक्षणा डः सहत्वादिधर्मविवक्षया ओजस एवोपमानत्वसंभवादि
ति चेत् न धर्मान्तरानुसरणक्लेशवैयर्थ्यात् ओजस्विन उपमानत्वे विशेषणतया उपस्थितस्य ओजस एव तथा

९८

रणधर्मतायां लाघवात् पौलोमीकुचकुंभकुंकुमरजस्वाजन्यजन्मोद्गताः पीतांशोरुचरुचयः पुरंदरपुरीसीमानमुप
स्कुर्वते यताभिर्लिहन्तीभिरंबरतलमसामञ्जस्यवतीभिर्दिशः द्रोणीमास्तरणीभिरंतरतमं व्योमेदमोदीयते इतिमु
रारिपद्यतदतएवोपमानतायाम्प्रवशपवाच्यत्वात् किंच उपमानादेव क्यङादयो विहिताः उपमानत्वलक्षणार्थ
स्यापिसर्वसंमतं अतोलाक्षणिकादपि उपमानविहितप्रत्ययोत्पत्त्या न किंचिद्बाधकं संकोचेमानाभावात् स्वीकृ
तं चात्रैवतत्त्वयाः पिलाक्षणिकशाखाशाखाप्रत्ययादिकं नत्वेकेन विशेषेण क्यङादयो लाक्षणिकान्नस्युः नत्रोपमानप
दे साक्षादेव श्रूयते क्यप्रत्ययेनाक्षेपादिति चेत् किंततः शास्त्रतात्पर्यविषयत्वस्योभयत्रापि साम्यात् अन्यथान
तः प्रत्ययानुपपत्तेः तदुक्तं स्तत्रैवेषु विहितत्त्वं सर्वेयहुत्तौ यस्य वार्तिके इति अनयवाग्भिधानीमादन इत्यादौ गर्दभा
भिधानीयाहृतेरशाहभूतायाञ्चपिवेदतात्पर्यविषयत्वेन विधेयत्वपर्यवसानम् अरुणायैकहायन्या पिंगाक्ष्या
सोमं क्रीणातीत्यत्र मीमांसकमतेऽरुणायेत्यादीनां क्रियायामेवान्वयात् गवारुणयोः परस्परावच्छेदस्यापा
र्थिकत्वस्वीकारेपि नस्पष्टीयत्वं च अन्यथा नरुणयापि गवा सोमक्रियापत्तेः ननु लाक्षणिकान्नक्यङा
दिप्रत्यये उपमानलुप्ततापत्तिर्दुर्निवारैवा एवं साधारणधर्मादीनामपि लक्षणत्वस्य लेथ धर्मलोपापत्तिश्चापिस्या
त् तथा पुष्पवत्सदृशं मुखमित्यत्रापि उपमानलोपापत्तिः पुष्पवत्पदस्य हि पकयोक्त्रा पुष्पवन्नाविति उभ

यथासक्तशक्तिमत्वेन चंद्रत्वप्रकारकत्वे सति सूर्यत्वप्रकारकशाब्दत्वकार्यतावच्छेदकं क्लृप्तं नत्र चंद्रत्वादिमात्रप्र
कारकबोधत्वस्य तच्छक्तिज्ञानकार्यतानवच्छेदकत्वात् तादृशबोधो लक्षणयैवेति स्वीकारात् न चेष्टापत्तिः काव्य
समममित्यादौ वर्ण्यांतरानुसरणक्लेशानुपपत्तेः लक्षोपमानकस्थलपवनत्वोल्लभ्यात् न चैवास्त्विति चेष्टाप
त्तिः काव्यसममित्यादौ वर्ण्यान्तरानुसरणक्लेशानुपपत्तेः लक्षोपमानकस्थलपवनत्वोल्लभ्यात् न चैवास्त्व
ति चेत् उष्णवंताविव रम्यं मुखमित्यादौ श्रौतार्थ्युपमानलुप्ताया अप्रापत्तेः न हीदमपि इष्टापत्त्या परिहर्तुं शक्यं
तस्या ग्राम्यार्थत्वनियमस्य सिद्धान्तसिद्धत्वात् त्वयाप्यभ्युपगमाच्च नत्रापीष्टापत्तिमभिधानस्तु उन्मत्तप्रायप्रवेशोप
दः किंचैवं उष्णवत्कलं मुखमित्यादौ तद्धितेऽप्युपमानलुप्ता स्यात् न चेष्टापत्तिः त्वयाप्यनंगीकारात् तथापि
त्वया तद्धितेऽप्युपमानलुप्ताभ्युपगतैवं चंचत्कः इत्यादाविति चेत् नहीदं मां प्रत्यापादनं येनेष्टापादनमित्य
दोषः स्यात् किंतु त्वां प्रत्येव तावत्त्वया च तद्धिते उपमानलुप्तानभ्युपगमादनिष्टापादनमेवेति मयापि तथैवाभ्यु
पेयमिति चेत् तर्हि स्वपदोत्प्रलापः सज्जावेत्तु भयपरित्यागात् स्पष्टमेव निग्रहोंऽगीकृतः किंच उष्णवद्रम्यं
मुखं इति वाचकोपमानलुप्ताप्युपमा स्यात् न चेदं मां प्रतीष्टापादनमेव काकतालीयमिति तत्प्रत्ययप्रकृति
भूते समासे तदानयनादिति वाच्यं तत्पर्यंतानुसरप्रयासानुपपत्तेः किंच मुखं उष्णवंताविवेति वाक्येऽपि धर्मो

पमेयोभयत्वेनोपमाप्राप्तिः तथाचकाव्यप्रत्ययप्रवृत्तउपममविरोधः किंबहुनाधर्मोपमानोपमेयार्थकत्वात्एि
कपदानुपादायसर्वत्रैवतत्तदुपमाप्राप्तिरितिसंक्षेपः तदेतत्सर्वमभिप्रेत्यत्राह अलंपल्लवितेन असौसरसंद
नमण्डलकपोलप्रतिमागतोमृगात्मा: अंतःसिंहरितिशंखपत्रकरणिंवहतिचंद्रः प्रकृतोदाहरणांशोविवि
च्यदर्शयति अत्रमृगात्मेति यद्यपिसमम्युपमानेत्यादिवार्त्तिकशरीरंमहाभाष्यादौदृष्टंतेनत्यापिप्रकृ
तोपयुक्ततयासप्तमीत्यंशमपहायैववार्त्तिकंपठति उपमानेत्यादि उक्तवार्त्तिकविषयकंप्राचांव्याख्यानंदूष
यति वस्तुतस्त्विति नत्वेतदसंगतं तथाहियस्योपमानपूर्वपदस्यपदांतरेणसहसमासोविधेयस्तत्रम
मुत्तरपदमत्रशब्दत्वेन नतुबहुव्रीहेरेवायेनद्वितीयादिशब्दस्यलोपःस्यात् अतएवशाकप्रियःपार्थिवः
शाकपार्थिवइत्यत्रशाकपार्थिवादीनामुत्तरपदलोपश्चेतिवचनेनशाकप्रियेतिसमासेयउत्तरपदंप्रिय
पदरूपंतस्यैवलोपोनतुयत्तद्वचनेविधेयसमासोत्तरपदभूतस्यपार्थिवपदस्य किंबहुनासमम्युपमा
नेत्यादिप्रकृतवार्त्तिकेनैवयत्रकेरस्थितंधनंयस्यसकरथनइत्यत्रैवउत्तरपदलोपः सपूर्वसमासेउत्तरपद
भूतस्यस्थितशब्दस्यैवनतुत्वताहियेयबहुव्रीहिसमासोत्तरपदभूतधनशब्दस्यकरधनइतिरूपासिद्धिप्र
संगात् एवंचोक्तसंप्रदायस्यविरोधाभावात्कथमत्रद्वितीयादिशब्दस्यलोपइत्युक्तमितिचेत्सत्यं यथा

ग्र.टी.
६५
69

क्तं तद्ग्रंथे उक्तहृदयप्रतिभासेपि ग्रंथस्याभिप्रायांतरेणैव प्रवृत्तत्वात् तथा हि संप्रदायादिति बहुव्रीहिः सर्वपदभूते
उष्ट्रमुखेति शाहे मुखशाहपर्वोत्तरपदं न त्विवादिरपि येनोत्तरपदतयाइवादीनामप्युक्तवचनेन लोपः स्यादिति
भावः अत इति अत्राप्युपमेयपदमुपमानपरमेव करणत्वमुत्पन्नाश्रयणात् तथा चोपमानभूतमुखपदस्यैवो
क्तवार्त्तिकेन लोप इवपदस्य च गतार्थत्वादेव निवृत्तिः स्पष्टं चेदं कैयट एव अत उभयोरप्युक्तवार्त्तिकेनालोप इ
ति प्राचां व्याख्यानमयुक्तमेव यद्वा मुखपदस्य मुखसदृशे लक्षणा उभयथापि इवादीनां नोक्तवार्त्तिकेन लोप
इति भावः समपदमिति सामान्यपदमित्यर्थः तेन सामान्यपदेन कारिकास्थेन उपमानलोप एव वाचनिक
इवादिनिवृत्तिस्त्वर्थादित्येव विवेको विवक्षित इति भावः नन्ववांतरवैचित्र्यस्त्वेपि पृथगभिधानमनर्हं एवं
विधवैचित्र्यसहस्रसंभवादित्यत आह आकरेति आकरसंमतिमेव दर्शयति तथा चेति संबंध इति अनेकोपमा
ननिरूपितं सादृश्यमित्यर्थः गेहमिव वित्तरहितं निर्जरकुहरमिव सलिलसमीहितं गोधनरहितं गोष्ठमिव तस्या
वदनं तव वियोगे व्याधिरिव वैद्यरहितो धनरहितः सुजनगेहवास इव रिपुऋद्धिदर्शनमिव दुःसहस्तव वियोगः
क्वचिन्न सामान्यधर्मानुपादानेपि दाक्षेपकस्य शाब्दत्वं यथा वाक्यांतानि विचक्षणो द्विजवशे मूर्खोप्यवर्णीयमः
कुलीनानामप्रतिवाय सोपि हि लतांयानामिनावर्हिणा वल्लभत्वविशालतांतिह्रियया नवातयैवेनरेत्वंवापीवलतेव नो

६५

विद्धनं वैरणासि सर्वभज अत्र सर्वोपभोग्यत्वरूपधर्मोपपादकमाद्यचरणत्रयं धर्म इति श्रूयमाण इति द्वैवेण
न्वयः ज्वलति वडवानल इव स्फुटति च शैल इव रामबाणाभिहतः रसति जलद इवोदधिः क्षुभितो लंघयति मा
रुत इव नभस्तलम् सेतुकाव्ये श्रीरामशराहतसमुद्रक्षोभवर्णनम् अत्र रामबाणाभिहतत्वसमुद्रांशेन भेद
न्नधर्मप्रयोजकमिति पूर्वस्माद्विशेषः सूर्यस्यैवेति ऋषिस्तुतिरियं अथाप्याशयः स्वयं नश इति निरुक्तकारो
क्तेः वत्सल्य इति महदर्थकं वशिष्ठा इति श्रेष्ठार्थकं संबोधनम् ऋषिस्तुतिरियं। वोद्भुष्मान् अन्वेनवेद्यन्वेवं
अनुकर्त्तृमिति यावत् क्रमार्थेनवे प्रत्ययः छांदसः श्लेषेणेति भरतकारिकायां श्लेषेणादिपदानां तत्तदलक्षण
वत्सुष्विति अनेकप्रतियोगिकसादृश्यस्य उपमेयोत्कर्षातिशयाधायकत्ववत् एकप्रतियोगिकानेकहृति
सादृश्यस्यैकप्रतियोगिके कहृतिसादृश्यापेक्षया विलक्षणचमत्कारजनकत्वं नास्तीत्यस्य हृदयंगमस्या
भिरनुक्तिरित्यर्थः इयं चेति यथा एकस्मिन्नुपमेये एकप्रतियोगिकसादृश्यवर्णने अभिन्नधर्मनिर्वाह्यं तद्व
दिहापि उपमानभेद एवाभिन्नधर्मसंभवादित्यर्थः हरिविशेषेति वज्रनाभवधप्रभावतीप्रतिप्रद्युम्नस्योक्तिः
बहूपमानकबहूपमेयकोपमाया भरतकारिकाद्वितीयार्द्धोपदिष्टाया इदमुदाहरणं इदं च सामान्यधर्मैक्ये
द्रष्टव्यं तन्नेदेतत्ताहृ अत्रैवेति अधर इवेति माधुर्यं च अधरस्यानुभवसिद्धो रसविशेषः उक्तेस्तु गुणविशेषः त

प्र. टी.
६८
70

याश्च भरतः वक्रश्चोयल्लुलितं वा कामसुकं वा पिशुनः पुनः नोदेश्चयतितस्मादिन्तमाधुर्यमिति सरलं विशदवर्णतं स्व
च्छरूपत्वं उक्तं स्वप्रसादरूपो गुणः सच भरतेनोक्तः अप्यनुक्तोवुधैर्यत्र शब्दोऽर्थो वा प्रतीयते सुखशब्दार्थ
संयोगात्प्रसादः परिकीर्तितः यद्यप्युपमेयोपमायां सादृश्यार्थकेशब्दस्यापेक्षानियमो दृश्यते तथाप्यत्र
उपमेयस्याभिन्नपदार्थत्वात् इवादेरप्यनियमे दोषाभावादुक्तिपदानंतरं वतिप्रत्ययप्रयोगः यदितु इवादि
पदैकोपि प्रमाणमनुपलभ्येत तदा उक्तिरिवेव पाठो द्रष्टव्यः वक्रत्वमिति दृशो वक्रत्वमपांगविक्षेपणात् गते
श्च विलासहेतुकवैलक्षण्यात् धियस्तु सूक्ष्मार्थग्राहित्वात् वाणास्तु तादृशार्थगर्भत्वात् भ्रुवः संस्थानवि
शेषवत्वादिति बोध्यं संमीति दूषचरितेवाणस्योक्तिः उन्मादकानूतनार्थाल्लेक्षणसमर्थाः पदे अष्टचरणेत
नउजनपादाः केषांचित्सत्कवीनां सत्वात् कवित्वावक्रित्वाभावोक्तो बाधवारणाय वहवइति अन्यप्रतियोगि
केति यद्यप्युपमायाः सादृश्यरूपतया प्रयोज्यत्वाभाववत्वमित्येतावतैव निर्वाहो भवत्येव तादृशप्रयोज्यत्वा
भाववत्त्वहृत्तिसादृश्यकत्वमित्युक्तावपि उपमेयनिष्ठत्वमस्त्येवेति ननु सादृश्यनिष्ठत्वं तथापि प्रतियोगि
तारूपोपमायत्नमभिसंधायस्वपदस्य प्रतियोगित्वपरतया हृत्तिपदस्य च निरूपितत्वार्थकतया उक्ताभाव
विशिष्टस्य निरूपितसादृश्यकत्वमित्यर्थपर्यवसानमवोध्यं उदाहरति राघव पाण्डवीयकाव्ये शुद्धांशमवर्स

६८.

नम् आद्यविशेषणस्येति विडंबुर्दिनतयाचंचलहृत्तिरित्यर्थः आरात्समीपतआरंभंगात्रस्य मलनयेन मलनः
पटवासेस्यान्मलनंस्पर्शेनेमनमितिविग्रहः अहमिति मालविकाग्निमित्रनाटके अग्निमित्रस्य राजउक्तिः क
र्लिनेवेति मुद्राराक्षसे अमात्यराक्षसोक्तिः विकचकुसुमशस्त्राणकावइत्यर्थः हिंडवायारात्स्याउपांत्यहेडवेयः चेटो
त्कचइतियावत् यथा कर्णेनअर्जुनवाथार्थ्यमवस्थापितयाशांतास्मि श्रीकृष्णेनयत्तादिविघ्नकरतयास्ववध
ताभिमतोघटोत्कचोघातितः तथाचंद्रगुप्तमवधार्थराक्षससंकेतेनामात्येनस्थापितयाविषकन्यकयाचाणक्यो
नार्हराज्यहारितयास्ववध्यः पर्वतकसंज्ञोराजाघातितइतिसमुदायार्थः प्रियइवेति नैषधानंदनाटकेमुग्ध
नउगमालोकनलवचनं वर्षोदकमितिमृच्छकटिकाख्यनाटकेचारुदत्तोक्तिः लेखेवेति चंद्रलेखायाः षोड
शभागात्मककलावाऊल्लवन्नापिकायाः कामशास्त्रादिकल्पितत्वात् रसस्यशृंगारस्यजलस्यचेत्यर्थः
तिः केतवमिति कोनिपदेअन्यापेक्षायकर्षरहितमितिइच्छापदेनिरूपयीत्यर्थः स्वरवस्यस्वतः पुरुषार्थत्वेन
निरूपणीच्छाविषयत्वात् रसगंगाधरादीति आदिपदेनचित्रमीमांसासंग्रहः कथमिति नामार्थतयातादात्म्य
संबंधेनैवान्वयस्य उक्तत्वादित्यर्थः तदभेदेति धर्मभेदेत्यर्थः तदेवदर्शयन्नाह धर्मीभेदेति किंत्विति विद
त्मानसेत्यादौसरस्वितयोरभेदारोपस्यरात्रिहंसाभेदारोपाभ्युपगमादितिभावः सर्वेति वस्तुनोभिन्नयोः पर

अ॰ टी॰
७८

स्य रसाद्यनुरूपाद्भिन्नतयाध्यवसितयोर्हि रूपादानं बिंबप्रतिबिंबभाव इति चित्रमीमांसादर्शनात् असाधारणनाम
पि धर्माणां सादृश्यमूलेनाभेदाध्यवसायेन साधारणत्वकल्पनादुपमासिद्धिरिति रसगंगाधरदर्शनाच्च इदं
च भेदस्य स्फुटप्रतिपत्त्यर्थमुक्तम् अनुगामिस्थलेपि वस्तुतो मुखचंद्रादिगतरमणीयत्वादेर्भिन्नतयाध्य
वसायं विनानुपपत्तेरिति बोध्यं किंच बृहदारण्यके श्रुतौ यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा तस्य पर्णा
नि लोमानि त्वगस्योत्पाटिका बहिः इत्याद्यनंतरं अस्थीन्यंतरतो दारूणि मज्जा मज्जोपमाकृता इत्यत्र धर्मसादृ
श्येन धर्मीभेदेन चेत्युभाभ्यामपि उपमानिःपत्तिः स्फुटैव एवमन्यत्रापि इति दिक् एतदस्वरसस्सूचनायैवाह
यदित्विति यथायत इति सकारांतादेयथाच्छान्दसाउ. प्रत्यये सकारलोपः अकारांतादेव तप्रत्यये तु स्पष्ट
व्याख्यातमिति उत्कृष्टव्यक्तिवृत्तित्वमेव जातेरुत्कृष्टत्वमित्यर्थः उत्कर्षापकर्षौ च उपमेयापेक्षया बोध्यौ त
स्थानीयेति तत्प्रतिबिंबस्थानेत्यर्थः निद्राभेदेति अत्र प्राधान्येन स्त्रीधर्मस्थानीयधर्मस्य विद्युद्वल्लीष्व
नुपादानादुपमानस्य धर्महानिरित्यर्थः यदित्विति विशेषणं तत्समययोग्यतामात्रेण स्त्रीत्वनिर्दिष्टमतो न दो
ष इत्युच्यते तर्हि वीरमिति रावणविशेषणप्रतिबिंबधर्मस्य मेघे दिष्टपनभिधानान्न्यूनत्वमवधेयं रावणमे
घयोरप्युपमेयोपमानत्वपर्यवसानान्नशोथ न लिंगेति एतदुत्तरसंदर्भः प्रागेव पल्लवितं अनुभवन्निति रघुवंशे वसं

नवर्णनं पद्दरपिनिपातप्रतिकारसमर्थोपीत्यर्थः भुजोल्लनेइवेति उपमितसमासः प्रियकंठग्रहस्य भुजसाध्यतयातत्सा
धाम्यापवादकरूपकानंगीकारात् यमकादेशभवेदेकं उलोर्ववोः योस्तथेति लकारउकारयोरैक्यानुशासनाद्यमक
निर्वाहः उपमानोपमेययोः स्त्रीत्वपुंस्त्वभेदमुदाहृत्य क्लीबत्वस्त्रीत्वाभ्यां भेदमुदाहरति यथाचेति गुरुसदसीति
सात्वादनुनयानर्हत्वसूचनं पदांतेशिरस्थापनं यथामादार्थप्रणामाभिप्रायमुत्तराद्वेवाच्यत्यागोमानभंगसू
चनार्थः निर्मुक्तेति अनर्घराघवेदशरथंप्रतिविश्वामित्रोक्तिः निर्मुक्तोमुक्तकंचुकइतिसर्पप्रकरणेऽमरः अत्र
शेषादीनांउपमानानांपुंस्त्वं यशसांतुक्लीबत्वं स्त्रीलिंगोपमानेसाधारणधर्मसमासमुदाहरति यथोवेति मु
क्तमिति माघेरैवतकवर्णने उपमाप्रपंचइति साहश्यपर्यवसायित्वात्तथात्वमित्यर्थः मुग्धांनेति शाकुंतला
मालोकाउत्कंठितस्योक्तिः मुग्धानम्रावरोधनमित्यमरः अत्रैववचनभेदमप्युदाहरति एवमिति जनस्यैक
वचनांतत्वात् लतानांचबहुवचनांतत्वादित्यर्थः सत्पदेति मायऊसमांजलावाचार्याणांमंगलाचरणं मायपवा
वयववाक्यं सः प्रस्तृतांजलिरिवेत्युपमितसमासः सतिप्रामाणिकेपदेसाध्यधर्मिणिप्रसरः संबंधोयस्य संता
परामर्षकुशलानांपरिसर्वतोभावेनमलः संबंधः व्याप्तिरितियावत् विमर्दनंविरोधितर्कोद्भावनेनविम्रा
नः स्वकार्यसाधकत्वाभावहीनः अमरतेमोदः पदयुगं अन्वयव्यतिरेकिरूपं पदेपदपदंदलपर सतामनुपद

म.टी.
७२

तच्चारेणेंद्रियाणां परिमल आमोदः विमर्दनमुपभोगः अमृतसदृशरसहेतोर्माध्वीकस्य मकरंदस्य जनकः अंजलिशब्द
स्याप्येकवचनांतत्वात्कथं वचनभेद इत्यत आह अत्रेति तथाच विवक्षिते वचनभेद एव यद्वा व्याख्यानवाक्यमेवो
दाहरणमिति भावः अन्यत्राप्यौचित्यवशान्नातिप्रसंगमाह तथानिंदायामिति उपश्लोक्य तिरस्कारप्रतीतिर्हि
जातिहीनत्वे दूषकताबीजं तस्यैव विवक्षायां तु बीजाभावान्न दोषत्वमित्यर्थः उपमानपदेनेति तद्वाचकपदेनेत्यर्थः
वाचकत्वस्य षष्ठ्यर्थत्वात् अभिहंतीति मालतीमाधवे मकरंदस्योक्तिः कलभः करिशावक इत्यमरः कूटपा
कलो गजानां वातरोगविशेषः गजे वातात्मको हन्यात्तथा वै कूटपाकल इत्युक्तेः सुकुमारेति नववयोऽवस्थायाः
प्रतीतेरित्यर्थः तथाच सुकुमारकायमित्यस्य कलभांशान्वयेन मानमिति भावः दिव्याहरेरिति घूर्णितिचंद्रः कमु
कतिकनकगिरिः खदिरसार[illegible]रिति रसतरंगिण्यामुत्तरार्द्धं काव्यप्रकाशेति शब्दतात्पर्यतच्छ्रुतदृष्टस्या
त्रानुवाद इति ततो वीचीनां नामपि तदुक्तिनामपि तदुक्तिमध्यनिवेशो न दोषः अन्यमिति उत्तिपादस्मरणे यमीति
संबोधनं लिकुजाशब्दस्य छेदसिलतापर्यायत्वमित्यभिप्रेत्याह लतेवेति प्रत्ययेति वत्सराजोक्तिः विविक्तंतर
मणीयत्वं केऽस्तुंभेति शोषिका ए॰ एवं अग्निरिवेति नचवेदे वक्तुरशक्तानुत्तयत्कथं दोषत्वमिति वाच्यं तेषां तदुत्त्वा
यकत्वेन दोषत्वं किं त्वबोधविलंबरसापकर्षादिजनकत्वेनैव तस्य च लोकवेदयोरविशिष्टत्वात् पुत्रमिति रघुप्रति

७८

कौत्सवाक्यं आशास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते इति पूर्वार्द्धे रैयोषध्येत्यत्र रशाह्वोधनार्थक इति
दर्शयन्नाह धनेनेति अर्थरैविभवा अपीत्यमरः उपमानोपमेयोभयविशेषणकवोध उपमाद्वष्टत्वमेवस्यापनाय
केश्चिदाश्रितोप्यर्थ्यैः प्रथममेव निरस्त इत्याशंक्याह नचेति उतो इति उतत्वः पश्यपन्नदर्शवाचमुतत्वः पश्यपत्नस्
णोत्यैनोइति पूर्वार्द्धे उतेत्यपिशब्दार्थे त्वशब्दः सर्वादिरन्यपर्याय प्रत्यक्षेण शब्दस्वरूपमनुपलभमानोपिप्रकृ
त्यादिविभागतदर्थोपरिज्ञानात्सम्यक् वेत्तीत्यविहृत्रिंदा पूर्वार्द्धार्थः उत्तरार्द्धार्थमाह महाभाष्य इति एतेनता
दृशवोधस्य प्रामाणिकत्वसूचनं उशतीत्यस्यविवरणं कामयमानेति तत्वमित्यत्र त्वमिपूर्वे इत्यप्रवाक्छंदसीत्यनु
वृत्तेर्यणादेशस्तस्यविवरणं त्वमात्मानमिति विवव्रे इत्यस्य छांदसलकारव्यत्ययेन लडर्थकत्वमित्याह विवृ
णुते इति प्रकाशयतीत्यर्थः तस्मै इत्यन्वये इत्यत्र भेदस्य प्रतियोग्यपेक्षायां पूर्वार्द्धोपस्थितस्याः विदुषपदवतेव
नान्वयः तथा च विद्वान् त्र लभ्यत इत्याह वाग्विद इति वचत्वषपेवेति वाद्वत्तानपदवीदर्णस्य निरुक्तत्वात्
नन्वेवं तदेक्षत वहुस्यां प्रजायेयेत्यादावीक्षणश्रवंकस्तृष्टिश्रवणाद्देचतत्स्य सांख्याभिमतस्य प्रधानस्य जगत्का
रणत्वेनेत्यर्थकस्य ईक्षतेर्नाशब्दमिति वेदांतसूत्रस्यानुपपत्तिः ब्रह्मणोपि वाक्षज्ञानाभावेन तत्रापीक्षणस्य गौ
णत्वापत्त्या गौणत्वेन तस्य कार्योन्मुखत्वमर्थमादाय प्रधानेपि तदाजस्य संभवेन सांख्यमतनिहितनिगमकाभावादि

अ॰ दी॰
७२
73

चेत्सत्त्वं तथापि वेदान्तमते विशिष्टवाचकस्य सामान्यपरत्वे लक्षणायामपि शक्यतावच्छेदकव्यापकजातिपरत्वमस्तां
ख्यामनेन तदपि नेति विशेषसंभवात् वस्तुत ईदृशेत्तीनसमान्यवाचकत्वेपि प्रकृते तत्संगतेः पद्मस्यापि सत्त्वात्तष
हेतुत्वात्कारणत्वमात्रमुपेत्याह करणत्वमिति अन्नप्राधान्यादिति रूपकसमासे उत्तरपदार्थस्य विशेष्यत्वनियमा
त् वीक्षणानुपेति अन्नस्य करणत्वेन वीक्षणं प्रत्यन्वयानुपपत्तिरयोग्यत्वादित्यर्थः नवेति तथा च अन्नसह
शपाहशेति पूर्वपदार्थप्राधान्यादन्वयोपपत्तिरित्यर्थः सामान्यधर्मेति उपमितं व्याघ्रादिभिः सामान्याप्रयोगे इ
ति वचनात्सामान्यधर्मप्रयोगे उपमितसमासविरहात् तस्मादिति विषयिणः ज्ञस्य विषयभूतदृक्तादात्म्याप
त्यैव वीक्षणस्य क्रियायामुपयोगात् ननु धर्मान्तरप्रयुक्तसाम्यविवक्षायामपि प्रसक्तत्वरूपसामान्यधर्मप्रयोगा
त्कथं समासः सामान्यधर्मसामान्याभावघटितविधानादित्यत आह उपमानमितिनेति तत्त्वेन विवक्षितेत्यर्थः
तथा च साम्यप्रयोजकत्वाभिमतधर्मसामान्यवाचकपदाभावे समासविधानादत्रापि धर्मान्तराभिमतत्वाभावप्रयुक्तविशिष्टाभावसत्त्वा
त्समास इति भावः भाष्याब्धिरिति कोऽहं मंदमतिस्ततः क्वाणमुपहास्यत्वं यास्यामि पिप्सुनाल्पनामितितत उत्तरचरणत्रयामित्यर्थे
यदस्य योगः तदीहभाष्याब्धिरिति निरूपकं विवक्षितम् प्रकृते भाष्यप्राधान्यभंगापत्तेः अतो विततत्वउरवगाहत्वादिधर्म
प्रयुक्तसाम्यविवक्षया गाम्भीर्यस्य तत्प्रयोजकत्वमपहाय ततस्तत्वेपि उपमितसमासाभ्युपगमादित्यर्थः नच तत्राप्येतत्प
ते परिणामाभ्युपगमेनैव भाष्यप्राधान्यसंभवात्कथमेतदुपन्यासः पद्मसमत्वादितिवाच्यम् ॥ ॥

सूत्रस्य यथोक्तार्थकत्वेन अतिरिक्तकल्पनायोगात् नच सूत्रेण सामान्याप्रयोग इत्येवोक्तत्वात् उक्तरीत्या तदर्थसंको
चो ऽनुचित इति वाच्यम् सामान्यमात्राप्रयोगस्य साधितत्वात् उपमानिमित्तत्वेन धर्मविशेषस्यापि धर्ममात्रस्योप
मानिमित्ततया बाधतादवस्थ्यात् न उपमानिमित्तत्वेनाविवक्षितो यो धर्मस्तदप्रयोग इत्येव सूत्रार्थपर्यवसाना
त् बाधकाभावादिति प्रस्तुतश्चावं श्चावमित्यस्य समासं प्रत्येव बाधकत्वादित्यपि बोध्यम् प्रकारान्तरेणापरिणा
मप्रत्याख्यानमाह एवं चेति वदनमात्रस्येति चंद्रपदार्थतादात्म्येन प्रकारतामनापन्नस्येत्यर्थः शिशिरीकारकेत्व
ति मुखं तदित्यर्थः स्वरूपेणेति तादात्म्यसंबंधावच्छिन्नां मुखत्वविशेष्यतानिरूपितां प्रकारतामनासाद्येत्यर्थः न
नु उभयप्रतियोगिकाभेदस्य कथं रूपकत्वं उपमेयविशेष्यकोपमानाभेदारोपस्यैव रूपकत्वप्रसिद्धेरत
आह विषयेति भावप्रत्ययावच्छेदकपदार्थयोरुभयत्रान्वयः तदन्यतरेति उपमेयोपमानान्यतरेत्यर्थः रू
पकप्रकरणवक्ष्यमाणरीतिमनुसंधायाह एवं चेति विशेषणेति नत्र शब्दे निपातनियमानुरोधेन पूर्वपदा
र्थस्यैव विशेषणत्वाभ्युपगमात् वाक्ये तु विवक्षाविशेषवशादुभयस्यापि विशेषणत्वसंभवात् कथंचि
त्स्यादपि तथाबोधस्यतः समासस्त्वक्रमम् एतच्च सर्वमग्रे स्फुटं बोध्यं लक्षणेति चंद्रपदस्याह्लादकत्वे योगसत्त्वेपि पंकजा
दिपदवद्रूढ्यर्थविशेषणत्वेनैव योगार्थस्यावयवशक्त्या बोधस्य नियमितत्वात् केवलयोगार्थबोधाय लक्षणया आव

अ॰टी॰
७४
74

रूपकत्वात् लक्षणादेरिति गौणसारोपलक्षणयाइत्यर्थः अन्वत्कर्षेणेति अभेदानुयोगित्वेनवर्णनीयप्रतीतेरेवतदुत्कर्ष
वीजतयाउभयसमंतत्वाद्वैपरीत्यकल्पनेमानाभावात् संभवादिति नचात्रापितादृप्येणतिरूपसामान्यधर्मप्रयो
गेः स्यैवेतिवाच्यम् तन्निमित्तकसाम्यस्यानभिमतत्वात् आननस्मिन्पदोत्तरलक्षणीयायाअभेदोऽर्थः विरहिणामपी
ति सर्वसुखतोषजनकत्वस्यतन्नोलाभादित्यर्थः तनितिविरहिणेति योषित्यस्यापृथ्यकादत्वेवाधकाभावादित्यर्थः नचा
त्रसमासविवक्षायांकागतिः मुखस्मितनाभिन्नचंद्रज्योत्स्नयोरेवात्रोपमानिमित्तत्वाउपमितसमाससंभवादितिवाच्यं
मात्रकेरेवाश्रयणीयत्वात् विशायरेणेति राजपदेनचंद्ररूपविषयेनिर्दिष्टेतत्रारोप्यमाणस्यान्यस्याक्रमणरूपकर्मो
पयोगिनः प्रतीतेः परिणामोव्यज्यतइत्यर्थः उभयार्थत्वादिति राजाप्रभौनृपेचंद्रे इतिकोषदर्शनात् वाच्यत्वादिति
तादात्म्यप्रतियोग्यनुयोगिनोः शाब्दोपात्ततयामुखचंद्रेणेत्यादितोविशेषान्निरुक्तेः पदैकाभेदयोजकत्वादस्यथावि
ढत्वात् नसेत्यादावपिवाच्यरूपकांगीकारविरोधापत्तेः एतेनेति चित्रमीमांसायांहितायपदेनविषयध्वनित्वंदूषितम्
तत्रह्यारोप्यमाणस्यान्यस्यान्त्यात्मनेवकर्मत्वेनाक्रमणोपयोगोनतुचंद्रात्मनेतिविषयतादात्म्यापन्नस्याप्रकृतानु
पयोगादिति रसगंगाधरेत्वत्रपरिणामध्वनित्वमुक्तमेव विजृंभणंहिप्रागल्भ्यमात्रंनकेवलंरश्मिप्रेतं येनयशः
कर्तृकाक्रमणेऽन्यात्मनेवविषयिणोऽन्यस्यकर्मतारूपउपयोगः स्यात् किंत्वसमानजातीयद्वितीयराहित्यरूपः

१०५

प्रोक्तिविशेषः आक्रमणं तु न्यक्कार एव एतादृशविजृंभणे च चंद्रकर्मकस्यैवाक्रमणस्योपयोगो न तु त्वत्पकर्मकस्य ते
न यथोक्तप्रागल्भ्यानुपपत्तेः एवं च विषयित्वेन व्यज्यमानस्यापि त्वत्पस्य विषयभूतचंद्रात्मनैव प्रकृतोपयोगाद्विद्या
धरोक्तं निरवद्यमेव तदुक्तं न तु भयमप्यनुपपन्नं त्वत्पस्यापि राजपदार्थतया परिणामस्य व्यंग्यतायोगान्न इत्यर्थः
अर्थशक्तीति यद्यप्ययं शब्दशक्तिमूलत्वेनैव तत्र लिखितः पयोधरपदस्य परिवृत्त्यसहत्वात् तथाप्यर्थशक्ति
मूलपरिणामध्वनिप्रकरणे इत्यत्र समासे इति शेषो बोध्यः अत्र तापशमनहेतुत्वेनोपस्थितेन पक्ष्मान्मंदरूपसंबो
ध्यविशेष्यकस्मरतापकर्त्तावैशिष्ट्यबुद्धौ सत्यां सहृदयस्य तादृशतापशामकरमणीत्वत्पनरूपविषयाद्रूप्य बुद्धि
भवतीति परिणामध्वनिरिति तस्यार्थः तस्माद्यत्र तादात्म्यं शब्दस्यैकत्र तात्पर्यनियामकं प्रकरणादिकमस्ति तत्रैव परिणा
मस्य व्यंग्यत्वमुक्तमिति ध्येयं तथा इंदुनापरसौंदर्यसिंधुना बंधुना विना ममायं विषमस्तापः केन वा शमयिष्यते इ
त्यत्र वक्तृविरहितत्वेन व्यंग्यरमणीमुखाभिन्नत्वेनाभिमतस्येंदोर्विरहसंतापशमनहेतुत्वात् मुखस्य चेंद्राऽभिन्नत्वे
न बोधे तेन विरहतापशमनरूपप्रकृतकार्योऽनुपपत्तेश्चंद्रस्य विषयिणो विषयभूतमुखाभिन्नत्वं स्वरूपमिति परि
णामध्वनिरुक्त इत्यप्यवधेयं यदपि नारानायकशेखराय जगदाधाराय धाराधरच्छायाधारककंधराय गिरिजा
संगैकसंगाय गिरिणे तथा शेखरिणे दृष्टानिलकिनेनारायणेनाह्निणे नागैः कंकणिने नगनगृहिणे नाथाय सेयं

अ॰ टी॰
७५
75

नतिक्षितिवैयधिकरण्येनपरिणामइतिचित्रमीमांसोक्तंतन्नदूषितं रूपकमेवेदंनतुपरिणामः गिरिजासंगैकस्पृं
गारिणिभगवतिभवेप्रणामस्यप्रक्रांतत्वात्शृंगारिनयाचशेखरादिभूषणतामयेदितत्वात् आरोप्यमाण
नांशेखरादीनांस्वरूपेणैवोपयोगात् नतुनघादितादात्म्येनेति नयादिपदोत्तरमभेदार्थकतृतीयावशात्नघादि
तादात्म्येनशेखरादीनामवगमाद्विषयाभिन्नत्वेनविषयमुपस्थितौसत्यामपिविषयतादात्म्येनप्रकृतानुपयोगादि
ति तदपिचिंत्यं नारायणेमास्विणेइत्यंशस्यशृंगारितायामनुपयोगात्तदुपादानवलेनप्रकृतेशृंगारित्वस्यतम
स्कार्यत्वप्रत्यप्रयोजकत्वावगमात् अन्यथाक्रमभंगापत्तेः प्रस्तुतस्यनारायणतादात्म्यापत्त्यैवतद्गुणीभावेनशिवो
त्कर्षपर्यवसानात् केवलशेखरादीनांशृंगार्यंतरसाधारण्येनतयादितादात्म्यापत्त्यैवतदुत्कर्षावगमाच्च एवंहि
भीवः पुष्पकेतोर्विबुधविटपिनांपोतकस्त्वंविकल्पैःकिंलोरत्नस्यवीप्सातपनतनुभुवोवासवस्याहिरुक्तिः देवदे
वस्यदेत्याधिपमथनकलाकेलिकारस्यकुर्वीतानंदसज्जनानांजगतिविजयतेश्रीनृसिंहस्तेतीदृइत्यत्रयद्दूषण
मुक्तं राज्ञोनृसिंहस्यप्रतिपिपादयिषितोत्कर्षावितानंदजननजगदुत्कर्षेप्रारोप्यमाणद्वितीयमुन्नयादितादू
प्येणयथासंभवतोतनथाकेवलस्वरूपेणेतिविषयिणः स्वात्मनैवोपयोगोनतुविषयात्मनेतितनपरिणाम
त्वमिति तदपिसावद्यं मन्मथादिप्रत्येकसाध्यतत्तत्कार्योपकस्येवशान्तोहेतुत्वेनचमत्कारातिशयसमुल्लास

७८

ज्ञानः स्वरूपेणैव तत्रोपयोगादेवोत्कर्षसिद्धेर्विषयतादात्म्यापेक्षया अनावश्यकत्वादिति विभावनीयं शरीरत्व इति परि
णामस्वरूपपर्याप्त्यधिकरणत्वेत्यर्थः मानाभावादिति विशिष्टस्यैव परिणामालंकारत्वाभ्युपगमाद्विषयताद्रूप्य
मात्रस्यापि तच्छरीरत्वाभावादित्यर्थः ननु विशिष्टस्यैव परिणामालंकारत्वयात्वेपि तदेकदेशस्य विषयिणो वि
षयताद्रूप्यस्य शाब्दधीविषयत्वात्कथं विशिष्टस्य व्यंग्यत्वमित्यत आह एकदेशस्येति तत्र प्राचीनसंमति
माह अत एवेति थम्यासीति नायिकायाः सखीं प्रत्युक्तिः नीविरागग्रथ्यं तन्नायीजवनस्य स्यवास सद्गति नाममा
ला शापामीत्यत्र स्वाभिप्रायाविष्करणमात्रस्य विवक्षितत्वादात्मनेपदाभाव इति शाब्दिकाः आवश्यकत्वादिति
अनन्वयानुपपत्तेः पूर्वमेव प्रतिसंधानात् विरोधिलक्षणयाथम्यपदस्यान्यार्थकत्वादित्यर्थः चण्डीदास
इति इदमुपलक्षणं इंदुनेत्रित्वङ्कपरिणामध्वन्युदाहरणेपि विषयिणो विषयतादात्म्यस्य व्यंग्यत्वेपि उ
त्तरार्द्धे विरहतापोपशमनरूपप्रकृतकार्योपयोगितायाः शाब्दविषयत्वाङ्कगते रवसंपशरणीकार्यत्वा
दित्यर्थः २ केचित्तु सामान्येन निरूपितस्यार्थस्य स्तुत्वप्रतिपत्तये यत्तदेकदेशं निरूप्यते योरवयवावयविभाव
उच्यमान उदाहरणालंकारः उच्यमानइत्यर्थांतरन्यासवारणं तत्र व्यंग्यत्वात् तदुक्तिः अश्व इव यथा निदर्शनदृष्टा
न्तादिशब्दैर्बोध्या नन्व इव आदीनां साहश्यार्थकतया सामान्यविशेषभावार्थकत्वं नास्तीति वाच्यम् लक्षणया तत्संभ

वात् अन्यथासंभावनार्थकत्वमपि न स्यात् इवपदेन यथा अमितगुणोऽपि पदार्थो दोषेणैकेन निंदितो भवति निखि
लरसायनराजो गंधेनोग्रेण लशुन इवा अत्र सत्पदार्थलशुनयोर्दोषोग्रगंधयोश्च सामान्यविशेषभावः नचै
यमुपमैवेति वाच्यं विशेषस्य सामान्यावच्छिन्नप्रतियोगिताकभेदविरहात् उपमानतावच्छेदकावच्छिन्नप्रति
योगिताकभेदस्यैवोपमेयवृत्तेरुपमाव्यवस्थापकत्वात् अत एवात्र सदृशादिशब्दानामप्रयोगः संगच्छते ना
प्यर्थांतरन्यासविशेषः तत्र इवादिपदप्रयोगविरहात् नचार्थत्ववाच्यत्वमात्रेणावतास्यात्रव्यतिरेक इति वाच्यं सा
मान्यार्थसमर्थको हि विशेषवाक्यार्थो द्विविधः अनुवाद्यंशस्यैव विशेषरूपत्वे विधेयांशस्तु सामान्यगत एवेत्येकः
अंशद्वयेऽपि विशेषत्वमेवेत्यपरः तत्राद्ये उदाहरणालंकारो द्वितीये त्वर्थांतरन्यासविशेष इति भावः इत्याहुः प्रा
चीनानुसारिणस्तु उपमैवेयं निर्विशेषं न सामान्यमिति न्यायेन प्रथमोक्तसामान्यस्य किंचिद्विशेषपर्यवसानावश्य
कतया तेनैव सहचरमोक्तविशेषस्योपमानिष्पत्तिसंभवात् एकविशेषवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्य वि
शेषांतरेऽप्यबाधितत्वात् सामान्यविशेषभावस्य प्रथमं प्रतीतावप्यन्ततः सादृश्य एव विश्रामाच्चेत्याहुः वस्तु
तस्तु इवादिपदं विना सामान्यस्य विशेषांतरमादाय न पर्यवसानं उत्तरार्द्धोपस्थितविशेषमादायैव तदावश्यकत्वात्
अन्यथा तदुपादानवैयर्थ्यात् उभयोः समर्थ्यसमर्थकत्वमन्यथा च अतोऽर्थांतरन्यास एवायं अनुवाद्यांशस्य विशे

षत्पदं विधेयांशस्तु सामान्यगत एवेत्यवान्तरभेदेपि नेह विवक्षितत्वात् इवादिपदप्रयोगस्तु सामान्यव्या
प्तिग्रहस्थलविशेषप्रदर्शनार्थः अत एव संदृशादिपदानामप्रयोगोपि संगच्छते एवं च दोषसमत्वादार्थस्या
पि गर्हीहेतुरिति हेतुहेतुमद्भावस्य लक्षणस्थल एव ग्रह इति परमार्थस्तु निदर्शनाविशेष एवायां विशेषवा
क्ये कार्यतावच्छेदकधर्मस्य सामान्यवाक्यगतत्वाद्दृशधर्मव्याप्यतायामेव विशेषेण सामान्यस्य समर्थनरू
पार्थान्तरन्यासस्य व्यवस्थापयिष्यमाणत्वात् प्रकृते च उक्तं पदमवाप्य यो लघुलीलयैव समपादिति ध्रुवं
प्रोल्लशेखरगतो हर्षत्कणक्षुरुमारुतधूतः पतन्नयथ इत्यत्रैव लक्षणापानिरूक्तेः उक्तेन पदश्रमेण लघुर्त्ति
स्थ्र्येन पतति शैलाग्रवर्तीमंदमारुतेनोद्धूतो हर्षकण इवेत्यतोपि नत्समानाकारकप्रतीतेरेवोदयात् वि
श्रव्याघातदोषः स्वबधाय खलस्य वीरकोपकरः वनान्तभंगधतिरिव हरति निद्रांतस्करः करिण इत्यादा
वपितथात्वदर्शनात् परंतु इवपदप्रयोगाभावे द्वितीयवाक्येन वक्रियापदस्य पुनः प्रयोगः इवपदे सत्वे त
न्नेहलादेवनत्रनदन्यथापपत्तेर्नतथेति वाक्यभेदस्तु उभयत्राप्यविशिष्टः यत्तु उदाहरणेलंकारे इवादिपद
प्रयोगे वाक्यभेदाभावो निदर्शनादिशब्दप्रयोगे तु न समस्त्वन्मते तन्मंदं सामान्यधर्मवाचकपदस्य पृथक्प्र
योगविरहेपि वाक्यभेदस्यावश्यकत्वात् वाक्यैकवाक्यतायास्त्वोभयत्राप्यविशेषादिति संक्षेपः तदेतत्सर्वं ध

नयत्राह इत्यलमिति इत्युपमा ओंम् भेदगर्भसादृश्यावगाह्युपमानिरूपणानंतरं भेदनिर्मुक्तसादृश्यावगाहि
नयाः नन्वयः प्राप्तसंगतिक इत्याह अथेति द्वंद्वात्परं श्रूयमाणं प्रत्येकमभिसंबध्यत इति न्यायेन उपमानोप
मेयत्वेन यत्र तत्पदार्थस्योपमानपदार्थेनाप्यन्वयः तदेव स्पष्टयति उपमानेनेति ननु हासः प्रसूनमिव हास इव
प्रसूनमित्युपमेयोपमायांश्चौपम्यायामुपमानतावच्छेदकं प्रसूनत्वमेवानन्वयोपमायामुपमेयतावच्छेदक
मिति तत्रातिव्याप्तिरत आह यद्धर्मेत्यादिना तत्र तत्प्रसूनत्वावच्छिन्नप्रतियोगिताकत्वाद् द्वेपि प्रसूनत्वावच्छिन्ना
नुयोगिताकत्वेनास्तीति न व्यभिचार इत्यर्थः अन्यसादृश्यनिषेधार्थकत्वस्य लक्षणप्रवेशभ्रमं निवारयति अ
नन्वयपदार्थमाहेति अन्यस्य सादृश्यमिति षष्ठीसमासे इंदुरिव श्रीमानित्यादिनार्थादाद्युपमाननिषेधानुपपत्तेरसंग
तिः स्यादत आह कर्मधारय इति नन्वेवमपि नाभीष्टसिद्धिरुपमानान्तरस्यापि किंचिदन्यत्वादत आह स्वभिन्नमिति संनिधा
नवशात्स्वकृतस्यैव प्रतियोगितया भेदेऽन्वय इति भावः ननु सादृश्यपदस्य सादृश्याश्रयपरत्वात्कथमुपमानलाभ इत्यत
आह सदृशपदस्येति अनन्वयपदस्य योगशक्त्या उक्तार्थपरत्वं दर्शयति न विद्यत इति न विद्यतेऽन्वयो यत्रेत्यर्थेऽन्वयोऽस्य
र्थानां वाच्यो वोत्तरपदलोपश्चेति वार्तिके नञ्बहुव्रीहौ कृते विद्यमानपदलोपः अन्वयस्य किंनिरूपण इत्याकांक्षायां स्वभि
न्नस्योपमानत्वेनेत्युक्तं उपमेयभिन्नस्य सादृश्यादेरेवान्वयसत्वात्तद्वारणाय उपमानत्वेनेति ॥ ॥

नत्वेनदपिसमासकोटिप्रविष्टमितिद्रष्टव्यम् भैमीनेत्रमिवेति यद्यप्यस्याश्चास्या इतियथाश्रुतेनभैमीप्रतियोगिक
त्वाहरणास्त्र्यस्यभैम्यानेत्रं उक्तविशेषणाविशिष्टं इमेवायाति तथाप्यवयववर्णनसैवप्रक्रमात् अस्यानेत्रमिवा
स्यानेत्रमित्यन्वयोनेत्रपदाहृत्यावश्यकार्यइत्यर्थः नत्वावदिति इदंचइवार्थस्यभेदस्योपमेयान्वय इतिपक्षभंगी
कृत्योक्तम् व्यासज्येति द्वयपरोभयत्वावच्छिन्नप्रतियोगिताकभेदस्यद्वयदावपिसत्त्वात् इत्यर्थः देशेत्यादि पूर्वदृ
ष्टादिहृतित्वविशिष्टस्यैतत्तदृष्टादिहृतित्वविशिष्टस्यैवचैत्रस्यभेदप्रतीतेः नापीति वाच्यमित्यनेनान्वितम् फ
लभेदस्त्वनेनरंउपमाभेदकइत्यस्यानुषंगः तमेवफलभेदंदर्शयति चेद्इवेत्यादिना सिद्धत्वादिति धर्मैव
इहृतितत्तानकालेभेदस्यधर्माश्रयत्वमपिवुध्याने समानवित्तिन्यायात् ननुश्रुतहेतोश्चस्यपुनर्वैयर्थ्याचंद्र
स्यामुद्रमानताद्धीन्यैववुद्धिर्भवति शाब्दादिकादर्थोपिकृमितिन्यायादित्यर्थः ननुशाब्दादौसमानविति
वेद्यत्वन्यायोनास्त्येवतस्याव्युत्पत्तिविशेषनियतत्वात् मानसंचानज्ञानंशाब्देनप्रतिवंधकं अन्यथायोग्यताज्ञान
स्यावश्यकत्वयाशाब्दादिति न्यायेनशाब्दगम्यमर्थमुपेत्यप्रकारांतरेणतद्बोधानुसरणस्यानुचितत्वादित्यर्थः
ननुधर्मस्यतदन्वयसंभवेपिइवार्थभेदस्यतदन्वयायोग्यतयानैवंबोधः स्यादित्याशंकेत नचेति यद्यपिविशि
ष्टतयाभेदः पूर्वमेवाक्तइत्यतइयंशंकानपुनरुदेतुमर्हति तथापिसिद्धांतवद्वामाणरीत्या उक्तविधभेदस्यत
द्बोधेदापत्तेः संतं पतद्बोषस्याप्यत्रैवाध्यत्वात् वाधकाभावादिति कृतिप्राप्रेप्सकरणादीनामनवकाशा २४ ॥

अ॰ टी॰ ७९

७८

हाकाजनकशाब्दबोधविषयत्वाभावनिरूपकपदाद्यदिदमुक्तम् भेदमात्रोपपत्तिमाश्रित्याह एतत्कालीन इति यावद्रूप
कत्वादिति अत्र यथा शाब्दबोधावच्छेदेन कपिसंयोगवान् वृक्ष इति ज्ञानस्य मूले वृक्षः कपिसंयोगी नेति बोधविरोधित्वापत्तेः
तथा च बाधबुद्धौ यदवच्छेदकतयाभासमानेन देशावच्छेदेनैव प्रतियोगिविशिष्टधीर्न भवति अत्र च बाधबुद्धौ तत्कालाव
च्छेदकतयाभासमानेन विशिष्टबुद्धौ तत्कालस्य तेन विरोधित्वमिति भावः बोधापत्तेरिति योग्यताज्ञानघटकस्य
शाब्दबोधप्रवेशावश्यकत्वादित्यर्थः अत एवेति उक्तावश्यकत्वरूपहेतोरेवेत्यर्थः संयोगसंसर्गकपर्वतविशे
ष्यकवह्निप्रकारकयोग्यताज्ञानसत्त्वे पर्वतो वह्निमानिति वाक्यात् समवायसंसर्गीकृत्य पर्वतविशेष्यकवह्निप्र
कारकशाब्दबोधो न भवति विशेष्यप्रकारकयोर्योग्यताज्ञानविषयत्वात् तयोरेवभासनवत्संसर्गस्यापि तादृश
स्यैवभानादित्यर्थः पदार्थयोर्विषयतायां पदोपस्थितत्वस्येव संसर्गविशेषस्य शाब्दबोधविषयतायां योग्यताज्ञा
नविषयत्वस्य नियामकत्वमित्यत्र तात्पर्यम् नन्वेवमपि एतत्कालादेः संसर्गत्वेन प्रकृते भानविरहात् पदार्थ
त्वाभावात् कथं शाब्दबुद्धिविषयत्वमिति चेन्न सर्वं चेदं पदस्य तादृशार्थे लक्षणास्वीकारात् नन्वेवमपि योग्य
ताज्ञानविषयत्वस्य तद्विषयत्वनियामकत्वकल्पनमसंगतं लक्षणास्वीकारे पदार्थत्वेनैव तदुपस्थितिसंभवा
दिति चेन्न सर्वं चेदं पदार्थस्यार्थ्वकालावच्छिन्नप्रतियोगितेन भेदेन तस्यैव तत्कालावच्छिन्नानुयोगितेन चेदं पदा

७७

र्थेऽन्वय इत्यर्थात् ननेवमप्येतत्कालीनश्चंद्र इत्याकारकबोधानुपपत्तिरेव संसर्गांशनिविष्टपदार्थस्यान्वयप्रतियो
गिपदार्थविशेषणत्वेन बोधायोगादिति चेत् न ईदृशबोधस्यैवाविवक्षितत्वात् वस्तुतस्तु चंद्रपदस्यैतत्कालीन
चंद्रलक्षणया एतत्कालीनश्चंद्र इत्यादिरेव बोधः परोपस्थितपदार्थानां तद्योग्यताज्ञानविषयसंसर्गस्य चावश्य
श्याद्भानमित्यत्र चात एवेत्यादिकथनमिति संक्षेपः अस्माकमपीति ननु भवदभिमतस्थलेऽपि आरोपितभेदेनोप
मेवालंकार इति प्रामाणिकसंमतमिति अनन्वयालंकारो नवकाश एव तथाहि उत्तरमीमांसायां प्रथमाध्यायतृ
तीयपादे दहर उत्तरेभ्य इत्यधिकरणे अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुंडरीकं दहरोस्मिन्नंतराकाश इति श्रुतौ
ब्रह्मपुरं शरीरं जीवस्य ब्रह्माभिन्नतया तन्निवासरूपत्वात् दहरं परिच्छिन्नमल्पमिति यावत् पुंडरीकं तत्सन्निवे
शं हृदयमित्यर्थः तत्संबंधितया तदंतर्गत आकाश उक्तः स किंभूत आकाश उत परं ब्रह्मेति संदिह्य भूताकाश
स्य विवक्षितत्वे यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इति श्रूयमाण उपमानोपमेयभावो न संभव
तीति शंकायां पूर्वपक्षिणा अवच्छिन्नानवच्छिन्नभेदेन बाह्याकाशहृदयावच्छिन्नाकाशयोर्भेदमारोप्य उपमानोप
मेयभावः समर्थितः सिद्धांतेऽपि भेदारोपेण तदुपपादनमनातिकगतिरिति नात्र तदंगीकरणमुक्तमित्यभिहिते न
न्वाच भाष्यकृतः अगतिकाहीयं गतिर्यत्काल्पनिकभेदाश्रयणमिति वाचस्पतिमिश्रैरपि भामत्यामुक्तं तद्व्याख्या

नावसरे तेन तस्योपमेयत्वं रामरावणयुद्धवत् अगत्याभेदमारोप्य गतौ सत्यां तद्युज्यते तदपि कल्पतरौ व्याख्यानं स्पष्ट
नाद्यतनत्वादिना युद्धे भेदारोपः क्रियते गगनं गगनाकारं सागरः सागरोपमः रामरावणयोर्युद्धं रामरावणयोरिव
त्येवेति यत्तावता हि एवंविधस्थले भेदारोपेण उपमेयत्वाभिप्रायो लभ्यते तथा च तत्र भेदविवक्षोच्यत इति येनैव
हेतुना एको गौस्तेनैवापरोपीति क उपमानोपमेयभाव इति तथा पंचमाध्याये तेन तुल्यमिति सूत्रे कैयटेनापु
क्तं शायितव्येन तुल्यं शायितव्यं इत्यत्र नास्त्युपमानोपमेयभावः यथा गौरिव गौरिति पूर्वमीमांसायामपि त
द्व्यपदेशाधिकरणे श्येनेनाभिचरन् यजेत इत्यत्र गुणविधित्वपक्षे श्येनपदस्य पक्षिविशेषनिरूढत्वात् तस्यैव विधेयत्वाप
त्तौ यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यमादत्त इति उपमानोपमेयभावो न संगतः स्यात् स्वस्य स्व
सादृश्याभावादित्युक्तं अत्रोच्यते न तावद् गगनमित्यत्र भेदारोपेणोपमेयत्वेन हि रोधः तत्र भेदविवक्षायामुपमा
या अस्माभिरपि स्वीकारात् यदा तूपमानान्तरव्यावृत्त्यावेव तात्पर्यं तदानन्वय एव कैयटग्रंथादावपि हि उपमानो
पमेयभावो नास्तीत्युपमानान्तरसादृश्यपर्यवसानेनास्तीत्यर्थो लभ्यते तेन चान्यप्रतियोगिकसादृश्यनाश्रयत्व
विवक्षायां न कोपि विरोध इति अनुभवसिद्धस्यार्थस्य विरोधेनापलापानर्हत्वाच्चेति एवं च उपमानानि सामान्य
वचनैरिति सूत्रे यन्महाभाष्योदाहरणे यद्युपमानोपमेययोरैक्यं तदा गौरिव गौरित्यत्राप्युपमानोपमेय॰ वः

प्राप्नोतीति तदप्युक्ताभिप्रायकमेवेति इवार्थ इति लक्षणायतिशेषः एवं शक्तिपक्षेपि अर्थैकदेशमपहाय तदेकदे
शप्रतीतौ लक्षणावश्यकत्वात् शाक्यतापर्याम्यधिकरणपूर्वशाकैः सिद्धान्तसिद्धत्वात् अत एव लक्षणाप्रसं
गभियादहृराधिकरणे आकाशस्याकाशासाम्याश्रयणे निराकृतं उक्तं वाच्यस्य तत्रानुपयोगाच्चेति ध्येयं व्यंग्ये वेति
त्वहृन्निधर्मवत्तया चमत्कारानुजीवनादित्यर्थः आद्यमुदाहृतमिति आहूर्णितं पद्मलमद्विपद्ममित्यत्र
आहूर्णितत्वादिविशेषणानामनुगतानां नेत्रहृदयाविनत्वादित्यर्थः आद्यंशाहापानानुगामिधर्मवत्ताका
मित्यर्थः एवं द्वितीयमित्यत्रापि क्लीवत्वमुपपाद्यं विवक्षितमिति अत्र प्रकाशकत्वातिशयादिरूपधर्मोनुपा
त्त इत्यर्थः ध्वनिरिति यद्यप्युपमानान्तरव्याहतिरत्र शब्दोपात्तैव तथापि न त्रिरूपेण तत्सादृश्यस्यैवानन्वय
शरीरतया तस्य व्यंग्यत्वमित्यर्थः त्वाहूतेति सुंदरकांडे सीतां प्रति रावणस्योक्तिः रूपकृदित्यनेन नानादेहस
सारेण नानाविधसौंदर्यनिर्माणजन्याभ्यासातिशयसूचनं उपरत इति रूपकरणाद्विरत इत्यर्थः एवं च पूर्वरू
पनिर्माणाभ्यासेन सीतारूपातिशयजननवत् यत्नरूपनिर्माणाभ्यासेन यत उत्तरनिर्मितरूपेऽप्युत्कर्षोपि
सेत्स्यतीति नाशंकनीयं न चैतदुत्तरं रूपनिर्माणाद्विरहस्यापत उत्कर्षरूपाभावसिद्धावपि मदभ्यासेनैतद्रू
पनिर्माणं तज्जन्यनाथिकान्तररूपाणामेतत्समानकालीनानामेतत्सादृश्यं देवेति चेत् न तादृशविलक्षण

अ॰टी॰
७५
८॰
४०

भ्यासेनैतद्रूपस्यैव निर्माणमित्याशयात् तदाह नहीत्यादिनोत्तरार्द्धेन रूपोपमेति नैवन्त्वस्य समासे पदत्वाद्रूपान्वयः उ
पमीयते इत्युपमा तद्रूपं उपमेयं यस्या इति समासः स्वकीयरूपनिष्ठोपमानताद्वारेणोपमानत्वं बोध्यम् यदित्व
ङ्. प्रत्ययस्य कर्मणि विहितत्वात् कथमुपमीयते इति व्युत्पत्त्या उपमापदस्योपमेयपरत्वपरत्वमिति विभाव्यते त
दाक्षेपदसत्त्वमाश्रयणीयं अथ तस्याप्यगतिकगतित्वात्तत्राप्यप्रतीतो यत्तदा उपमापदस्य तद्वत्परत्वमाश्र
यणीयं पृथिवीत्वेन इति च लोकमात्रपरं रूपकरणानस्योपरमे हेत्वभावादन्यत्रापि तादृशरूपोपमानुपप
त्तेः अत्र तदुपमान्यानास्तीति अन्यस्यापवैत नितृसादृश्यप्रतियोगिभूतायाः प्रतिषेधात् भेदगर्भसादृश्य
स्याभिमतत्वात्तमेव त्वत्सदृशीत्यनन्वयो ध्वन्यते यथा वा नैषधे जागर्त्ति मर्त्येषु न लार्थमस्या योग्येति योग्या
नुपलंभनेन: यद्यस्ति नाके भुवने: प्रवा यत्तदा न कौ तत् खुनलोकवाधः इदं च भैमीत्वं ह्यसाधारणधर्मस
जातीयधर्मनिमित्तकस्वसजातीयप्रतियोगिकसादृश्यवती वस्तुत्वात् घटादिवदित्यनुमित्या भैम्या अन्यसदृश
त्वसिद्धौ अर्थात्तत्तितसादृश्यप्रतियोगिनाधिकान्तरसिद्धिरित्याशंकोच्यते इहहि भैम्युपमानभूताया भूतले
योग्यानुपलंभादेवाभावसिद्धिः भूतले यदि भैमीदृशीतसादृश्यप्रतियोगिनाधिकाधिकरणं स्यात्तदा तदनुयो
पलभ्येनेत्यापादनसंभवात् अथ यदधिकरणं यदसन्निकृष्टं तत्र तस्य कथं तदभावनिर्णयः अधिकरण

त्वानरूपकारणविरहादितिचेत् उपलंभस्यप्रत्यक्षशाब्दादिसाधारणस्याविवक्षितत्वात् तथाचदेशांतरेतत्स
त्त्वेनदृष्टिजनानरनाकादिनानस्तीतिसंभवात् स्वर्गपातालयोस्त्वनुमानेनतदभावःसाध्यते तथाहि स्वर्ग
पातालेभैमीवृत्तिसादृश्यप्रतियोगिनायिकाविरहितेभैमीदर्शनविषयकोत्कटेच्छावत्त्ववृत्तिकत्वादिति
सामान्यव्याप्तिमूलकानुमानेनाऽभिमतार्थसिध्यति नचात्रप्रतियोग्यप्रसिद्धिः भेदभेदसाधारणसादृश्यविव
याभैम्याएवतादृश्याःप्रसिद्धेः नचैवंतदभावेनैवसिद्धसाधनं भैम्यभावाश्रयत्वेनानभिमतत्वेसतीतिपदवि
शेषणात् तथाचवाधेनभैम्यभावमादायसाध्यानुपसंहारात् केचित्तु स्वर्गपातालवृत्तिनायिकाभैमीवृत्तिसा
दृश्यप्रतियोगित्वाभाववत्यःस्वसमानदेशानांभैमीदर्शनविषयकोत्कटेच्छानिहत्यजनकत्वादित्यनुमानमि
त्याहुः एवंचभैमीभिन्नतदुपमानत्वनिषेधेभैम्यामेवभैम्युपमानत्वंव्यज्यतइति इदंतुवधेयं वाच्यानन्वयेय
थाश्रुतमात्रस्यचमत्काराताधायकतयाउपमानांतरव्यावृत्त्यनुसरणमितिसर्वसिद्धं यत्रतूपमानांतरव्यावृ
त्तिरेववाच्यातत्रतस्याश्चमत्कारोल्लासकत्वात् तदनुल्लासकत्वनिष्ठस्वप्रतियोगिकसादृश्याश्रयत्वव्यंजनेन
ध्वनिव्यवहारप्रयोजकं वाच्यपेक्षयातस्यातिशायादितिवस्तुगतिः तथापिग्रंथांतरानुसारेणस्पष्टार्थंचतदुज्जी
वनमितिदिक् केचित्तस्यगणितस्यासमालंकारस्यानन्वयेंतर्भावत्वादेवतमाशंकते यत्त्विति एवमन्यत्रापि

अ.टी.
८९

यस्य यत्रान्तर्भावस्तस्य तत्रैवोद्भावनं अन्यथान्तर्भावयितुमशक्यत्वादित्यवधेयं सर्वथैवेति उपमानलुप्तायामुप
मायामतिव्याप्तिवारणायेदं नचप्रतीतिविषयस्योपमानत्वनिषेधेनार्थात् प्रतीतिविषयस्योपमानत्वसंभवेन सर्व
थोपमाननिषेधस्याविवक्षितत्वात् नचसमस्यालंकारान्तरत्वेनानन्वयस्यालंकारान्तरत्वानुपपत्तिः तत्राप्यसमाल
कारध्वनिनैवोपपत्तेरितिचेत् सत्यं अलंकारान्तरेणालंकारान्तरध्वननस्यान्यालंकारानपवादकत्वात् एतच्छ्री
मैवानन्वयध्वनिनापिनास्य गतार्थत्वमित्याह अयंचेति उपमावत्प्रयोगोपीत्यनन्वयः पृथगिति दीपकादिवदिति
शेषः नत्वेवमस्य दूषयति अन्यथेति नत्वसमालंकारध्वनिनानन्वयस्यैव वैयर्थ्यं कुतो नस्याद्विनिगमकाभावादि
त्यतआह आरोपइति अनन्वयस्योभयसिद्धत्वात्तद्ध्वनिनास्यैव [illegible] इतिभावः ननूभयसि
द्धत्वमप्रयोजकं अनन्वयस्य गतार्थतामापादयतानस्य पृथक्त्वेनानभ्युपगमस्यैव संभवादसिद्धं च किंच
अनन्वयस्य शरीरं स्वस्य स्वसादृश्यं अस्य तूपमाननिषेधः तत्रानन्वयेन च चमत्कारार्थमुपमानान्तरव्यावृत्तिरुपजीव्यते एवंचोपमेयात्म
र्थप्रयोजकमनुपमत्वमेवासमालंकारस्वरूपमिति तस्यैवालंकारत्वमुचितं नतुवैपरीत्यम् असमस्थलेस्वेन स्वसादृश्यस्यावगते
चमत्कारानुपपत्तेः तावन्मात्रस्य चमत्कारसामर्थ्ये चानन्वयेपि उपमानान्तरव्यावृत्तिध्वननवैयर्थ्यापत्तेः एवंचावश्योपजीव्येनानुपमत्वेनानन्वय
यस्यैव गतार्थत्वं युक्तमिति अथोच्यते चमत्कारजनकमत्रोपमानान्तरव्यावर्तनरूपं तच्चानन्वये व्यंग्यमसमे च वाच्यमिति यत्र तद्व्यंग्यं तस्यैवाल
कारत्वमंगीकार्यं ॥

सपवत्यर्थोवाच्यापेत्तयाव्यंग्यः सत्त्वधिकचमत्कारमावहतीतिसर्वसंमतत्वादिति किंच कालत्रयेउपमाननिषेधो
समालंकारः तदनंतरभाव्येवउपमाननिषेधस्त्वनन्वयुव्यंग्यः एवंचासमस्यान्यत्रनहुन्नित्वंअनन्वयस्यचासम
व्यापकतयाधिकविषयत्वस्याष्टमेवेतिकथंवैपरीत्यमितिदिक् अलंकाररत्नाकरकारस्तु तेनतदेकदेशेनवा
वस्थितभेदेनोपमानतयाकल्पितेनसाहश्यपमानन्वयः उपमेयेनैवउपमानतयाकल्पितेनोपमेयस्योपमानतो
भासमानेसाधर्म्यमेकोनन्वयः प्रसिद्धएव यथा युद्धेअर्जुनोर्जुनइवप्रथितप्रतापइति उपमेयैकदेशस्यत
थैवोपमानताकल्पनमपरः यथा पतावतिप्रपंचेसंदरमहिलासहस्रभारतेपि अनुहरतिसुभगतस्यावा
मार्द्धदक्षिणार्द्धस्य उपमेयस्यैवप्रतिबिंबादिरूपेणभेदकल्पनयोपमानत्वकथनंतृतीयः यथा गंधेन
सिंधुरधुरंधरचक्रमैत्रीमेरावणप्रमत्तयोपितशिक्षितास्ते मत्तकचक्षितनयनाचलरत्नभित्तिस्वीयप्रतिछ
विछायूथपतित्वमेषि चक्रमैत्रीपकसार्थवर्त्तित्वमित्यर्थः कचदीप्माविस्वस्यैकचदितिरूपं एषुत्रिषुप्यु
पमानांतरविरहप्रतीतेरनन्वयत्वमित्याह अत्ररसगंगाधरकृतः उपमानांतरव्यावृत्तिमात्रेअनन्वयप्र
सरं इतेकोपमानोपमेयकत्वविशिष्टे आद्येस्तनाभागेपनन्वभातीत्यादेः कविकल्पितोपमायाञ्चप्र
नन्वयत्वापत्तिः यद्यथैकिंरूपानिश्चायोव्याप्तिप्रसंगाच्च द्वितीयेदक्षिणार्द्धवामार्द्धयोर्वस्तुतो

ग्र॰ टी॰
८८

भिन्नयोः सादृश्ये कथमनन्वयत्वशंका किंच गगनं गगनाकारमित्यादौ स्वातिरिक्तोपमानविरहप्रतीतिद्वारा उपमेयस्य
निरूपमत्वसिद्धिः अत्र तु वामार्द्धसादृश्यनिबंधात् निरूपमत्वमुपजीव्यविरुद्धतया नोल्लसत्येव नापि कागगननिरूपमत्व
प्रत्ययस्तु नानन्वयफलं भवितुमर्हति तस्याः प्रकृतोपमेयत्वाभावात् वामार्द्धस्यैवोपमेयत्वात् उपमेयगगननिरू
त्वप्रत्ययस्यैवानन्वयफलत्वकल्पनाच्च एतेनानन्वयध्वनिवमेत्यलंकारसर्वस्वकारोक्तमपि निरस्तमित्याहुः इत्य
नन्वयः २३ एवं स्वभिन्नसादृश्यव्यवच्छेदफलकमनन्वयं निरूप्य उपमानोपमेययोः परस्परातिरिक्तसादृश्यव्याह
तिफलक उपमेयोपमालंकारो निरूपणमर्हतीत्याह उपमेयोपममिति उपमानत्वमित्यनेनेतरं पूर्वोपमानस्योप
मेयत्वमित्यपि द्रष्टव्यं तेनो विपरीतोपरत इति कारिकायास्तदर्थकत्वात् अन्यथा रशनोपमायामतिव्याप्तेर
निवारणात् फलस्याभावादिति उभयोरन्योन्यातिरिक्तसादृश्यव्याहतिफलकत्वे सतीत्यस्यापि एतदीयलक्षणा
न्तर्गतत्वादिति भावः फलतीति सादृश्यस्यैव विधेयत्वेन प्रतिष्ठानादिति भावः लभ्यत इति उपमानं उपमेयं ध
र्मश्चेति त्रयमुपमाघटकं तत्र द्वयोर्वैपरीत्योत्पन्नधर्मस्य तदभावो लभ्यत इति भावः धर्मलोपस्तावदुदाहृतो हासः प्र
सूनमिवेत्यादिना धर्मवत्त्वेत्याह धर्मश्चेति अनुगामीत्यादि उपचारादेरप्युपलक्षणं ग्राहेति समुद्रपदे ग्राहाणां
जलचराणां समूहः आकाशपदे ग्रहाणां नक्षत्राणां संबंधी ग्राहः स चासौ समूहश्च ग्राहसमूहः विचरन् ग्राहसमू

८८

ह्रोयचेतिवक्रव्रीहिः धूर्वैरजोभिः स्यंदनो हृनौरित्यस्याः लक्ष्यत्वमयोक्तं संप्रतिप्रकारांतरेण तस्य लक्ष्यत्वमानयन्
तस्य लक्ष्यत्वव्यवस्थापकग्रंथं समर्थनाय प्रक्रमते अत्रेदमिति पर्यायेणेति योगपद्यविरहेणेत्यर्थः तस्मिन्नि
ति उपमानोपमेयभावे इत्यर्थः अत्र पर्यायेणेत्यनेन वाक्यभेदनियमोपि दर्शितः द्वयोरिति चस्य स्वार्थमेव अ
नन्वये पर्यायाभावात् अनन्वये पूर्वशंकानवकाश इति ध्येयम् यदप्युक्तं रसगंगाधरे अहं लतायाः सह
दृशीत्येवं गौरांगि गर्वं न कदापि यायाः गवेषणेनालमिहापरेषामेषापि तुल्या तव नावदस्ति इत्यत्र प्रतिपा
द्यायामुपमायामतिव्याप्तिः तद्दलानां युगपदुपस्थितिविरहेण न तावत्स्यः परस्परतुल्यामधिरोहतोद्दे प्रसंगदमा
नपुरुषेण रतारमंतव्यं दलस्य प्रचलितभ्रमरं च पद्ममित्यत्र युगपदुपस्थितायामुपमेयोपमायां वाक्यभेदाभावा
दव्याप्तिरिति तदप्युक्तं उपमायां विधेयत्वविशेषणदानेनाद्यदोषाभावात् नत्र हेतुत्वेनानुबाधत्वात् पर्य
वसितवाक्यभेदमादाय द्वितीयदोषाभावाच्चेति हृदिनिधाय रजोभिरित्यादेर्लक्ष्यत्वमाविर्भविष्यतीति हृ
दिनिधाय वाक्यभेद इति यत्त्वेवमपि सविता विधवति विधुरपि सवितरति तथा दिनंति यामिन्यः यामिनयं
ति दिनान्यपि स्वखेदः खवशीकृतेमनसि इत्यत्रातिव्याप्तिरिति तदप्यसत् तथाहि उपमाद्वयेप्येकधर्मनिमित्त
कत्वं विशेषमावश्यकत्वतीयसदृशाव्यवच्छेदस्य धर्मैकामंतरेणानुपपन्नेरिति सर्वसंमतं एवं च सविता विधव

नीलत्वसत्वेप्यदन्तवधर्मः विधुरपि सवितरनीलपत्रचक्षुः खेदत्वमितिकथमतिव्याप्तिशङ्केतिसहृदयैर्विभावनीयं चित्रमी
मांसायांतः अन्योन्येनोपमावान्वाव्ययमानानुरूपनेरेणवा एकधर्माश्रयायासाउपमेयोपमामता अन्योन्यप्रतियोगिकत्व
विशिष्टाव्यंजनयाशब्दाबोधकएकधर्माश्रयोऽत्रोपमेयोपमेतिनसार्थः इदंनचसममित्युभयविश्रान्तोपमावा
रणाय विशिष्टान्तं नचान्योन्यप्रतियोगिकत्वांशस्यव्यंजनमानतयासादृश्यांशस्यशक्तिविषयतयाविशिष्टसादृश्यस्ये
कव्यापारबोध्यत्वविरहात् वांशेहेनपरस्परनैरपेक्ष्याभिधानात् व्यंग्योपमेयोपमासंग्रहाय चकेति वाच्यन
न्तसंग्रहाय ह्यसंतरेति रजोभिः स्यंदनोद्धूतैरित्यत्राति व्याप्तिनिषेधाय एकधर्मेत्युक्तं अत्रापिरसगगाथरकृतः अहे
लतायाः सदृशीत्युदाहृतं श्लोके तिव्याप्तिः तत्रतत्तीयसदृशव्यवच्छेदानवगमेनलक्ष्यतानौचित्यादितिवदंतिन
त्र विधेयत्वविशेषणेनवात्राप्यव्यभिचारनिरासात् यदपितेरुक्तं अन्योन्यप्रतियोगित्वस्यसंसर्गत्वेह्यत्र विषयता
न् पदार्थसंसर्गस्य हृनिवेयत्वविरहात् इति तदप्यसत् मात्रपदस्य ह्यसंतरव्यवच्छेदमात्रपरत्वात् एवंचप्रतियो
गित्वस्यसंसर्गतयाबोधेपि ह्यसंतरबोध्यत्वाभावसत्वेनमात्रपदविरोधाभावादिति रजोभिरित्यस्यलक्ष्यत्वविर
हशंकामवतारयति यत्वेति अनुगामीति अनेनप्रतियोगिकस्योमानुयोगिकोपमायांरजसामेवोभयानुगतानां
साधारणधर्मत्वदितिभावः विवेति व्योमप्रतियोगिकअनलोपमायाघनसदृशगजरूपधर्मनिमित्तकत्वात् आकाश

गजानां भूतले चञ्चत्नानामभावात् उभयोर्विंबभावांगीकारेण सामान्यधर्मसंपत्तेरिति भावः बाधकाभावादिति आद्यो
पमायां रजसां धर्मत्वं द्वितीयोपमायां तमेव तत्त्वगजानामिति द्वितीये तूभयत्र धर्मभेद उक्तः यदि तु यत्र संनिभैरित्यस्यो
भयत्रान्वयं कृत्वा मेव सादृश्यवक्तृत्वानां रजसां तादृशगजानां च विंबप्रतिविंबभावः स्वीक्रियेत तदोपमाद्वयेपि
धर्मैक्यमक्षतमेव न च रजसां भूमावपि सत्त्वात् तत्रावन्मात्रेणैव तत्प्रतियोगिकोपमानिर्वाह इति वाच्यं सत्यमात्रस्य साधा
रण्यनियामकत्वविरहात् रजो गजानां परस्परसादृश्यस्य चनाय यत्र संनिभैरित्यस्योभयत्रान्वयः तदाह रजोग
जानामपीति ननु विंबप्रतिविंबभावेन धर्मैक्यं कृत्वा उपमाद्वयस्वीकारे पूर्वोपमायां रजसां विंबत्वं गजानां च प्र
तिविंबत्वं द्वितीयोपमायां तु वैपरीत्यं उपमेयवृत्तिधर्मस्यैव विंबत्वात् उपमानवृत्तेश्च प्रतिविंबत्वात् इति चेत्
मैवम् अभेदसादृश्यादिना रजसां गजानां चोभयत्र धर्मत्वाविरोधात् अन्यथा विंबप्रतिविंबभावापन्नधर्मप्रयोज्या
या उपमेयोपमायाः सर्वाभ्युपगताया विलयप्रसंगात् तदेतत्सर्वमभिसंधायाह कृतमिति इदं चात्रावधेयं औ
चित्यवला उपमानोपमेयसादृश्यवाचकपदानामुभयत्रैकमेव प्रयुक्तं तद्वैपरीत्ये दोषः सहृदयोद्वेगात् क्रमेण
यथा वदनं कमलायते तदीयं शतपत्रं वदनायते सुदत्याः असितोत्पलमालिकं त्वपांगा नयनांतं त्वसितोत्पल
लस्य मालाः निर्मीतमेनस्क विभिर्मिनोक्तैः सर्वाविविनवद्विरपित्रिलोकीम् भूमा हम्भु नायति सदितीशः सगेति

अ०टी०
८५
85

तीशायतइत्यभुक्ता: उपमादोषाश्चापीहस्वयमूहनीया: स्फुटत्वादित्यतिभयाच्चकंवतोनलिख्यंते एतदलंकारध्वनि
र्यथा संसारसिंधावनुविंबमत्रजागर्त्तिजानेनववैरसेति: विंबानुविंबोहिविहायथान्तर्नजातुदृष्टान्तिसत्त्वपरस्पष्टि: अ
त्रवस्तुनोनलस्यापिदमयंत्यानलभिन्नत्वेनज्ञानात् उभयोरेवान्योन्यप्रतियोगिकंसादृश्यंपनत्वन्यस्येतित्यतीयम
हशाश्चवच्छेदफलकमन्योन्यसादृश्यमाश्रयंत्वप्रतीयते यदित्वभेदस्यापिपारमार्थिकत्वमेवाभिमतंतेनदेदंमदीयम
मभिरामराघवपद्यमुदाहरणीयं दृशारावणमेघनादमथनोतद्वृत्रिलोकोत्तरं सौभ्रात्रंचपराक्रमश्चसदृशाभा
तामसामान्यवत् आलोकाद्भवदीययोरपितयो: शूर्वीपजातापिधी: स्वप्रामाण्यविपर्ययप्रतिदैवास्कंदनं
नीयते भरतंप्रतिहनुमदुक्तिरियंअत्रासामान्यपदस्यसादृश्यानिरूपकतार्थकतयाश्रीरामलक्ष्मणाहू
त्रिस्नेहपराक्रमयोरन्यनिष्ठसादृश्यप्रतियोगित्वान्यप्रतियोगिकसादृश्याश्रयत्वाभयाभाववत्वेनज्ञानस्यभ
रतशत्रुघ्नोभयहृत्रिस्नेहपराक्रमदर्शिनोत्तरंअप्रामाण्यज्ञानास्कंदनाभिधानात् श्रीरामादिहृत्रिस्नेहपरा
क्रमयोर्भरतादिहृत्रिस्नेहपराक्रमयोश्चपरस्परप्रतियोगिकमेवसादृश्यंपनत्वन्यदीयस्नेहादिप्रतियोगिकमि
त्युपमेयोपमाध्वनि: यथाचनैषधपद्य कर्णोद्दितंनळदवाऊपाणिपदादिन:स्वाखिलतुल्यजेत: उद्वेगभाग
दयनाभिमानादिहैववेधाव्यधितद्वितीय: अत्रभैमीसंबंधिकर्णाद्यवयवाभामद्वैताभिमानभंगायतत्सजा

नीयावयवांतरविधानेऽन्यातन्नदवयवहयस्यान्योन्यप्रतियोगिकमेवसाम्यमितित्तृतीयसदृशव्यवच्छेदोऽन्यतर
तिसंदेहः इत्युपमेयोपमा २३म्। एतदनंतरं साहृश्योपजीवकप्रकृतविशेषकाप्रकृतप्रकारकसंभाव
नात्मकतयोत्प्रेक्षालंकारः प्राप्तसंगतिकस्तमाह उत्प्रेक्षामिति संभाव्यतइति संभावनाविषयीक्रियतइत्यर्थः
विषयत्वस्योत्प्रेक्षार्थत्वात् साम्यप्रतियोगिनासहेत्यन्वयः संभावनंच साधारणधर्मदर्शननिमित्तकं प्रकृ
तविशेष्यकं तादात्म्यसंसर्गकमप्रकृतप्रकारकं निश्चयानात्मकज्ञानं यस्तिहिमुखादौ सत्वापितत्प्रकारक
ज्ञानेकिमिदंचंद्रइत्यादिकमाहार्यज्ञानमनुभवसिद्धं तत्रज्ञानावभ्रमः विशेषदर्शनसत्वान्निश्चयानात्मक
त्वाच्च नापिसंशयः अनेककोट्यनुल्लेखात् नाप्यनध्यवसायः विशेषतोऽनुल्लिखितनानाकोटिकत्व
हितद्धितिलीलावस्तुपायादेरुत्प्रेक्ष्य यथाऽनुपलब्धपद्मसपत्नविपत्नसहचारस्यासाधारणधर्मस्यदर्शनात्पद्म
स्यादौकिंस्विदयमिति यथावाकिंपनसः स्विदयमिति आद्येऽनुल्लिखितनानाविरुद्धकोटिसमुल्लेखात् किंस्वि
दितिनानाकोटिकत्वेपिविशिष्यतदनुल्लेखात् द्वितीयेपनसस्यतदन्यस्यच किंचित्वेनविरोधिनानाकोट्युल्लेखेपि
किंचित्वस्यसामान्यरूपत्वेनविशिष्यकोटिसमुल्लेखोनास्तीतिविशिष्टाभावस्योभयत्राप्यविशेषात् इहचविशि
ष्यपकस्याप्यवकोटेः समुल्लेखात् तस्मात्संभावनमनध्यवसायभिन्नमितितत्संस्योपमेयेउपमानतादात्म्यायकता

अ॰टी॰
८५
85

दलंकारत्वमिति चक्रवर्तिनः न्यायपंचाननादयस्तु संभावनानध्यवसाययोर्विशेषमिच्छंतः अत्रापि शाब्दबोधे स्फुटत्वतादे
भेनेपि अलंकारताप्रयोजकसंभावनेतस्य विशिष्यानुल्लेखात् किंचद्वेयमिति किंपनसःस्विद्दयमिति वद्विशिष्य
नानाकोट्यनुल्लेखत्वात् तस्मादुत्कटोपमानकोटिकं प्रकृतविशेष्यकं संभावनं उत्प्रेक्षा संदेहालंकारेतु तत्तत्कोटि
कत्वमेवेति तन्नेदं हृत्वाऽऽह तदेतद्दर्शयति उपमेयइति विषयत्वसमर्पणार्थः संशयइति अनेककोटिकत्वमात्रसा
धर्म्यणसंशयत्वोक्तिः संभावनमित्यत्रैवतात्पर्यात् संशयार्थकत्वादिति यथोक्तानध्यवसायरूपसंभावनार्थ
कत्वादित्यर्थः उत्प्रेक्षापदमाहात्म्यादेवोक्तार्थलाभ इत्याह उत्कटेति उत्कटेत्यर्थः कोटिनिष्ठोत्कटत्वद्वारकंच
ज्ञानस्योत्कटत्वमिति बोध्यं प्रकृष्टेति प्रसिद्धत्वेन उपमानस्य प्रकर्ष इत्यर्थः ईक्षापदार्थमाह ज्ञानमिति यद्यपि
उपसर्गाणां वाचकत्वपक्षेपि प्रशब्दार्थस्य प्रकृष्टस्य विषयतासंबंधेन ज्ञानेधात्वर्थेन्वयो न संभवति प्रेक्षतइत्या
दौ ईक्षणादिनिष्ठस्य प्रकर्षस्य बोधेपि तस्य कर्मत्वादिना धात्वर्थान्वयाननुभवात् घटं प्रेक्षतइत्यादौ प्रकृष्टघटबो
धानुदयात् अन्यथा उपसर्गत्वमेव न स्यात् उपसर्गाः क्रियायोगइति सूत्रेण क्रियासंबंध्यर्थबोधकतायामेवता
द्विधानात् प्रकर्षस्य च आश्रयतया उपमानपदार्थेन्वयस्योक्तरीत्यालाभेन क्रियानन्वयात् प्रकर्षमात्रस्य प्रश
ब्दार्थतया तदन्वयप्रतियोगिप्याश्रयरूपार्थस्योपस्थापकपदाभावात् क्रियायामेवोपसर्गार्थान्वयाच्च प्रकृष्टप

वोपसर्गशक्तिस्वीकारेपि तस्य तादात्म्येन तथात्वेर्थेन्वयः स्यात् न तु विषयत्वादिनेति परमार्थः तथापि तादृशार्थपरत्व
मुक्तेर्द्वाशब्दस्यापि तत्र नान्वयं यद्वा प्रकृष्टविषयकत्वमेवात्र कथंचिदुपसर्गार्थः तथा चोत्कटस्य प्रकृष्टविषयक
स्य च तादात्म्येनैव तथात्वेर्थान्वयः द्योतकत्वेन तु तादृशार्थे धातोर्लक्षणेति एवमेव विनानार्थो वि संदेहे हरणे हार उच्य
ते नानासंदेहहरणाद्व्यवहारः प्रकीर्तित इति कात्यायनादिवाक्येष्वपि द्रष्टव्यं संदेहालंकार इति उपमेयवि
षयकोपमानकोटिकज्ञानत्वस्य संदेहे हरणाद्व्यवहारः प्रकीर्तित इति कात्यायनादिवाक्येष्वपि द्रष्टव्यं संदेहा
लंकार इति उपमेयविषयकोपमानकोटिकज्ञानत्वस्य संदेहेपि सत्वात् इत्यर्थः ननु तत्रापि कोटेरुत्कटत्वसंभ
वात् कथं ततोतिव्याप्तिनिरास इत्यत आह तत्र तुल्येति ननु संदेहकोटिद्वयस्य समानत्वमिति नियमोसिद्ध
एककोटिनिष्ठोत्कटतस्य संशये मणिकारादिसर्वसंमतत्वात् अनुभवसिद्धत्वाच्चेति चेत् सत्यम् तथापि संशयस्य
समकोटिकस्यैवालंकारत्वमिति अलंकारभूतसंशयेतिव्याप्तेरुत्कटत्वविशेषणेन वारणसंभवात् अतए
व संदेहालंकारेतिव्याप्तिवारणं प्रयोजनमुक्तं न तु संदेहमात्र इति न कोपि दोषः संभविन इति लोकसिद्ध
स्येति विषयविशेषणं तादृशेति तन्निष्ठसादृश्यप्रतियोगीत्यर्थः असंभवीति लोकप्रसिद्धत्वाभाववैशिष्टिकविप्रति
भामात्रकल्पितेत्यर्थः न चैवं नूनं मुखं चंद्र इत्यादावुत्प्रेक्षायामव्याप्तिः संभाव्यमानस्य चंद्रादेः स्वतःसंभवित्वा

अ॰टी॰
८६

दितिवाच्यम् चंडीदासेनैव समर्थनात् तथाह्याह क्वचिदेकरूपमात्रस्यासत्त्वं क्वचिन्न संभाव्यमानस्यापि तत्रा
द्यं यथा ममैव कंठे लुठत्काचनयनस्तत्र: संवीज्यमान: सितचामरेण घृणामोवभासेन तडितोपगूढस्खलद्बलाक:
किमु वारिवाह: अत्र हि संभाव्यमानतादात्म्याख्यधर्ममात्रस्यैवा सत्त्वं न तु संबंधिनो द्वितीयं यथा सव: पायादि
न्दुर्नवबिसलताकोटिकुटिल: स्मरारेर्यो मूर्द्धि ज्वलनकपिशे भाति निहित: स्रवन्मंदाकिन्या: प्रतिदिवससिक्तेन पय
सा कपालेनोन्मुक्त: स्फटिकधवलेनांकुर इव अत्र संभाव्यमानस्य कपालांकुरस्यापि शशविषाणसगोत्रत्वमे
वेति हेत्वादीत्यादिपदेन कार्यस्वरूपोभयग्रहणं यद्यपीह तु कार्ययोरपि स्वरूपत्वमस्त्येव तथापि न तु भयाति
रिक्तस्यैवात्र स्वरूपपदार्थतया विवक्षितत्वमिति प्राचां ग्रंथकृतां व्यवहारसमर्थनादत्रापि तथैवोक्तं वहतीव मही
तलभरितानोदयतीव हर्षितो वारयतीव पुरत: प्रेरयतीव पार्श्वगतो गुरुकायत इवोपरिसंस्थितस्तमोनिवह:
सेतुकाव्यतमोवर्णनम् प्रसिद्धोदाहरणमपि तद्विचारसौकर्याय प्रदर्शयति एवं लिंपतीवेत्यादि असत्पुरुषसेवे
व दृष्टिर्निष्फलतां गतेत्यनंतरार्द्धं मृच्छकटिकाख्यनाटके तमोवर्णनम् जयरामभट्टाचार्योक्तं समाधानमाह यत्विति ना
म्नामिति कातंत्रवचनमेतत् यद्यपि आख्यातमाख्यातेन क्रियासातत्ये इति वचनेन पचतभृजतेत्यादौ आख्यातांतयोर
पि समासो भवत्येव तथाप्यत्र तादृशां विशिष्य विधायकं नास्तीति भाव: सामान्यतस्त्वेवेति यद्यपि इवेनेत्यादिवार्त्ति

कमपि विभक्तिलोपपूर्वं पदसंस्कृतिस्वरत्वयोरेव विधायकं नञ्समासस्यापि सहसुपेत्यनेनैव समाससिद्धेरिति कैयटे
नाभिहितत्वात् तथापि प्रसिद्धिवशादेवमुक्तं उपसमासस्य नित्यानित्यत्वचिंतामपहायैवाह यथेति तथैव परिह
रति नहीति नैयायिकादिभिः कर्तुराख्यातार्थत्वाभ्युपगमादाह वैयाकरणेति भावनायामिति धात्वर्थ इत्यर्थः भा
वनाया धात्वर्थत्वेति तदभ्युपगमात् विशेषणेति भावप्रधानमाख्यातमिति निरुक्तस्वरसेन कर्तृप्रकारककथा
त्वर्थविशेष्यकबोधस्यैव तैरभ्युपगमात् स्वप्रतियोगिकेति यद्यप्यन्वयासंभवादित्येव वक्तुमुचितं संबंधात
रेणाप्यन्वयविरहात् तथापि प्रकृते उक्तसंबंधेनैवान्वयः संभावित इति विशिष्यसंबंधोपादानम् नन्वेकत्रान्व
यबोधेप्यपरेणापि समन्वयबोधः कुतो न भवतीत्यत आह यथेति एकत्रजनितान्वयबोधत्वेन निराकांक्षत्वादि
ति भावः उक्तार्थे प्राचीनसंमतिमाह तदेतदिति समभ्यूत इति विशेषणतामापन्न इत्यर्थः क्रियापद इति क्रियाप
दार्थे भावनायामित्यर्थः स्वक्रियासाधनव्यग्र इति स्वविशेष्यभूतक्रियान्वयेन चरितार्थतया ऽन्यत्रान्वयानाकांक्ष इ
त्यर्थः अन्यत् साहचर्यादिपदार्थं व्यपेक्षितं स्वप्रकारकान्वयबोधे विशेष्यतामापादयितुं न समर्थ इत्यर्थः अन्व
यायेति दृष्टिकान्यसमवेतत्वाभावस्यान्त्यग्रंथेप्याहितत्वादित्यर्थः व्युत्पत्तिवैचित्र्येति उभयान्वयाकांक्षावशेनेत्यर्थः
युगपदिति क्रमेणान्वये तु पूर्वान्वयेनैव निराकांक्षत्वतया द्वितीयान्वयेन स्यात् अतएव भुक्त्वा व्रजतीत्यत्र भोजनक

त्रीभोजनानंतरत्वजनकृतिमानिति विशेष्यविशेषणमिति न्यायेन यत्र गम्पदे च भोजनस्यान्वय इति द्वयोपायविवरणेऽप्यं
गीकृतम् ननु प्रकृतमर्थस्य प्रत्ययार्थेनैव समन्वयित्वाकांक्षत्वात्तस्यामंतत्रैवान्वयेन भाव्यमित्यत आह यद्वेति तथाच
तत्रैकस्यैव वहपृथिवीपदार्थस्योभयत्रान्वयः किं तत्तस्य समानार्थ एव समभिव्याहारस्तत्त्वमाच पृथिवीत्वा
वच्छिन्नप्रतियोगिताकभेद एव कारार्थ इत्यर्थः वैयाकरणानामिति मत इति शेषः बोधाभ्युपगमादिति धात्वर्थस्य
वहनस्य वर्त्तमानत्वस्य कर्तृविशेषणत्वेनान्वयायोगाच्चेत्यपि द्रष्टव्यम् किंच इपदस्य कर्तृविशिष्टसाहप्यपरत्वे आख्या
तार्थकर्तुरनन्वयापत्तिः एतद्दोषपरिहारार्थमवाह नचेति तथाच क्रियाविशेष्यकत्वस्याख्यातार्थकर्तृत्वस्य च रद
णमिति भावः आख्यातार्थकर्तरि धात्वर्थस्य कर्मस्य साहश्ये ऽन्वय इत्यत्र दूषणमाह तन्मत इति अन्वयाभावादिति
उक्तकार्यकारणभावबलेनाख्यातार्थप्रकारकधात्वर्थविशेष्यकबोधत्वस्यैव कार्यतावच्छेदकत्वात् वहनस्य
कर्त्रन्वये तिरस्यकर्मः साहश्यान्वयमप्युक्तरीत्या प्रत्याचष्टे अत एवेति नन्विव समभिव्याहारे धात्वर्थप्रकारक
बोधे आख्यातजन्यकर्त्रुपस्थितेराख्यातार्थकर्तृप्रकारकबोधे च इव पदजन्यसाहश्योपस्थितेर्हेतुत्वं कल्पनीय
म् सामान्यकार्यकारणभावबलेन च आख्यातार्थकर्तुर्वहनादिधात्वर्थेऽन्वयः अत उक्तबोधसिद्धिरित्यत आह अ
त्रैवेति प्रामाणिकत्वे गौरवमपि सत्येनेत्याशंक्याह प्रमाणेति इदं च सर्वं आख्यातार्थस्यैव कर्त्तृरुभयत्रान्वय इति

एवमपि हन्त्येत्युक्तं यदि तु कर्तृसादृश्यमेव लक्षणया इवपदार्थ इति द्वितीयः पक्ष आशंक्यते न चेदं युक्तं एवमपि व
हनस्य धात्वर्थस्य इवार्थैकदेशे कर्त्रादि विशेषणतया आख्यातार्थकर्त्रादिविशेषणत्वेनैकपदार्थस्य वारद्वयमन्व
यबोधापत्तिः यदि तु समभिव्याहृतधात्वर्थकर्तृसादृश्यमेव लक्षणया इवपदार्थ इत्युच्यते तदोपमानस्यापि इव
पदार्थतापत्तिः न चेष्टापत्तिः तस्य इवपदार्थबहिर्भावनियमदर्शनात् एतेन कर्तृसादृश्यस्य इवार्थत्वमपि निर
स्तं अपि च किं धात्वर्थवहनपरत्वे आख्यातं च कर्तृपरत्वे इवपदस्य तात्पर्यग्राहकं उत धात्वर्थ एव विशिष्टवहनकर्तृ
परत्वे नाद्यः विशकलिततयोरेव वहनकर्त्रोर्विधिप्रसक्तेः न च प्रत्येकोपस्थितौ विशिष्टमन्वयबललभ्यमिति वा
च्यं तथा हि वहने कर्त्रादि च इवपदस्य लक्षणा सादृश्ये च शक्तिरिति वृत्तिद्वयविरोधापत्तेः तस्य दोषत्वानभ्यु
पगमेऽपि लक्षणाद्वयगौरवात् न द्वितीयः आख्यातमात्रस्य विनिगमनाविरहात् न च वहतीत्यनेन विशिष्टमे
व वहनकर्तृपरत्वे तात्पर्यग्राहकमिति वाच्यम् एकस्मिन्नपि तात्पर्यग्राहकत्वस्य साम्यवाचकत्वोभयकल्पने
गौरवाच्चेति संक्षेपः वहतीत्यस्य यत्प्रकारक यद्विशेष्यकबोधजनकत्वं तादृशार्थ एव तात्पर्यग्राहकत्वस
म्भवेन विपरीतान्वितार्थे तात्पर्यग्राहकतासंभवात् प्रकारान्तरेण शंकते अथेति हन्तेरेव प्रतियोगित्वेन
सादृश्यान्वये विवक्षिते कर्तृसादृश्येन सिध्येदित्यत आश्रयमपि संसर्गकोटौ निवेशयाह हन्त्याश्रयेति अन्या

भू·टी·
८४
88

विशेषणीभूतेति यथा पचतीत्यत्र कृतेस्सादृश्ये चैत्रेऽन्वयः गजइव चैत्रो गच्छतीत्यत्र गजस्यापि प्रथमान्तपदोपस्थाप्यत
यात्तत्र कृत्यन्वयवारणाय अन्याविशेषणेति गजस्यतु प्रतियोगितया इवार्थसादृश्ये विशेषणीभूतत्वान्न तदापत्तिः
स्पीयत इत्यादि भावार्थलकारे धात्वर्थस्यान्याविशेषणत्वात्तत्र तदन्वयवारणाय प्रथमान्तेति ननु कृतिप्रकारक
बोधत्वस्य कार्यत्वावच्छेदकत्वे रथो गच्छतीत्यत्र व्यापारलक्षणायां तत्र रथान्वयो न स्यात् न च कृतिपदमाख्या
तार्थमात्रपरमिति वाच्यं वर्तमानत्वादेरपि चैत्रादावेवान्वयप्रसंगात् एवमप्यत्रापीति चेन्न तदतिरिक्ताख्यातार्थस्ये
वकृतीत्यनेन विवक्षणीयत्वादिति इवार्थ इति एतेन प्रथमान्तपदानुपस्थाप्यत्वसूचनं अभाव इति चैत्रः कृत्यभाव
वानिति बोधात्कृतेरभावेन स्य च चैत्रेऽन्वयादित्यर्थः संकोचेति यत्रार्थे कृतेः प्रकारत्वेनान्वयोऽनुभवसिद्धस्तत्र तदुप
स्थितेर्विशिष्यहेतुत्वकल्पनादित्यर्थः इवपद इति इवपदार्थ इत्यर्थः पदार्थस्येति इवपदार्थविशेषणतापन्नस्येत
त्यर्थः अन्योन्येत्यादीति संबंधभेदेन कार्यकारणभेदानन्तकल्पने गौरवादिति भावः न चाव्ययेभ्यः प्रथमाविभक्तिरे
वोत्पद्यत इति पक्षस्यैव महाभाष्ये सिद्धान्तितत्वात् तस्याश्चाव्ययादाप्सुप इत्यनेन लोपे सादृश्यस्यापि प्रथमान्तपदजन्यो
पस्थितिरस्त्येवेति वाच्यं तथापि तस्य प्रतियोगितया नमः पदार्थादौ विशेषणतापन्नत्वेनान्याविशेषणीभूतत्वाभा
वात् ननु संबंधभेदेपि कृतिप्रकारतानिरूपितविशेष्यतायानियामकार्थकल्पनान्न तथा गौरवमित्यत आह सादृश्येति

261

कृतेः सादृश्यप्रतियोगित्वस्यापि प्रकृते विरहादिति भावः ननु कथं विदत्र कृतेरपि तथात्वमस्त्येवेत्यत्र आह किंचेति
उक्तेति भेदादीनामिवादीनां परस्परान्वये पूर्वोक्तप्रकारेण सतीत्यर्थः अपदार्थत्वादिति कृतिभेदयोरेव पदार्थ
तया कृतेः प्रतियोगितया भेदान्वयसंभवेपि आश्रयत्वस्य तत्र भानासंभवात् स्वाश्रयप्रतियोगित्वं चैतेनादृशस्य
ले संसर्गतया क्रमम् इत्याह गौरवेति नचाख्यातस्यैव कृत्याश्रये लक्षणा गौरवान्मानाभावाच्चेति भावः तस्मा
त्स्थितमेतत् कृतेः स्वाश्रयप्रतियोगिकत्वेन भेदेनान्वयमंगीकृत्य तत्कृत्याश्रयसादृश्यलाभसंभवः पदा
र्थप्रतियोगितावच्छेदकीकृतसंसर्गांशप्रविष्टपदार्थप्रतियोगिकपदार्थीभूतभेदविशेष्यकबोधस्याव्युत्पत्तेः
पर्वतो वह्निर्न भवतीत्यस्माद्वह्निनिष्ठप्रतियोगितावगाहिभेदविशेष्यकबोधस्यैवोदयात् अन्यथा लक्षणा
मंतरेणापि कदाचिद्वह्निप्रतियोगितावच्छेदकीकृत्यापि तस्माद्वह्निमान्न भवतीत्यस्मादिव शाब्दबोधप्रसंगात्
अस्तु तर्हि धात्वर्थ एवोपमानमिति शंकते नन्विति लेपनमेवेति लिंपतीव तमोंगानि इत्युदाहरणाभिप्रायेण
दं एकस्यैव धर्मधर्मिभावः कुतो न स्यादित्याशंक्याह धर्मेति तदिदमुक्तमिति आचार्यैर्दंडेनेति शेषः इष्टमि
त्यनंतरमप्येवमुपमानमिति शेषः लिंपतीति धात्वर्थनिर्देशो विभ्रिय् तस्य लक्षणयार्थपरत्वं यद्वापाक्मिमित्यादि
वत् धर्मभूतो लेपपदार्थस्तदा कोवास्यात्तस्योपमानत्वेन धर्मत्वासंभवादिति भावः ननु भेदाभेदत्वादिनोभे

अ.टी.

द्विरहेपि धर्मधर्मिभावमंगीकुर्वतीत्यमय्याह स एवेति वस्तुतस्त्वनेनापि भिन्नप्रकारोपस्थितावेव धर्मधर्मिभावः नीलो
घट इत्यादिवत् भेदमादायाऽयोन्नरुक्तं अभेदमादाय सामानाधिकरण्यमिति न तत्सिद्धान्तात् अत एव कार्यादिस्थलेप्य
न्यप्रकारेणैव भेदाभेदाभ्युपगमः तदुक्तं भामत्यां कार्यरूपेण नानात्वमभेदः कारणात्मना हाटकात्मनाऽभेदः
कुंडलाद्यात्मना भिदेति तस्मात्सर्वमनेनापि प्रकारेणैव लेपनस्य धर्मधर्मिभावोनुपपन्न एवेत्यर्थः नन्वेवमप्यनुपा
त्तधर्मनिमित्तकमेव सादृश्यमस्तु तद्धुपमायां सर्वत्र धर्मोपादाननियमः प्रामाणिकः धर्मलुप्तोपमोच्छेदप्रसंगा
दिति चेत् सत्यम् ययोः सादृश्यमप्रसिद्धं तत्र धर्मोपादानस्यावश्यकत्वात् युक्तान्तरस्याप्यनंतरमेव वाच्यत्वा
त् तदुक्तमिति आचार्यदंडिनेति शेषः भ्रान्तिकारणमाह इवप्रकृत्येति तद्रूपसमानधर्मदर्शनादित्यर्थः भ्रान्तित्वे
प्रमाणमाह नोपमानमिति उक्तवचनस्यातिःप्रमाणतानिरासाय आप्तेति यथार्थदर्शीत्यर्थः इदमेव दर्शयन्
व्याचष्टे अस्यार्थ इति असंभवादिति इच्छायाश्चेतनमात्रधर्मतया समवायेनान्यत्रानुपपत्तेरित्यर्थः तस्यादिति
सत्प्रकृत्यर्थविषयकेच्छायामेव सन्प्रत्ययविधानादित्यर्थः इति विचार इति तदर्थमाशंकायां सन्वाच्य इति वार्ति
कमारभ्यमिति प्रसंग इत्यर्थः लुलुठिषत इवेति यथा लुठनेच्छावतोऽवयवशैथिल्यादिकं भवति तथा तस्या
पि सत्त्वादित्यर्थः वाचनिकत्वमात्रनिरासाय व्याख्यानेचेति निङ्. तत्त्वस्पशाहमात्रधर्मतादाह निङं. तार्थेनेति

उपमानाभावे हेतुमाह क्रियाया इति तिङ्. तत्पदोपस्थाप्याया इत्यर्थः पाक इत्यादौ सत्त्वधर्मापन्नत्वात् सिद्धत्वप्र
तीत्यविशेषेपि तादृशप्रतीत्यभावात् उक्तं हि भट्टैः यादृशी भावनाख्याते न या त्वर्थस्यापि यादृशः नासौ तेनैव रूपेण
कथ्यतेऽन्यैः पदैः क्वचित् क्रिया च फलानुकूलतादृशव्यापारसमूहः तदाह क्रमभूतैरवयवैः समूहः क्रम
जन्मनां बुद्ध्यापकल्पिताभेदः क्रियेति व्यपदिश्यते साध्यैकेति सिद्धत्वरूपेणोपस्थितिविरहनियमादित्यर्थः सा
ध्यत्वं चाक्रियान्तराकांक्षानुत्थापकतावच्छेदकरूपवत्त्वमिति वैयाकरणाः पचतीत्युक्ते क्रियान्तराकांक्षानुदयात्
पाक इत्युक्ते च क्रियान्तराकांक्षाभ्युदयात् नैयायिकास्तु एवं सति भक्तापत्ययस्थले प्रसिद्धा क्रियाभासत इति प्रा
द्धिकसिद्धान्तविरोधः भुक्त्वेत्यत्र क्रियान्तराकांक्षादिसत्त्वात् तस्मात् क्रियान्तराकांक्षात्वतदनाकांक्षत्वयोः समभि
व्याहारविशेष एव नियामक इत्याकूतं निष्पन्नेति सिद्धस्यैव साधनत्वादित्यर्थः इदंतदिति परामर्शाभावादिति
सिद्धस्यैव एवंविधबोधविषयत्वात् न हि अयं पचति स पचतीत्यादौ यथा देवदत्तादीनामिदमादिभिः परामर्शः तथा
देवदत्त इदमित्यादिप्रयोगे इदमादिभिः पचतीत्यादिक्रियापरामर्शो दृश्यत इत्यर्थः एतदभावेपि कृतोनोपमा
नतोत्यत आह इदंतदिति एतादृशज्ञानविषयभूतं यद्वस्तु सिद्धस्वरूपं तद्विषयक एवोपमानोपमेयभाव इति भावः
ननु किमत्र नियामकमिति चेत् उच्यते उपमायां तावत्साधारणधर्मश्चावश्यकः तद्व्यतिरेके तत्स्वरूपस्यैवानुल्लासात्

धर्मस्य चोपमानवृत्तित्वं स्वीकार्यं नन्वासिद्धस्य धर्माधिकरणत्वसंभवः एवं च यदि धर्माधिकरणत्वं तत्र स्वीक्रियते तदा
सिद्धत्वापत्त्या साध्यत्वनियमभंगापत्तिः यदि तु न तदंगीकारस्तदोपमानिमित्तसामान्यधर्माभावात्कतरानसेतिकैयट एवं चमा
ध्यायेस्पष्टं नचाऽसिद्धोपि प्रागभावप्रतियोगित्वादिधर्माश्रयत्वमस्त्येवेति वाच्यम् तथाप्युपमाप्रयोजकधर्मस्य तत्र सत्त्वेना
नाभावादिति भावः एवं क्रियायाउपमानत्वासंभवमुक्त्वाउपमेयत्वासंभवमाह परिश्छेनेनेति तद्धर्मवत्तया प्रसिद्धेनेत्यर्थः न्यून
स्येति उपमानवृत्तिधर्मापेक्षापकर्षाश्रयतज्जातीयधर्मवत इत्यर्थः समानेति क्रियांतरोपहतयान्यूनत्वविरहविशिष्टेत्यर्थः
न्यूनत्वेति उपमानत्वाभिमतवृत्तिधर्मापेक्षापकर्षाभाववत्त्वादित्यर्थः अत्र भर्तृहरिकारिकां प्रमाणयति तद्वत्क्रमितियेन
ति पतनक्रियारूपेणेत्यर्थः आत्ताविति शरारिरातिराटिप्लवबलाकाविसकंठिकेत्यमरः तस्य पतनक्रियारूपस्य समानत्वात्
न्यूनत्वाभावात् हंसबलाकोभयसंबंधिपतनस्याथःसंयोगजनकत्वसाम्येन तत्रान्योन्यापेक्षयोत्कर्षापकर्षाभावादित्य
र्थः न विद्यत इति तद्वृत्तिधर्माधिकधर्मवत्प्रतियोगिकसादृश्यवर्णनेनैव न्यूनधर्मोत्कर्षलाभात्तत्र तदभावादिति भावः
ननु तर्हि भिन्नानामेव क्रियाणां तदस्तु परस्परवृत्तिधर्माभाववत्त्वादित्यत आह भिन्नेति क्रियात्वादिना सादृश्यं तत्र प्रयोजक
मेवेति भावः उक्तग्रंथाभिप्रायेण काव्यादर्शकारिकाव्याख्यानमुपसंहरति तथैवेति वैयाकरणमतेन क्रियाविशेषणकेवा
यमाह तथा चेत्यादिना नैयायिकरीत्या प्रथमांतविशेष्यकमाह यद्वेति कर्तृत्वसंबंधेनेति ननु वैयाकरणमते कर्माख्यातार्थएवेति ८९

तस्य पदार्थत्वात्कथं संसर्गत्वकीर्तनमिति चेत् सत्यम् आख्यातस्य प्रकृते विषयलक्षणयाउक्तत्वात् कर्तृत्वस्य संसर्गि
तयासमुल्लेखात् युगपदुक्तिद्वयस्वीकारेण कर्माख्यातार्थ एव आख्येयः युगपदिति एकस्यैव पदस्य युगप
त्कालद्वयोभयार्थबोधकतायाः प्राचीनैरभ्युपगमात् इत्यर्थः तदङ्गीकर्तृमणिकारादिमतेन दोषान्तरमाह तत
इति प्रत्ययानामिति प्रकृतिप्रत्ययोः स्वार्थसहकृतत्वमितिकात्यायनवार्त्तिकात् तस्येति यद्यपि प्रकृत्यर्थप्रका
रकबोधं प्रति प्रकृतिजन्योपस्थितिर्हेतुरित्यपि तदर्थः अन्यथा वैयाकरणानामाख्यातार्थस्य कर्तुर्धात्वर्थभावना
यां विशेषणत्वेनान्वयानुपपत्तेः प्रकृतिप्रत्ययान्यतरार्थप्रकारकशाब्दबोधे तदन्यतरजन्योपस्थितेर्हेतुत्वमिति
तदर्थपर्यवसानात् तथापि तयोः प्रत्ययार्थः प्राधान्येनेत्युक्तवार्त्तिकशेषदर्शनात्प्रकृत्यर्थविशेष्यकप्रत्यया
र्थप्रकारकबोधस्याप्यभावाच्च ततोपि न तत्समाधानमित्यभिप्रायेण प्रकृत्यर्थप्रकारकेत्युक्तम् अत एवउक्त
व्युत्पत्तिसंकोचादेव कर्तृप्रकारकभावनाविशेष्यकबोध इति समुद्घोषो वैयाकरणानाम् ननु प्रत्ययार्थनिष्ठवि
शेष्यतानिरूपितविशेषणतासंबंधेन शाब्दबुद्धौ प्रकृतिजन्योपस्थितेः कारणत्वस्यैवाख्यातार्थकृतिवर्तमानतयोः
परस्परान्वयाभ्युपगमादिना सर्वमेव निराकृतत्वान्नायं दोष इत्यपरितोषादाह अपि चेति तंडुलं पचतीत्यादौ तंडु
लादेर्विभक्त्यर्थान्वयद्वारा धात्वर्थान्वयो भवेत्स्वेतत्राह साक्षादिति लोकं पचतीत्यादौ लोकस्याऽभेदसंबंधेन

साक्षादेव धात्वर्थान्वयदर्शनादाह भेदेनेति अभेदातिरिक्तसंबंधेनेत्यर्थः तथाच बहननूयधात्वर्थस्य प्रकारत्वसंबंधेन
इयार्थसंभावनायामन्वयो न युक्त इत्यर्थः निपातेनेति तदतिरिक्तत्वेनाख्यातविशेषणं न कलंजमिति भक्षयेदित्यत्र विधिप्र
त्ययस्य कृतिसाध्यत्वेष्टसाधनत्वबलवदनिष्टाननुबंधित्वत्रितयवाचकतया कलंजभक्षणे इष्टसाधनत्वं कृतिसाध्य
त्वयोः सत्वेन नञ्निषेधस्य बाधाद्बोधयितुमशक्यत्वात् बलवदनिष्टाननुबंधित्वमेव प्रतियोगित्वसंबंधेन नञर्थाभा
वेऽन्वेति स च विशेषणतया भक्षणे तथाच कलंजभक्षणं बलवदनिष्टाननुबंधित्वाभाववदिति नञर्थप्रकारता
निरूपितविशेषणताविशेषसंसर्गावच्छिन्नधात्वर्थनिष्ठविशेष्यताको बोध इति निपातार्थधात्वर्थयोः साक्षा
द्भेदान्वयोपि भवत्येवेत्यर्थः चैत्र इति न पचतीत्यत्र आख्यातार्थनिष्ठविशेष्यताको बोध इति निपातार्थधात्वर्थयोः) कृ
तेरभावेन तस्य च चैत्रेऽन्वयः पाकानुकूलकृत्यभाववांश्चैत्र इति कृतिप्रकारतानिरूपितप्रतियोगित्वनिष्ठसांस
र्गिकविषयतानिरूपिताभावनिष्ठविशेष्यताख्यप्रकारतानिरूपितविशेषणतानिष्ठसांसर्गिकविषयतानिरू
पितचैत्रत्वावच्छिन्नविशेष्यताकबोधस्य तत्रानुभवसिद्धत्वादित्यर्थः यत्तु तत्रापि न कृतेरभावान्वयः अभावसंबंधे
न कृतेरेव साक्षात्प्रथमान्तपदोपस्थाप्ये चैत्रेऽन्वयः नञ्पदं च तात्पर्यग्राहकं अतो नाख्यातार्थकृतिप्रकारकबोधं प्रति
प्रथमान्तपदजन्योपस्थितिः कारणमित्यस्य संकोच इति तन्न प्रतियोग्यन्वये अभावस्य संसर्गत्वे मानाभावात् प्रति

योगिनद्भावयोर्विरुद्धत्वेन प्रतियोगिप्रकारतायां अभावस्य संसर्गत्वेन भानस्यादर्शनादसंभवाच्च अन्यथा घटाभाव
वत्यपि भूतले घटाभावं संसर्गीकृत्य घट इव भूतलामन्यादिप्रत्ययप्रसंगात् नञ्समभिव्याहृतारव्यातार्थस्य तत्रैवैवं कल्प
नइतिचेत् न विरुद्धार्थस्य कल्पयितुमशक्यत्वात् अमत्र यत्प्रकारक यत्संसर्गक यद्विशेष्यक बोधोनुभवसिद्धत
यानविरुद्धस्तदनुसारेणैव कल्पनोल्लासात् तद्विपरीते च लाघवस्याप्रयोजकत्वात् अभावप्रकारकबोधस्यैव
नञानुभविकत्वाच्च वस्तुतः संबंधभेदेन कार्यकारणभावभेदस्यावश्यकतया समवायसंसर्गककृतिप्रकारक
चैत्रादिविशेष्यकबोधार्थमेकः अभावसंसर्गककृतिप्रकारकचैत्रविशेष्यकबोधार्थं कृत्यभावप्रकारकविशे
ष्यतासंसर्गकचैत्रादिविशेष्यकबोधार्थं चापरः कार्यकारणभावः कल्प्यत इति न लाघवावकाशः प्रकारवि
शेषे व्युत्पत्तिमात्रस्य चाकिंचित्करत्वात् न च तत्रारव्यातस्यैव कृत्यभावे लक्षणा नञ्पदं तात्पर्यग्राहकमि
ति वाच्यं प्रकारकप्रतीत्युपपत्तिरित्यप्यनाशंक्यं कार्यकारणभावभेदस्यावश्यकत्वात् इति कृत्यं वक्तृता नन्वन्यत्र
दृष्टव्युत्पत्तिरक्षया लक्षणागौरवमेव सत्यतामित्यत आह किंचेति अन्यत्रोक्ते तावत्पदार्थानामुक्तरीत्या नन्वयान
नुभवादन्वैव लक्षणादिकल्पना मयेत्यसंसर्गीतरेण कृत्यपदार्थान्वयस्यैव युक्तत्वादित्यर्थः भावनाविशेष्य इति चै
त्रः पचतीत्यादौ यत्र कृत्यन्वयस्तत्रैव संख्यान्वय इति व्युत्पत्तिः तथा चाख्यातार्थसंख्याप्रकारकबोधं प्रति कृतिवि

अ॰ टी॰
९८
९२

शेष्यार्थकपदजन्योपस्थितिः कारणमितिफलितम् अतएववैचैत्रोपचतःचैत्राः पचंतीत्यादिप्रयोगनियमउपपद्यते व
हतीवतमइत्यत्रचकृतेःस्वाश्रयप्रतियोगिकत्वसंबंधेनस्वार्थसादृश्येसंख्यायाश्चतमस्यान्वयोनस्यात् तमसःकृति
विशेष्यत्वविरहादितिभावः तस्यापीति भावनाविशेष्येसंख्यान्वयइतिनियमभंगस्यापीत्यर्थः तपचतीत्यत्रकृतेन
रभावान्वयेपिसंख्यायाश्चैत्रेणैवान्वयाभ्युपगमात् तथाचभावनाविशेष्येसंख्यान्वयइत्यप्युत्सर्गएवेतितात्प
र्यं नन्वेवमपिवहतकृत्याश्रयप्रतियोगिकभेदसमानाधिकरणत्वादिबोधःपर्यवसितः तथाचपर्यावच्छि
न्नप्रतियोगिताकसंसर्गैकदेशप्रतियोगिकप्रतियोगितीयसंसर्गतानिरूपितपदार्थाभूतभेदविशेष्यकान्वय
बोधःकथंस्यात् वह्निर्नभवतीत्यस्मादग्न्यवच्छिन्नप्रतियोगिताकबोधानुदयादितिपूर्वमेवोक्तत्वादितिचेत् स
त्यम् कृत्याश्रयेआख्यातस्यलक्षणेत्यत्रदोषाभावात् त्वयाप्रकृतिप्रत्यययोरुभयत्रापिलक्षणादिस्वीकारेणत
थापिलाघवसंभवात् महाभाष्येति तवैतिङंतेनोपमानमस्तीतिप्रागुपन्यस्तेत्यर्थः उपमेयत्वेनेति क्रियानिष्ठोपमा
नतानिरूपितेतिशेषः अतोनपंचमाध्यायाकरविरोधः तत्रहितेनतुल्यंक्रियाचेद्वतिरित्यत्रक्रियायाएवोपमेय
त्वेवतिरितिव्यवस्थापितं नन्वेवमपितद्विरोधनिस्तारः क्रियायाएवोपमानत्वस्थापितत्रव्यवस्थापितत्वात् क्रिये
तिप्रकृत्यर्थविशेषणमितिपदेप्रत्ययार्थस्यतथात्वलाभः प्रत्ययार्थविशेषणमितिपदेचप्रकृत्यर्थस्यतथात्व

लाभः सामर्थ्यादिति तत्र भाष्यकृद्भिरेव व्याख्यानत्वादिति चेत् सत्यं क्रियाशब्देन सत्वधर्मीनापन्नाया यास्तस्या विवक्षित
त्वात् तथाहि तेन तुल्यमिति तृतीयासमर्थाद्वतिः उपमानेन च क्रियेति सूत्रार्थः तत्र क्रियायास्तृतीयासमर्थत्वमनु
पपन्नं सत्ववाचिन एव तृतीयोत्पत्तेरिति शब्दैः पदे ब्राह्मणवदधीते इत्यादौ ब्राह्मणादिपदानां ब्राह्मणादिकर्तृकाध्यय
नादिलक्षणयायोगेन तेन समाहितं भाष्यकारैः न त्वन्यथा सूत्रार्थः संभवति न च तैलपाकेन तुल्यो द्रुतपाक इत्या
दौ क्रियाया अपि तृतीयासमर्थत्वमस्त्येव भोक्तुः पाक इति क्रियायोगनिबंधनत्वमुनादिदर्शनादिति वाच्यं उपमा
निष्ठस्यैव साधारणधर्माधारत्वविवक्षायां तस्य क्रियारूपत्वाभावात् तत्र हि तुमुनादयो धातुवाच्यासत्वभूतक्रि
यापेक्षाः तृतीयादयस्तु सत्वरूपाश्रया न तु क्रियारूपाश्रया इति कैयटेनैव समाहितत्वात् तथा च भर्तृहरिणो
क्तम् साध्यत्वेन क्रिया तत्र धातुरूपनिबंधना सत्वभावस्तु यस्तस्याः स घञादिनिबंधनः ननु तथापि तृतीया
ध्यायस्योनवैतिडं तेनेति भाष्यग्रन्थः कथमुपपादितः सामान्यधर्माधिकरणत्वविवक्षायां उपमेयभूताया अपि
क्रियायास्त्वदुक्तन्यायेनैव सत्वधर्माश्रयत्वप्रसंगादिति चेत् न ह्युपमानोपमेयतोभयनिषेधवादिना त्वयापि पं
चमाध्यायस्य सूत्रभाष्यादिग्रन्थाः कथमुपपादिताः क्रियायाः उपमेयत्वस्य तत्र साक्षादेवाभिहितत्वात् उपमे
यभूताया अपि क्रियायाः सामान्यधर्माधिकरणत्वविवक्षायां स्वरूपप्रत्यक्षवत्तादवस्थ्यात् ननु एवमपि क्रियाया

उपमेयत्वनिषेधपरत्वं तृतीयाध्यायभाष्यस्य व्यवस्थापयतां त्वया क्रियाया उपमेयत्वमाश्रित्य प्रवर्त्तमानाः पंचमाध्यायभाष्यादिग्रंथाः कथमुपपादनीया इति चेत् सत्यम्

निर्णयानात्मकस्तु न विशेषकाः प्रकृतारोपरूपत्वसंगतत्वादुत्प्रेक्षात्वं न तु संदेहालंकारनिरूपणमर्हतीत्यभि
प्रायवानाह प्रकृतेति तत्पदार्थमाह उपमेयेति तदन्यपदार्थमाह उपमानेति विषयपदार्थमाह कोटकेति निश्च
यभिन्नेतीति भ्रान्तेश्च निश्चयात्मकतया तद्भिन्नत्वाभावान्नातिव्याप्तिरित्यर्थः स्थाणुर्वेति स्थाणुपुरुषोभयसा
धारणोर्ध्वत्वादिरूपसाधारणधर्मज्ञानजन्यतया तत्संशयस्य सादृश्येऽन्येनापि न व्यभिचारवारणमिति भावः
ननु स्थाणुर्वादेरपि प्रकृतत्वं उत्प्राप्यत्वेवेति कथं तत्संदेहे न व्यभिचारवारणमित्यत आह रसेति सादृश्येनेति अत्र
संशयस्य उत्कर्षविजयोद्यमतिर्वर्धनत्वात्र सादृश्यज्ञानजन्यत्वमिति भावः ननु यशांसि संशयेनिमज्जयामासे
त्यत्र यशः स्थैर्यमाप्स्यति न वेति संदेहो लभ्यते स च सादृश्यज्ञानजन्य एव असाधारणधर्मदर्शनजन्यत्वविप्र
तिपत्तिजन्यसंशयानां संशयस्य साधारणधर्मदर्शनजन्यत्वनियमात् तथा च न्यायसूत्रं समानानेकधर्मो

अ.टी.
९४
९५

पपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्शः संशय इति अत्र त्वसाधारणधर्मदर्शनजन्यः सा
धारणधर्मदर्शनजन्यो विप्रतिपत्तिजन्यश्चेति संशयस्य त्रैविध्यमेवाभिहितमिति चेत् सत्यं सादृश्यपदेन चमत्कार
जनकसादृश्यविवक्षितत्वान्न कोपि दोषः एवं च चमत्कारजनकसंदेहत्वमेव लक्षणमिति फलितार्थः संदेहेन स
वर्णनेव स्मृतित्वेनेति ससंदेह इत्यलंकारसंज्ञेयं यदाहुः साम्यादप्रकृतार्थस्य याथार्थ्येनवधारणं प्रकृतार्थाश्रया
त्तेन्नः ससंदेहः स उच्यते संदेह इत्यप्यस्य संज्ञान्तरं स्यात्स्मृतिभ्रान्तिसंदेहैस्तदंकालंकृतित्रयं इति चन्द्रालोकादिद
र्शनात् विशेषधर्म इति उपमानतादात्म्यबुद्धिप्रतिबंधकेत्यर्थः स च द्विविधः उपमेयतावच्छेदकव्याप्य उपमा
नतावच्छेदकव्याप्यश्च तत्राद्यस्य प्रकृते निर्णयहेतुत्वात् तद्दर्शने विशेष्यनिर्णयसत्त्वात् संशयानुदयः द्विती
यस्य तत्तत्कोटिभानमात्रविरोधितया प्रकृते निर्णयहेतुत्वाभावादेकसंदेहनिवृत्त्यनंतरमन्यकोटिकसंशयाप
त्तिरिति दर्शितत्वात् प्रथममित्यादि विशेषधर्मेभ्यः किंविशिष्टं संदेहस्वरूपमित्यर्थः किं तावदिति माध्येजलविहा
रवर्णनम् अत्र इदं कमलं मुखं वेति शुद्धो वर्णिविशेष्यकः अभेदसंबंधेन कोटिद्वयप्रकारकः सौंदर्यातिशयरूप
समानधर्मदर्शनजन्यसंशयः अत्र विशेषकस्य कमलेष्वसंभवात् तस्य नायिकाधर्मत्वेन नायिकानिर्णयानंतरमु
खनिर्णयः भावविशेष इति तथा च भगवान्भरतः इष्टानामर्थानां प्राप्तावभिमानगर्वसंभूतः स्त्रीणामनादर

कृतो विद्वाको नाम विज्ञेयः एवं च मुखे पदं मुखे त्वपरं व्याप्यत्वं च पत्रपरस्यावधेयं यत्त्विति तेनानन्तकोटिकसंशया
भावे पि प्रकृतनिर्णयाभावात्कोट्यन्तरमादाय संशयोत्पत्तेरिति भावः इयमिति यत्र चिरस्थायिरूपचित्ताभावो विद्युत्व
व्याप्य इति चिरस्थायिरूपचित्तज्ञाने विद्युत्कोटिकसंशयो निवर्तते प्रकृतनिर्णायकसामग्र्यभावाच्च प्रकारान्तरेण
संदेह एवमग्रे पि बोध्यं कृतिमत्तिरिति कृतिपदं चेष्टापरं प्रहतेरप्यात्मधर्मतया शरीरेऽनुपपत्तेः लतायामप्य
न्यप्रेरणया कर्मीसत्त्विसंभवात् चेष्टापर्यन्तानुधावनं अदृष्टवदात्मसंयोगासमवायिकारणिकायाः शरीरक्रि
याया एव चेष्टापदार्थत्वात् अत एव तदनन्तरमचेतनकोटिकसंशयस्यानुपपन्नत्वादाह रतिरिति इशेपारिति
त्रुटिजन्यज्ञानविषयत्वाद्व्यापारानुबंधिविषयताभिप्रायेणाहरिविषयत्वमभिहितं एवं रतित्वाभावव्याप्यहरिवि
षयत्वदर्शने रतिकोटिकसंदेहनिवृत्तिरित्यर्थः एवं च यत्रैककोटितावच्छेदकव्याप्यधर्मोपन्यासस्तत्र निश्चयो
नो यत्र त्वेककोटितावच्छेदकाभावव्याप्यधर्मोपन्यासस्तत्र निश्चयगर्भ इति विभागो ज्ञेयः तेन चेति तदभावेनाप
र्थः एवं च विद्युत्संशयनिवृत्तिकारणीभूतदर्शनविषयाभावप्रतियोगित्वेन तेनेत्युक्तमित्यदोषः नन्वस्फुटमहादि
भिः प्राचीनैर्निश्चयगर्भ एव संशयोऽलंकारत्वेन स्वीकृतस्तत्कथं निश्चयोनाप्युपन्यस्त इत्यत आह एवं त्विति व्या
घ्रप्रकृतव्याप्यधर्मोन्याप्रकृतनिर्णयो वाच्य एव द्वितीये तु प्रकृतव्याप्यधर्माभावमात्रोन्याप्रकृतनिर्णयो वा

ग्र॰ टी॰
५४
९५

णएव वाच्यापेक्षयाचवैयर्थ्यस्यचमत्कारातिशयजनकत्वमितिभट्टाचार्येणतदेवाभिहितं अन्येस्तुनिश्चयांतेपिवैचि
त्र्यानुभवादुभयोरपिमुख्यत्वादलंकृतत्वमितिभावः दीधितिकारइति एवंचविरुद्धानेककोट्यवगाहित्वंसंशयलक्षणेनका
र्यं प्रकृतस्थले व्याप्तेः एतेषुतन्निर्णीतत्वेसंदेहीतिप्रतीतेरेककोटिकसंशयस्यापिस्वीकर्तुमुचितत्वात् ह्रदः
कपिसंयोगवान्नतदभाववत्त्वेनतत्समूहालंबनवारणायगुणः कपिसंयोगीनवेत्यस्यचसंग्रहायतत्तदधिकर
णभावेनकोटिद्वयांशेविरोधभानस्वीकारमपेक्ष्यतत्तदधिकरणावृत्तित्वस्वीकारस्यैवोचितत्वात् ततश्चवह्निमद
नोवंसंनोवास्यानिर्णीतेत्यत्रएककोट्यन्वयेवह्न्यावृत्तित्वमदनावृत्तित्वादिरूपोविरोधः संसर्गमर्यादयाभासतइति
दीधितिमतंसमर्थ्यमितिजयरामभट्टाचार्याः तेषामेवसिद्धांतमाह केचित्त्विति ननुभावाभावकोटिकज्ञानस्यैवसं
शयत्वेकथंस्थाणुर्वैत्यादेस्तत्त्वमित्यतआह स्थाणुरिति विशेष्यतावच्छेदकावच्छेदेनतत्तदभावान्यतरकोट्य
वगाहिसमानधर्मिकतत्तदभावप्रकारकज्ञानस्यैवसंशयत्वात् वाशब्देनतदभावोपस्थापनात्स्थाणुत्वाभावपुरु
षत्वाभावोभयकोटिकसंशयद्वयमेवतत्रेत्यर्थः अन्यत्रयथातथास्तु ॥ प्रकृतेचेद्वानिर्णीतानवेत्यादि
काश्चेद्वादिविशेष्यकनिर्णीतत्वतदभावकोटिकानानासंशयाएवयुक्तानतुनिर्णीतत्वधर्मिकवह्न्या
दिनानाकोटिकाः ॥

५४

चंद्राद्यनेकधर्मिकनिर्मलत्वकोटिकोवाप्यकसंशयः विशेषधर्मानुक्त्युदाहरणात्वविरोधापत्तेः पूर्वसंशयव्यावर्त्त
कधर्ममनुक्त्वैवयत्रसंशयांतरमुपनिबध्यतेतस्यैवनदर्थत्वात् एकसंशयत्वव्यपदेशश्चपूर्वोत्तरत्वाभावादितिप्रबंधेना
ह युक्तंचैतदित्यादिना तदुदाहरति यथा किमिदः किंपद्मंकिममुकुरबिंबंकिमुमुखमिति किंत्विति तदभेदबोध
स्यतद्धान्यताहान्यज्ञानप्रतिबंधकत्वादित्यर्थः मार्तंडत्वप्रकारकेति अत्यंतरत्वाद्रके अयंमार्तंडः किमितिशाब्दा
न्नुत्प्रभेदसंसर्गकमार्तंडप्रकारकसंशयएवलभ्यतइतिध्येयं इहनमयेत्यत्रसंशयालंकारइतिदीक्षितमतंनि
रस्यति इहेति अवस्थितेति असामर्थ्यंसधिः क्रियतां सामर्थ्येतुविग्रहइत्यत्रतात्पर्यादित्यर्थः यवैरिति यागत्व
सामानाधिकरण्येनव्रीहिजन्यत्वस्ययागत्वसामानाधिकरण्येनयवजन्यत्वस्यचतेनबोधनादित्यर्थः सज्जीक्रियंता
मिति हर्षचरितेइयमुक्तिः सिंहवदिति अन्यानपेक्षम् किंसीकरैः क्लमविनोदिभिराद्यैवतिसंचारयामिनलि
नीदललतालवृंतैः अंकेनिवेश्यचरणावुत पद्मताम्रौसंवाहयामिकरभोरुयथासुखंते इत्यत्रविकल्पः इत्थंकृ अ
त्रयुगपत्कर्तुमशक्यत्वेपिद्वयोर्व्यवस्थापकाभावादुभयत्राप्यनुरक्तस्यैवकर्तृत्वादितिकेचित्जीवनसामर्थ्ये
सतीत्यर्थः तवेति सूर्यकरणधर्मिकसंदेहइत्यर्थः समानेति शाब्दतादात्म्यारोपेपदद्वयस्यसमानविभक्तिकतया
पेक्षणादितिभावः विभक्त्यानपेति शाब्दारोपएवनदपेक्षणादित्यर्थः इदंत्वेनसूर्यकिरणभानेप्यध्यवसानम्

लकत्वमस्त्येवेत्याह नन्विंत्यमित्यादि सूर्यकिरणत्वंधर्मितावच्छेदकत्वेन संशये कृते तानभासत इत्यत आह सूर्येति संशय
धर्मितावच्छेदकीभूतधर्मः संशये आरोप्यतावच्छेदकतया आरोप्यतयावानभासते नत्विष्टयसत्वेन तत्संशयानुपपत्ते
रित्यर्थः तथाचेति यद्यप्येवमपि विभक्त्याभावादितिहेत्वनुपपत्तिस्तदवस्थैव तथाप्यध्यवसानमात्रसमर्थन
मात्रेणानङ्गीक्रियमाणेयकमिति ध्येयं वस्तुतस्तु तदनुकूलविभक्तेरित्यस्य विभक्तिपदं ज्ञानपरमेव तथाचारोप
स्थले रूपकवद्विषयतावच्छेदकप्रकारेण विषयज्ञानाभावान्नसारोप इत्यर्थः एतेन यदुक्तं रसगंगाधरे एतेना
ध्यवसानमूलत्वं संशयस्य निरूपयतो विमर्शिनीकारस्योक्तिरपास्तेति तदपास्तम् विषयतावच्छेदकरूपेण विषय
स्यानुपस्थित्याऽध्यवसानस्यावश्यकत्वात् यदपि तत्र संशयध्वनेरुदाहरणं नीरेतरुणवदनं सहासं नीरसरोजं
चमिलद्विकासं आलोक्य धावत्युभयत्र मुग्धा मरंदलुब्धालिकिशोरमाला अत्र तरुणीवक्त्रे कमलमिदं इदं वेति
संशयो व्यंग्य इति तच्चिंत्यं मुग्धपदेन उभयत्र धावनेन सत्प्रकारेण संशयस्य वाच्यत्वात् मुग्धः सुंदरमूढयोरित्यनु
शासनान्नैनविपरीतज्ञानवन्त्वालाभात् उभयत्र धावनेन च भ्रमवत्वनिह्नुत्या संशयवत्वपर्यवसानात् चीत्रमी
मांसायां तु कांचित्कांचनगौरांगीं वीक्ष्य साक्षादिव श्रियं वरदः संशयापन्नो वक्षःस्थलमवेक्षत अत्र संशयस्य प
दोपात्तत्वेपितावन्मात्रस्यानलंकारत्वात्तदलंकारत्वप्रयोजकस्य वक्षोगतैवलक्ष्मीस्तनोवनीयंकिंश्वरनस्मिष्टती

निःसंशयाकारस्य चानर्थचरणेन व्यंग्यत्वात्संशयध्वनिरयं यथा दर्पणे च परिभोगदर्शिनी पृष्ठतः प्रणयिनो निषेदुषः
वीक्ष्य बिंबमनुबिंबमात्मनः कानि कान्यपि चकार लीलया अत्र कानि कान्यपीति सामान्येनोनिर्दिष्टानुभावविशे
षप्रतीत्यर्थं लज्जाशब्दप्रयोगेऽपि तस्य विभावानुभावाभ्यां रसानुगुणाभिव्यक्तिरूपो ध्वनिरेवमत्रापीत्युक्तं अ
त्र रसगंगाधरकृतः संशयापन्नपदेन विरुद्धनानापदार्थसंबंधावगाहिज्ञानस्य साक्षादेवाभिधानाद्विरुद्ध
पदार्थविशेषांकोद्यायां वक्तव्यलावेदनेन गम्य उत्कार्थो व्यंजनव्यापारेण बोध्यमानः शाब्दोपात्तसामान्याभे
न पर्यवस्यति एवं च संशयकोटिभूतस्य वक्तव्यलेख्यादिभागस्य विरुद्धनानार्थत्वरूपसामान्यरूपेण शाब्दश
क्तिगम्यत्वाद्याकार्थसंशयागतत्वाच्च न ध्वनित्वमुक्तं वाच्यहृन्मञ्जुविनसैव न तत्त्वमिति सिद्धांतादित्याहुः जयरा
म महाचार्यास्तु साक्षादिव श्रियं वीक्ष्येत्येतेन हेतूपन्यासेन इयं लक्ष्मीर्नैवेति संशयस्य संशयपदबोध्यस्यैव ना
यिकोत्कर्षाधायकस्यात्रालंकारत्वमुक्तमिति न ध्वनित्वमित्याहुः इति ससंदेहः ५ ॐम उपमानतावच्छेदकाव
च्छिन्नाभेदविषयकत्वेन संशयानंतरं रूपकनिरूपणमित्यभिप्रायेणाह रूपकमाहेति लक्षणादीनां स्वरूप
मात्रकथनपरतया रूपकलक्षणप्रवेशो वैयर्थ्यादिदं न लक्षणमिति सूचयन्नाह लक्षणं त्विति इतरभेदसा
धकमित्यर्थः उपमेयेनेति मुखं चंद्र इत्यत्र मुखत्वमुपमेयतावच्छेदकं तदधिकरणे मुखे चंद्रतादात्म्यप्रती

अ॰टी॰
९६
८१

यत इति लक्षणसमन्वयः भ्रांतिमतीति अतिशयोक्तेरप्युपलक्षणं अप्रतीतेरिति इदं त्वे नैव तत्रोपमेयभानादुप
मेयतावच्छेदकप्रकारकतज्ज्ञानाभावादिति भावः न च भानविरहेपि तत्सामानाधिकरण्यं वस्तुतोस्त्येवेति क
थं न व्यभिचार इति वाच्यं उपमेयतावच्छेदकधर्मधर्मितावच्छेदकीकृत्येति सामानाधिकरण्यतात्पर्यात् अ
विशिष्टत्वादिति एवं उपमेयतावच्छेदकप्रतीत्यभावादपह्नुतौ च तत्रोपमेयतावच्छेदकनिषेधात् उपमेय
तावच्छेदकधर्मधर्मितावच्छेदकीकृत्योपमानतादात्म्यप्रतीतिविरहस्तत्रापि एवेत्यर्थः अविरोधेति कोटिद्वया
शोत्कटत्वादिरूपविशेषविरहेत्यर्थः उत्प्रेक्षायां चोपमानतादात्म्यकोटेरेवोत्कटत्वान्न व्यभिचार इत्यर्थः संशयेत्यप्र
संगय एव नास्ति उपमेयतावच्छेदकमुखत्वादिधर्मितावच्छेदकस्य चंद्रादितादात्म्यकोटिकस्य मुखं चंद्रो मुखं वेत्या
कारकसंशयस्यानुपपत्तेः मुखं चंद्रभिन्नं न वेत्यादेश्चोपमानतादात्म्यानवगाहित्वात् न चात्र चंद्रभेदाभावांशे च
द्रतादात्म्यावगाहित्वमस्त्येव भेदाभावस्यापि प्रतियोगिरूपत्वादिति वाच्यं प्रतियोगितावच्छेदकधर्मरूपेण भे
दाभावत्वेनाभाव इति स्वीकारेणाभिधानात् नन्वेवमप्ययुक्तं नहि रूपके सर्वत्रोपमानतादात्म्यमेव भातीत्यस्ति नि
यमः उपमानतावच्छेदकारोपस्यापि रूपकतांगीकारात् तथा चाग्रे उदाहरिष्यत एव अन्येऽप्यास्य शरणे शाक
तानयनोस्तादात्म्यमध्यारूढामित्याद्युदाहृतं अतः संसर्गारोपरूपरूपकसंग्रहाय उपमेयतावच्छेदकधर्मधर्मि
तावच्छेदककोपमानतादात्म्यतदवच्छेदकान्यतरवत्तावगाहित्वलक्षणमावश्यकमेव उपमानतादात्म्योपमानतावच्छेदक

रनुगमासतिहिस्तुतायांतुउपमानभेदज्ञानप्रतिबंधकज्ञानप्रविषयत्वेनउपमानतावच्छेदकात्यंताभावज्ञानप्रतिबं
धकज्ञानविषयत्वेनवाउभयोरनुगमंकृत्वाप्रवेशः कार्यः भवतिचचंद्रोयमितिज्ञानेनायंचंद्रइतिज्ञानेचंद्र
त्वाभाववानयमितिचज्ञानेचंद्रत्ववानयमितिज्ञानंचनायंचंद्रइत्यत्रचंद्रत्वाभाववानित्यत्रचज्ञानेप्रतिबंधकं
एवंचचंद्रभेदात्यंताभावस्यचंद्रत्वरूपत्वेपितत्संसर्गारोपोऽप्येव एवंमुखंचंद्रत्ववन्नवेतिइत्यादावपीतिक
थंनसंशयेतिव्याप्तिशंकेतिचेत् सत्यम् संशयेउपमानतावच्छेदकसंसर्गाभानेपितज्ज्ञानस्यचंद्रभेदादि
ज्ञानविरोधित्वविरहात् चंद्रभेदस्यापितच्चज्ञानेकोटित्वेनस्फुरणात् नचतत्प्रतिबंधस्वरूपयोग्यत्वमात्रं
तत्राप्यस्तीतिवाच्यं अत्रतदुपहितत्वस्यैवविवक्षणीयत्वात् नचैवंयत्रमुखंचंद्रइतिज्ञानेनचंद्रत्वाभावचंद्र
भेदादिविषयकज्ञानप्रतिबंधोनोपहितस्तत्रसर्वत्रप्रायशोऽव्याप्तिरितिवाच्यम् एतदनुरोधेनस्वरूपयो
ग्यत्वविवक्षायामपिसंशयस्यप्रतिबंधकावच्छेदकधर्मानवच्छिन्नतयास्वरूपयोग्यत्वएवमानाभावादि
तिसंक्षेपः चित्रमीमांसाकृतस्तु बिंबाविशिष्टेनिर्दिष्टेविषयेयद्यनिह्नुते उपरंजकतामेतिविषयीरूपकं
तदा आद्येनविषयविशेषणेन त्वन्मादनत्वंरक्ताननायदलक्तकमार्जने इदंश्रीखंडलेपनपांडुरीकरणंवि
धोरितितिनिदर्शनायांव्यभिचारवारणं तत्रमार्जनस्यालक्तकादिरूपविवविशिष्टत्वात् नन्वस्यानापत्रश्रीखं

उरूपप्रतिबिंबधर्मस्य विषयिदिश्युपन्यासात् द्वितीयेन तद्विशेषणेन निगीर्याध्यवसानरूपाद्यप्रतिशयोक्तेर्नि
रासः तत्रमुखत्वाद्युपस्थापकपदप्रयोगविरहात् तृतीयेनापह्नुतेर्वारणं तत्रमुखोद्देर्निषेधेन निह्नुतत्वात् उप
रंजकतायाआहार्यतादात्म्यनिश्चयगोचरतायाप्रतीत्यनेन संदेहोत्प्रेक्षासमासोक्तिपरिणामभ्रांतिमतांव्यभिचारवा
रणं आद्यद्वयेनिश्चयाभावात् तदितरद्वयेविषयितावच्छेदकावगाहनात् अंत्येत्वाहार्यत्वविरहादित्याहुः अत्रर
सगंगाधरकृतः आद्यविशेषणंनिदर्शनावारकंव्यर्थमेव तत्रापिवाक्यार्थरूपकस्वीकारेणनिदर्शनात्वाभावात्
निर्दिष्टपदस्यापिकिंकथंचिदभिहितेइत्यर्थ उतोपमेयतावच्छेदकरूपेणाभिहितेइति नाद्यः सुंदरंकमलंभा
तिलतायामिदमद्भुतमित्यतिशयोक्तौसुंदरत्वेनरूपेणवदनस्याप्यभिधानादतिव्याप्तेः नद्वितीयः अपह्नु
तिवारकविशेषणवैयर्थ्यात् अत्रोपमेयतावच्छेदकस्यनिषेध्यतयातेनरूपेणविषयस्यानिर्देशादतएव
तद्वाहृतेः भ्रांतिमद्वारणायआहार्येतिनिश्चयविशेषणवैयर्थ्याच्च तत्रोपमेयतावच्छेदकप्रकारकप्रतीत्यभा
वादेवव्यभिचारानवकाशादित्याहुः तच्चिंत्यम् रूपकसमासव्यवसरेसप्रपंचंवाक्यार्थरूपकस्यनिराकरिष्यमा
णत्वेनतन्मादनखरत्नानामित्यत्ररूपकत्वाभावस्यव्यवस्थापनीयतयातेनतप्रवाद्यदोषस्यनिरासात् नचत
स्यापिबिंबाविशिष्टेतिविशेषणे कंदर्पद्विपकर्णकंबुमलिनैर्धाराम्बुभिर्लोलितंसंलग्नांजननेत्रजकालिमकलं

गंडोपधानं रतेः व्योमानोकहपुष्पगुच्छमलिभिः संछाद्यमानोदरं पश्यैतच्छशिनः सुधासहचरं बिंबं कलंकांकितं स्व
र्रूपकेप्यव्याप्तिः अत्र शशिमंडलरूपविषयस्य कलंकरूपबिंबविशिष्टत्वात् तत्स्थानीयदानजलादिरूपप्रतिबिं
बानां विषयिष्वनेषु कंदुप्रभृतिषु निर्देशात् न चेदं रूपकमेव न भवतीति वाच्यम् अनुभवविरोधात् संमतापह्न
यावैलक्षण्यानिरुक्तेश्च अलंकारसर्वस्वविवरणकारादिभी रूपकत्वेन स्वीकाराच्चेति चेत् सत्यम् अत्र तेनैव स
मार्हितत्वात् तथा च कुवलयानंदे निदर्शनाप्रकरणे दीक्षितैरुक्तं यत्र तु विषयविषयिविशेषणानां परस्परसादृ
श्येन बिंबभावोस्ति ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थीन्यंतर्द्धानव्यसनरसिका रात्रिकापालिकीयं द्वी
पाद्द्वीपं भ्रमति दधती चंद्रमुद्राकपाले न्यस्तं सिद्धांजनपरिमलं लांछनस्यच्छलेनेति सावयवरूपकोदाहरणे तत्रा
पि विषयविषयिणोस्तद्विशेषणानां च प्रत्येकमेवारोपः न तु ज्योत्स्नादिविशिष्टरात्रिरूपविषयस्य भस्मादि
विशिष्टकापालिकीरूपविषयिणा विशिष्टरूपेणैवारोपोस्तीति ननु तत्र ज्योत्स्नादीनां भस्मादीनां च पर
स्परारोपवशात् केवलानां तेषां रात्रिविशेषणतया कापालिकीविशेषणतया च शाब्दबोधाभावात् अस्तु
विषयविषयिणोर्बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टत्वाभावः कंदर्पद्विपेत्यादौ तु कलंकादीनां चंद्रमंडल
विशेषणतया दानजलादीनां च कंदुप्रभृतिविशेषणतया शाब्दबोधोदयात् विषयस्य बिंबवैशिष्ट्यं दुर्वारमेव

अ॰ टी॰
९९ ११

नचात्रापि शशिमंडले कलंकत्वेन तादात्म्यस्यैवारोपः कलंककादानजलादीनां चाभेदबोधः स्पष्ट एवेति विंबवैशिष्ट्यं नास्ति क
लंकस्य विषयतावच्छेदकत्वानभ्युपगमादिति वाच्यं चंद्रादिविशेषणत्वेन प्रतीयमानानां कलंकादीनां विषयता
वच्छेदकत्वाद्यनभ्युपगमे मानाभावात् स्वकल्पितनियमानुरोधेन शास्त्रविषयस्यार्थस्यानपवादात् उच्यते अत्रोक्ति
नत्वलांछितत्वयोर्वस्तुप्रतिवस्तुभावापन्नत्वेन तद्विशेषणतयैव विंबप्रतिविंबभावेन कलंककादानजलयोरुपादानात्
विषयस्य शशिमंडलस्य विंबाविशिष्टत्वसत्त्वेनाव्याप्त्यनवकाशात् नन्वेतावता विषयस्य विंबवैशिष्ट्यमस्तु नामैव विं
बप्रतिविंबभावविशेष्यतया वस्तुप्रतिवस्तुभावेन धर्मोक्तिस्थले ह्युपमायाः सर्वसंमतत्वात् उच्यते रूपकलक्ष
णे साक्षाद्धि विंबप्रतिविंबवस्तुभावापन्नधर्मविशिष्टताभावस्यैव विंबाविशिष्टपदेन विवक्षितत्वमिति वाच्यत्वा
त् त्वन्मादनस्वरत्नानामित्यत्रोक्तिव्यभिचारणस्य तावत्त्वेनैव भावात् तत्र मार्जनपांडुरीकरणयोर्विषयविषयि
भावापन्नत्वेन तत्र साक्षाद्देवालक्ष्मकश्रीखंडलेपयोर्विशेषणत्वात् यत्तु निर्दिष्टपदेह्रषणमुक्तम् तदपि न उ
पमेयतावच्छेदकरूपेणैवाभिधानस्य विवक्षितत्वात् अपह्नुतौ चोपमेयस्य निषेध्यपितद्रूपेणाभिधानसत्त्वा
दतिव्याप्तिसंभवेन तद्वारकविशेषणं तु नरस्यावश्यकत्वात् नच तथापि निश्चयग्राह्यार्थन विशेषणवैयर्थ्यमेव
नत्रोपमेयतावच्छेदकरूपेणानभिधानादेव व्यभिचारविरहादिति वाच्यम् इष्टापत्तेः उपरंजकतापदार्थस्य प्रह्न

९९

तेनतन्निर्मुक्तस्यैवाभिधानेपि तन्निविरहात् यदप्युक्तं नायंसुधांशुः किंतर्हिसुधांशुः प्रेयसीमुखं इतिकुवलयानंदस्था
न् लक्ष्यवृत्तिगुणानामेवतथात्वादित्यर्थः पदार्थनिदर्शनातेवैलक्षण्यानुपपत्तिरपिद्रष्टव्या: मुखगतेति तथाचमु
खगतलावण्यादिमन्मुखमितिबोधइत्यर्थः मुख्यार्थेति चंद्रस्यैवमुख्यार्थत्वात्तत्रचमुखगुणसंबंधबाहित्यादित्य
र्थः व्यधिकरणेति उपमेयतावच्छेदकव्यधिकरणेत्यर्थः नामार्थयोरिति समानविभक्त्यवरुद्धत्वेन तदभेदःसंस
र्गतयाभासतइत्यर्थः एवंचचंद्रत्वावच्छिन्नप्रकारतानिरूपिताभेदनिष्ठसंसर्गतानिरूपितमुखत्वावच्छिन्नविशेष्य
ताकबोधएवंविधस्थलेसंमतः सचानुपपन्नः मुखंनचंद्रइतिमुखत्वावच्छिन्नविशेष्यताकचंद्रत्वावच्छिन्नप्रतियो
गिताकभेदप्रकारकज्ञानसत्वेतदसंभवादित्याह नन्विति: योग्यतेति मुखंचंद्राभिन्नमितियोग्यताज्ञानस्यैवता
दृशशाब्दधीहेतुत्वात् मुखंनचंद्रइतिज्ञानसत्वेचतदनुदयात् तद्व्यतिरेकेणचशाब्दानुदयादितिभावः नचप्रकृ
तेऽभेदस्यासांसर्गिकविषयतयाभानाभ्युपगमात्कथंतत्रभेदप्रकारकज्ञानस्यप्रतिबंधकत्वमितिवाच्यं अभेदवि
षयकज्ञानत्वस्यैवभेदज्ञानप्रतिबध्यतावच्छेदकत्वात् आहार्येति सत्यप्युक्तबाधज्ञानेमुखत्वावच्छिन्नविशेष्य
ताकाऽभेदसंसर्गकचंद्रत्वावच्छिन्नप्रकारताकबोधोजायतामितीच्छयामुखंचंद्राभिन्नमितियोग्यताज्ञानंसंभवत्ये
व इच्छाधीनज्ञानेबाधबुद्धेरप्रतिबंधकत्वादित्यर्थः परोक्षेति प्रत्यक्षान्यज्ञानमित्यर्थः योग्यताज्ञानस्यचोक्तस्यमानस

अ.टी. ९९
१००
100

अत्यंतलुप्तनयाप्याहार्यत्वस्वीकारेपि सिद्धांतविरोधाभावादिति भावः नन्वेवं वाक्येनासिंचनीयादावप्याहार्ययोग्यता
ज्ञानाच्छाब्दबोधः स्यादित्याशंक्य इष्टापत्तिमाशंक्य एवं चेति गौरवेति सिद्धांते तु शाब्दस्यानाहार्यत्वनियमात्तादृश
स्थले प्रयोजनाभावादनाहार्यत्वं न निवेश्यत इति भावः एवमिति यत्रानाहार्यज्ञानस्यैव हेतुता तत्र परोक्तं ज्ञानीय
हेतुतायामनाहार्यत्वं कारणतावच्छेदककोटौ न निविशत इति भावः अन्यथेति अयोग्यतानिर्णयदशायां शाब्द
धीवारणायैव हि योग्यताज्ञानस्य हेतुता कल्प्यते यदि तु योग्यतानिर्णयकालेपि उक्तरीत्या शाब्दबोध इष्टस्त
तदा हेतुत्वकल्पनमेव दुर्लभं स्यात् अतस्तत्राऽभेदान्वयबोधो न भवतीत्येवाभ्युपेयमित्येषामभिप्रायः कथं तर्हि
तत्रान्वयबोध इत्यत आह किंत्विति चंद्रपदस्य चंद्रसदृशे लक्षणा अतश्चंद्रसदृशाभिन्नं मुखमित्येव बुद्धिरि
ति भावः अत्र चंद्रसादृश्यमात्रे लक्षणायां सादृश्यस्य निपातभिन्ननामार्थत्वेनाश्रयत्वसंबंधेन मुखान्वयो
न स्यात् अतोऽभेदान्वयार्थं विशिष्टलक्षणैवावश्येयं स्यादेतत् एवं सत्युपमायां रूपकस्य च किं भेदकमित्या
शंकते अथैवमिति उभयत्रेति चंद्र इव मुखमित्यत्रापि चंद्रसादृश्यस्य मुखेहि तत्तावगाहनादित्यर्थः सादृश्य
मिति तावन्मात्रस्य इवपदार्थत्वात् तस्य चानुयोगित्वेन मुखान्वयादित्यर्थः रूपकेत्विति सादृश्यविशिष्टस्यैव
लक्षणयाऽभेदसंसर्गेण मुखान्वयादिति भावः यदि तु विशेषणादिकृतवैलक्षण्यमात्रेणालंकारांतरत्वमित्यं

९९

गीक्रियतेतत्राह अन्यथेति चंद्रइवमुखंवामुखमित्यत्रसादृश्यस्योपमेयविशेषणं चंद्रसदृशंमुखमित्यत्रचतद्विशि
ष्टोमुखविशेषणं अतोद्वितीयस्थलेपिरूपकमेवस्याद्वाच्यलक्ष्यत्वभेदस्याऽप्रयोजकत्वात् नचेष्टापत्तिः चंद्र
सदृशमित्यादावार्थीउपमैवेतिसर्वसंमतत्वात् एवंचस्थ्यामीत्यस्यरूपकातिरिक्तालंकारापादनेनार्थः किं
तुचंद्रइवमुखमित्येतद्वाक्यार्थस्यलंकारातिरिक्तालंकारापादनमेवेतिरूपकापादनएवपर्यवस्यतीतिइतिध्ये
ये लक्षणायामिति चंद्रपदस्यचंद्रसादृश्यविशिष्टलक्षणायामित्यर्थः नन्वेवंचंद्रइवेत्यादावपिकुतोनता
द्रूप्यप्रत्ययः सादृश्यप्रत्ययमात्रस्यतदवगमकत्वेऽप्यतदविशेषादित्याशंक्याह चंद्रइत्यादि लक्षणा
विरहादिति तथाचसादृश्यमात्रस्यनतदाक्षेपकत्वंकिंतुलक्षणायाएवेतिभावः विषयिणेति आरोप्य
तावच्छेदकेत्यर्थः ननुलक्षणायाः सादृश्यविशिष्टप्रतीतिजनकत्वेपिकथंततस्ताद्रूप्यप्रत्ययोभवि
ष्यतीत्यतआह नचेति लक्षणाजन्यत्वमात्रस्याप्रयोजकत्वात्सादृश्यस्यैवतदाक्षेपकत्वेनुक्तदोषतादव
वस्थ्यादितिभावः अभिप्रायमाह श्लेषादीत्यादि एकपदेति चंद्रपदेनचंद्रस्यशक्त्याचंद्रसदृशस्यचलक्षणयावोधा
तन्मूलकव्यंजनयाउभयोरभेदवाधाभावादितिभावः नन्वेवमपिचंद्रसदृशएवचंद्रत्वरूपविषयिणावच्छेदक
यमेवार्थःस्यात्तत्समुखेनतस्यैकशब्दोपात्तत्वात् एवंचमुखेचंद्रताद्रूप्यप्रत्ययोऽनुपपन्नएवेत्याशंकते नचैवमि

ग्र॰टी॰
१०१

ति इष्यते चेति उपमारूपकयोर्भेदसिद्ध्यर्थमित्याशयः चंद्रसादृश्येणेति प्रथममङ्गीकृत्य चंद्रसदृशविशेष्यकचंद्रत्वप्रका
रकबोधस्य व्यंजनयाभ्युदये न तस्य चंद्रसदृशाभिन्ने मुखेपि चंद्रत्वप्रकारकबोधः अतो मुखे चंद्रताद्रूप्यप्रत्ययः सिद्ध एवेति
भावः न च लक्षणां विनैव नामार्थयोरभेदान्वयव्युत्पत्त्या चंद्रप्रकारकाभेदसंसर्गकमुखविशेष्यकबुद्धिसंभवात्
किमर्थं लक्षणास्वीकार इति वाच्यम् अस्ति हि चमत्कारकसाधारणधर्मानुपस्थितिदशायामुभमायाश्च रूपक
स्याप्यनिष्पत्तिश्चमत्काराभावश्चेति सर्वानुभवसिद्धं अथ मनस्याभारं तेनाकं मंडलं नगरं विधुमंडलमित्यादौ रू
पकालंकारानुल्लासेपि सम्पूर्णोल्लंकृतत्वसकलकलनादिरूपधर्मोपस्थित्या रूपकोल्लासश्चमत्कारोदयश्च परंतु दा
हृ तस्य लेशमसिद्धतया धर्मस्य शब्दानुपादानमपेक्ष्यते मुखं चंद्र इत्यादौ तु प्रसिद्धतया न दोष इति न नियमनस्त
स्य शाब्दमनुपादानमिति विशेषः एवं च यदि रूपके सादृश्यस्यानुप्रवेशो नास्ति न दोक्तधर्मानुपस्थितिदशायां
कथं न रूपकपर्यवसानं तदाप्यभेदबोधकसामग्र्या अवैकल्यात् न चाहार्याभेदबुद्धौ चमत्कारे वा सादृश्यज्ञानं कारण
मिति वाच्यं यद्यनुलोमा भवेद्वह्निर्यदि शीतं भवेज्जलं तामसेद्वृत्तोरामस्तदास्याद्यमसत्यवागित्यादौ सादृश्यज्ञानाभावेप्यभे
दबुद्धेरुदयात् न चोपमानोपमेययोस्तत्पदैवैवं कल्पत इति वाच्यं प्रमाणाभावात् अतोत्र सादृश्यलक्षणाया आवश्यकत्वमेवेति
नियतदर्थविशेषादृष्ट्वा साक्षादेव विषयितावच्छेदकप्रत्ययलक्षणापदेष्वङ्गीकुर्वतामनमाह केचित्त्विति तेन रूपेणेति लक्ष
तावच्छेदकप्रकारेणेत्यर्थः

१०

चंद्रत्वेनेति शक्यतावच्छेदकधर्मेणैवेत्यर्थः ननु चंद्रसदृशलक्षणाज्ञानस्य चंद्रसादृश्यप्रकारकज्ञानत्वमेव कार्यता
वच्छेदकं लाघवमिति चंद्रसदृशत्वेनान्वययुक्तो न तु चंद्रत्वेन लक्षणाज्ञाननिष्ठकारणतानिरूपितलक्ष्यताव
च्छेदकावच्छिन्नप्रकारताकज्ञानत्वरूपकार्यतावच्छेदकानवच्छिन्नत्वादित्यत आह तस्मादेति ननु येन रूपेण पदा
दर्थोपस्थितिस्तेनैव तत्पदार्थान्वयो भवति तत्कथमत्र चंद्रसदृशत्वेनार्थोपस्थितौ चंद्रत्वेन शाब्दबोधो भवि
ष्यतीत्यत आह शाब्देति नन्वेवं सति लक्षणाज्ञानस्य लक्ष्यतावच्छेदकप्रकारकज्ञानत्वरूपकार्यतावच्छेदकप
रित्यागे यथोक्तकार्यतावच्छेदकान्तरकल्पनागौरवमित्यत आह प्रकृतेति एतादृशकल्पनायां बीजमाह मु
खेति ननु विषयितावच्छेदकप्रतीतिं विनापि तत्समानाधिकरणधर्माणां प्रतीतिः स्यादेवेति किंच इत्यादिप्र
तिपन्नेत्यत आह तां विनेति चंद्रत्वव्याप्यत्वेनावगताभामात्वाद्यकत्वविशेषादिरूपधर्माणां चंद्रत्वबोधं विना
मुख्यत्वेऽगृहीतत्वमशक्यत्वादित्यर्थः दूषयति तन्नेति मुख्यं न चंद्र इति बाधज्ञानस्य प्रतिबध्यतावच्छेदकं चंद्रप्रकार
काभेदसंसर्गकमुख्यविशेष्यकज्ञानत्वरूपमेव तच्चोक्तस्थलसाधारणमेवेति कथं तत्सत्त्वे चंद्रत्वरूपेणाऽभेदा
न्वयबोधो भवितुमर्हतीत्याह चंद्रत्वेति ननु शक्तिजन्यतादृशबोधं प्रत्येव प्रतिबंधकत्वं वाच्यं इत्यत आह ईदृ
शेति तादृशबाधधीसत्त्वे उक्तबोधस्येष्टत्वे शक्तिलक्षणाजन्यत्वस्याप्रयोजकत्वादिति भावः ननु चंद्रत्वरूपेणाः

अ॰टी॰
१०२

भेदावगाहित्वाद्धीरेवात्र प्रमाणमित्यत आह चंद्रत्वावच्छिन्नेति तादृशबोधस्योक्तरीत्या शक्यैवोपपत्त्या न तदन्यथानु
पपत्त्या तस्य लक्षणाजन्यत्वं कल्प्यत इति भावः ननु गंगायां घोष इत्यत्र गंगात्वेन तटस्य बोधान युक्तमेव लक्षणाज
न्यबोधे बाधस्याविरोधित्वकल्पनं तद्विना तन्नियतशैत्यपावनत्वादिधर्मेण तटबोधानुपपत्ते न तस्य बंधबोध
स्यैव तद्बोधकत्वेन गंगातीरे घोष इत्यतोपि तन्मात्रत्वयप्रसंगात् उक्तं हि काव्यप्रकाशे तटादीनां गंगादिशब्दैः प्र
तिपादनेन तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसंप्रत्यय इति अत आह अत एवेति नान्वय इति किंतु तस्य
बंधित्वस्यैव लक्षणया बोधः व्यंजनया तु तदनंतरं शक्यलक्ष्ययोरभेदबोध इति भावः गंगात्वेनैव तटं ज्ञातो न लक्ष्यत
इत्यत आह गंगात्वेनेति ननु यदा गंगात्वेन प्रवाहस्यैव शक्यत्वेन तत्रैव बाधबुद्धेः प्रतिबंधकत्वं यदा तु तीरमेव तद्रू
पेण शक्यत्वेन तत्र तु न तथा भिन्नविषयत्वादित्याशंकते नचेति यद्रूपं धर्मितावच्छेदकत्वेन बाधज्ञाने भासते तद्रूपा
वच्छिन्नविशेष्यताकं न हि विशिष्टबोधो न भवतीत्याह समानेति वैपरीत्ये नियामकमाह अन्यथेति तत्रैकत्र पर्वत
त्वेन पर्वतस्यापरत्र च महानसस्य भानाद्विशिष्टबुद्ध्यापत्तिरिति भावः नन्वेवं सति कथं तटे शैत्यादिप्रत्यय इत्यत
आह अत इति न च शक्तिलक्षणाजन्यबोधो यथा बाधान्न भवति एवं व्यंजनयापि कथमभेदबुद्धिः स्यात् प्रतिब
ध्यतावच्छेदकधर्मावलीढत्वादिति वाच्यं व्यंजनाया धर्मिकग्राहमानेन तद्बोधकत्वेनैव सिद्धात्तन्मूलकज्ञाने बाध

१०२

ज्ञानस्य प्रतिबंधकत्वविरहादित्यालंकारिकसिद्धांतात् तथा च काव्यप्रदीपे शाब्देन लाक्षणिकेर्थे प्रतिपादिते न तत्र शुद्धा
भेदो व्यंजनया प्रतिपाद्यते न च व्यंजने बाधः प्रतिबंधक इति काव्यविदां पंथा इति केचित्तन्मते सत्यामपि बाधबुद्धौ शाब्दा
द्भेदान्वयबोधः तदुक्तं व्युत्पन्नता अभेदेनासत्यपि ज्ञानमर्थे शब्दः करोति हीति अभेदांशगात्वेनैव तत्तादिबोध इत्या
शयः एतदाशयपरितोषान्मतान्तरमवतारयति अन्ये त्विति अभेदगर्भमिति भेदगर्भेति बहुव्रीहिं कृत्वा तेन तेनान्यसमा
सः तेन भेदनिर्मुक्तमित्यर्थः विशेष इति भेदावगाहनानवगाहनाभ्यां विषयभेदस्य स्फुटत्वादिति किं भेदका
न्तरगवेषणप्रयासेनेत्याशयेनाह सादृश्यस्योपमासाधारण्यैवात्र प्रवेशे दोषमाह मतान्तरे त्विति कथमि
ति भेदज्ञानस्याभेदप्रतीत्यनुपायत्वात् अत एव तद्विरोधित्वादिति भावः आरोप्यतावच्छेदकरूपेणैवाऽभेदबो
धं समर्थयितुमाह वस्तुतस्त्विति प्रतिबंधकतायामिति मुखं चंद्राभिन्नमित्येतादृशज्ञानत्वावच्छिन्नप्रतिबध्य
तानिरूपितायामित्यर्थः सादृश्यातिशायेति चमत्कारकानेकधर्मविषयिण्या इत्यर्थः एकस्याप्रतिबंधकतायां
विषयविशेषप्रतीतेरुत्तेजकत्वं न संभवति उक्तसादृश्यज्ञानसत्त्वे बाधाभाववत्ताज्ञानसत्त्वेऽपि वक्रिमताज्ञान
प्रसंगात् तादृशज्ञानाभावविशिष्टबाधाभावसत्त्वादत आह बाधेति तद्विशेष्यकतत्प्रकारकज्ञाने तद्विशे
ष्यकतदभावप्रकारकज्ञानत्वेन विशिष्टैव प्रतिबंधकत्वं कल्प्यते एवं च प्रकृते मुखं चंद्राभिन्नमिति ज्ञानं प्र

अ॰टी॰
१०३
103

तिबंधकम् नत्रैवसादृश्यप्रतीतेरुत्तेजकत्वंस्वीकार्यमित्यर्थः फलितमर्थमाह तथाचेति सादृश्यज्ञानसत्वेचतद्
भावविशिष्टबाधाभावोविशेषणाभावनिबंधनोस्त्येवेतिप्रतिबंधकाभावाभेदबोधःस्यादेवेतिभावः नन्वेवं
सादृश्यज्ञानाभावकालेबाधधीसत्वेप्यभेदान्वयबोधोनस्यादित्याशंकांदोषापत्त्यापरिहरति यत्रेति एवंसतिय
त्रसादृश्याभावमवगाह्यतत्राभेदान्वयबुद्धिरनुभवसिद्धानत्रनिर्वाहोनस्यादित्याशंकते नचैवमिति एवंसाद
श्यज्ञानेनोत्तेजकत्वस्वीकारेइत्यर्थः इत्यासावित्यादिपदेन आसीदियंदशरथस्यगृहेयथाश्रीःश्रीरेववाकिमुप
मानपदेनसैषा कष्टंवतान्यदिवदैववशेनजीताउःखात्मकंकिमपिभूतमहोविपाकइत्यादिसंग्रहः सादृ
श्यज्ञानाभावादिति तथाचतद्विशिष्टबाधोस्त्येवेतिप्रतिबंधकसामग्र्याःकथंकार्योत्पत्तिरितिभावः भेदज्ञा
नाभावेति सादृश्याभावस्यज्ञानेपितेनतद्घटकभेदाभावमात्रोल्लेखनात्तत्रप्रतिबंधकभेदज्ञानाभावोवि
शेष्याभावायत्तएवेतितद्विकल्पएवप्रतिबंधकाभावइतिभावः क्वचिदिति मुखंचंद्रइत्यादौ विशेषणाभा
वेति तत्रबाधज्ञानसत्वेपिसादृश्यज्ञानसत्वेनतदभावप्रयुक्तोविशिष्टाभावइत्यर्थः अत्रेति सिंहेनसदृशोनाय
मित्यस्मिन्नुदाहरणइत्यर्थः तथाचतत्रास्त्वेमुखंनचंद्रइत्येतादृशबाधबुद्धेरेवाभावान्नानुपपत्तिलेशोपीत्यर्थः न
नउक्तस्थलेसादृश्याभावानवगाहनेकिंतत्घटकभेदाभावएवेत्यत्रनियामकाभावइत्यतआह नहीति साध।

म्यज्ञानाभावेपिरूपकंकुतोनस्यादतआह भेदागर्भेति रूपकशरीरेति तद्घटकत्वेनेत्यर्थः सर्वेति येषांतावत्सा
दृश्यमलंकारोपविषयाभेदोरूपकं येषांवातादृशाभेदारोपस्तत्तेषामुभयेषांविशेषणतया येषांत्वभेदप्र
तीतिजनकप्रतीतिविषयसादृश्यमेवरूपकंतेषांविशेष्यतयासादृश्यस्यरूपकशरीरघटकत्वादित्यर्थः एतेनयदु
क्तंप्राक् रूपकस्यलेसादृश्यलक्षणानंगीकारेधर्मानुपस्थितावप्यभेदबोधसामग्रीसत्त्वाद्रूपकनिर्वाहेचमत्का
रापत्तिरिति तदपासादृश्यज्ञानस्यबाधबुद्धिप्रतिबंधकतायामुत्तेजकत्वेनतदभावविघटकत्वेनोपयोगस्योक्त
त्वात् किंच रूपकापत्तिरित्यनेनयदिअभेदबुद्धित्वावच्छिन्नमापाद्यतेतदेष्टापत्तिरेव यदितादृशबोधेसालं
कारत्वव्यवहारापत्तिरित्युच्यते तदाआपादकाभावः नत्वभेदज्ञानमात्रेणालंकारव्यवहारोभ्युपेयते अत
एवचमत्कारापत्तावप्यापादकाभावएवेतिउपमाप्रकरणोक्तंसर्वमवधेयम् इत्यादिकमभिसंधायाह
द्वयलमिति सामान्यलक्षणानंतरंविभागः प्रासंगिकः सचतत्त्वरूपकथनेनैवआविर्भविष्यतीत्य
भिसंधिनाऽवतारयति तद्भेदानिति रूपकंतावत्त्रिविधंसावयवंनिरवयवंपरंपरितंचेति आद्यंद्विधासम
स्तवस्तुविषयं एकदेशविवर्तिचेति तत्राद्यमाह आरोप्याइतीत्याशयः अनंत्यमिति अविवक्षितमित्यर्थः आ
रोप्याइत्यत्रपदार्थाइतिशेषः आरोप्यपदंचारोपितरूपकत्वपरतयारोपविशेष्यविशेषणोभयपरमितिदर्शय

अ. टी.
१०३
105

माह यत्रारोपेति समस्तेति आरोपनिर्वाहकतयाऽऽरोप्यं तद्विषयश्च समस्तं शाब्दार्थः तद्रूपस्य वस्तुनः शब्दोपात्तत्वेन
विषयत्वादित्यवयवार्थः शोभते विष्णुरिव किरणो गगनसमुद्रे रजनिवेलालग्नः तारामुक्ताप्रकरः स्फुटविघटितनभ
चमुक्तिसंपुटमुक्तः सेतुकाव्ये शरद्वर्णनम् द्वितीयमाह एककेति मात्रानुरोधादेककेति शब्दप्रयोगः तदेवस्प
ष्टयितुमेकदेश इत्याद्यर्थमवद्यति एकदेशविवर्त्तीत्यस्य विशाहरहितं संस्तांतरमिति चं उंदासः श्रौतत्वार्थ
त्वयोः प्रतियोगिसापेक्षत्वात्कारिकायामनुक्तं पतियोगं दर्शयति यत्र केचिदारोप्यमाणा इति सांगेदं इत्यस्यार्थ
माह सर्वोक्तमिति पीनपयोधरलग्नदिशांप्रवसज्जलदसमयवितीर्णम् सौभाग्यप्रथमचिह्नं प्रम्लायति सारस
नखपदं इंद्रधनुः सेतुकाव्ये शरद्वर्णने नखपदेन रवदत्तं पदं व्यवसितित्राणस्यानलदंमात्रिवस्तुभुइत्यभिधा
नात् अतएव नववनस्वपदलेखालांछितं वाकुम्बलं इति तत्र दीरस्वामिनोदाहृतं अधिकरणत्वेति बहुव्रीहि
समासोत्तरत्वप्रत्ययबलात्तदन्यतरद्भित्वं लभ्यते नन्वन्यतरद्भित्वलाभेऽपि कथं दिशा नायिकात्वापेक्षः नायके
हृत्वेनापि पर्यसानं संभवादित्यत आह प्रचजलदेति ननु नखदत्तस्यान्यत्रापि संभवात्कथमेतदन्यतरद्भित्वनियम इत्यत
आह नखदत्तेचेत्याह एवं द्विविधं सावयवमभिधाय द्वितीयभेदमाह निरवयवं त्विति अभेदांतरप्रयोज्यत्वाभावद्भे
दकत्वं निरवयवत्वमिति दर्शयति यथेति एवं चैतद्युत्पत्तिकथनात् अभेदांतरप्रयोज्यतद्भेदकत्वं सावयवत्वमिति
वैपरीत्ये ।

१०३

नपूर्वमेदस्यापिलक्षणंदर्शितंभवतीत्यवधेयं रूपणमात्रमिति नत्वाशयास्यंतत्वारोपोपपादकमारोपांतरमपीत्या
शयः एकस्मिन्निति विषयश्रुतेरित्यर्थः अयस्यामिति विषयिणामित्यर्थः मन्मथधनुर्निर्घोषः कमलवनलक्ष्मीवलि
तलाक्षीनूपुरशाहः अयनेकलहंसरवोमधुकरव्याकुलनलिनीप्रतिसंलापः सेतुकाव्येशारदवर्णने अनेकपदस्य
त्रिप्रमृतिमात्रपरतामाशंक्याह अनेकपदमिति एकभिन्नत्वस्यैवावयवार्थत्वादयमेवमुख्योऽनेकपदार्थः अतएव
वानेकमन्यपदार्थेइतिवचनविहितोवहुव्रीहिस्त्रिचतुरित्यादौप्रसिद्धइतिभावः इदंत्ववधेयं मालारूपकस्थले
विरोधालंकारध्वनिरावश्यकः एकस्यविरुद्धोभयतादात्म्यस्यात्रविषयीक्रियमाणत्वात् यथोदाहृतेकलहंसर
वेचनुःशाहनूपुरशाहाद्यभेदावगाहनं अतएवयत्नर्कतंत्रशतसहस्ररश्मिर्गोम्वरः स्तकविकैरवकाननेंदु
रितिश्लोकंव्याचक्षाणैरेकस्मिन्वर्तमानोपाध्यायेसूर्यचंद्रोभयाभेदप्रतीत्याविरोधालंकारध्वनिरितिपदत्रयर
मिश्रैःकुसुमांजलिप्रायविवरणेविभावितमिति परंपरितमाह अन्यारोपेति अन्यविशेष्यकान्यप्रकारकारो
पाभावप्रयोजकाभावप्रतियोग्यन्यविशेष्यकान्यप्रकारकारोपः परंपरितमित्यर्थः ननुसावयवरूपकात्परं
परितस्यकोभेदः नह्यत्रारोपांतराणांरूपकांतरसिद्धिहेतुत्वादितिचेत् अत्रवदंति यत्रप्रकारांतरेणासाहश्य
निर्वाहसंभवेपिचमत्कारविशेषजननार्थंरूपकांतरमुपन्यस्यतेतत्रसावयवं यथाशोभतेविस्फुटकिरणर

अ॰टी॰
१०५
105

त्यादौ गगनसमुद्रां निर्गतत्वादिधर्मस्य यमंतरेणापि शुभ्रत्वादिना तारासु मौक्तिकारोपसिद्धेः रूपकांतरोपन्यासेन च
मत्कारातिशय एव समुल्लसति विद्धन्मान सराजहंसेत्यादौ तु राज्ञि हंसाभेदारोपहेतुसाधारणधर्मांतरस्य चम
त्कारहेतोरप्रसिद्धत्वाद्धृदये सरोरूपकेणानहृतित्वरूपधर्ममादाय राज्ञि हंसाभेदारोपो निर्वहतीति परंपरितमि
ति भेदः तस्माद्रूपकांतरमनपेक्ष्य यद्रूपकमेव न स्वात्मानमासादयति तत्परंपरितं यत्र तु रूपकांतरमनपेक्ष्या
पि रूपकांतरमविकलमात्मानमाप्नोति तत्र रूपकांतरमुपन्यस्यमानं चमत्कारसमुद्देलनार्थमेवापेक्ष्यत इति सा
वयवत्वमिति तदेतत्सर्वं विशदयन्नाह यत्रेत्यादि अन्ये तु सावयवं बहुकारोपात्मकं इदं त्वारोपद्वयात्मकमित्ये
व विशेष इत्याहुः प्राहृट्लक्ष्म्याः पयोधरैः प्रतिपीडितो विंध्यः उद्वहति नवतृणांकुररोमांचं प्रसाधितात्मा इति
गाथाकोषे वर्षाकालीननवप्ररूढतृणांकुरवर्णनं अत्र पयोधर[illegible]पदेन मेघस्तनयोरुपस्थापनात्तयोरभे
दभावेन स्तनाभिन्नमेघालिंगनजन्यत्वात्तृणांकुरे शुभ्ररोमांचाभेदारोप इत्याह अत्र हीत्यादि नन्वत्र तीक्ष्णाग्र
त्वादिनापि तृणांकुररोमांचरूपकनिर्वाह इति चेत् तत्राह यथा वेति महावंशपदे बहुव्रीहिकर्मधारयं वाश्रित्य
तदुपस्थाप्यार्थयोरभेदारोपः अत्र महावंशाश्रयरूपधर्मेणाकीर्णेन नर्त्तकीतादात्म्यारोपः तन्निमित्तासाधारण
धर्मान्तरानुपस्थितेरत्र तदारोपं विनाद्वितीयरूपकासिद्धेरित्याह अत्रेत्यादि उदाहरणद्वयमेकविषयत्वं दर्शय

त्वेपि तत्संसर्गतायाः प्रतियोगित्वानुयोगित्वादिकं कुतो न शाब्दबोधे भासत इत्यत आह पदार्थेति पदार्थतत्संसर्गाणामे
व तद्विषयत्वनियमादतिरिक्तस्य वारणासंभवादित्यर्थः यद्यपि विशिष्टबुद्धिमात्रे विशेषणविशेष्यतत्संसर्गाति
रिक्तस्य भानं नास्तीति नियमात् शाब्दबोधे तिशेषोपादानमसंगतं तथापि प्रकृतत्वात्तथोक्तं समूहेति दंडपुरु
षसंयोगा इति समूहालंबनात् दंडी पुरुष इति विशिष्टज्ञानस्य वैलक्षण्यमनुभवसिद्धं तच्चोभयत्रापि विषयसाम्या
दनुपपन्नं अतोऽन्यथानुपपत्त्या विशिष्टज्ञाने विशेषणविशेष्ययोः संबंधस्य संयोगादेः संबंधः प्रतियोगित्वानुयोगि
त्वरूपो दंडपुरुषादिनिष्ठो भासते समूहालंबने तु न तथेति विषयवैषम्याद्वैलक्षण्यमुपपन्नमिति केषांचिन्मतं
एवं चात्रापि विशिष्टबुद्धित्वात्तज्ज्ञानसंभव इत्यर्थः एकस्मिन्निति संबंधस्यापि संबंधो भासत इत्यंश इत्यर्थः अन्यत्रे
ति विशेषणस्यानुयोगित्वं विशेष्यस्य च प्रतियोगित्वं अभेदः प्रतिभातीति तथास्वीकारात् वैपरीत्यमित्यर्थः न च
विशेषणविशेष्ययोः संबंधसंबंधोपि भासत इत्येव तन्मतं ननु विशेष्यानुयोगिको विशेषणप्रतियोगिकस्संबंधस्यैता
वत्पर्यंतमपीति वाच्यम् तत्पर्यंतस्यैव तन्मतत्वात् तथा चानुमितिलक्षणे पक्षणे पक्षधरमिश्रैरुक्तं विशेष्यविशे
षणानुयोगिकप्रतियोगिकसंबंधस्यैव विशिष्टधीविषयत्वादिति समवायविचारेऽपि प्रत्यक्षालोके तैरुक्तं विशेषणप्र
तियोगित्वस्य विशेष्ये चानुयोगित्वस्य भानादिति न च विशेष्यत्वादिकं भासमानवैशिष्ट्यानुयोगित्वादिरूपमिति पदे

अ. टी.
कौं
१९
108

संसर्गस्य विशेषणप्रतियोगित्वनियमो नत्वतिरिक्तत्वस्तेपीति वाच्यम् तत्पदार्थस्यातिरिक्तानतिरिक्तत्वमात्रएव हि वि
वादे नतु वस्तुस्वरूपे तस्योभयत्राप्यविशिष्टत्वात् तदेवमभ्युपेत्यापि प्रतियोगित्वादिवैयर्थं दूषणमभ्यधायि संप्रति
तदेवानुपपन्नमित्याह वस्तुतस्त्विति अन्यथैवेति तत्प्रकारकत्वमेव विशिष्टज्ञानत्वं तच्च स्वरूपसंबंधविशेषः
समूहालंबनव्यावृत्तश्चैव तद्वैलक्षण्यमिति भावः नत्विति दंडपुरुषतदुभयानुयोगिकप्रतियोगिकसंयोगाद्
निसमूहालंबनाद्दंडी पुरुष इति विशिष्टज्ञानभेदानुपपत्तिप्रसंगादनवस्थानाच्चेति भावः शाब्दस्यैवतादृशबोध
स्ताह शाब्दोपसमर्थकत्वमित्यत्र प्रमाणाभावमाह अपिचेति विषयताभावेपीति तत्रविंबप्रतिविंबभावापन्न
पदार्थानामुपमेयोपमानविशेषणतापन्नत्वेन परस्परमभेदान्वयासंभवादिति भावः सर्वेषामविवादसूचनाय
आलंकारिकत्वावच्छेदेनेति अनुगामिधर्मस्थलेप्याह एवमिति शाब्दान्वयाभावेपीति चंद्रायाः स्त्रीलिंगत्वेनभि
न्नलिंगावरुद्धत्वादित्यर्थः पूर्वनिपातेनेति तथाचतत्र चंद्रमुखमिति प्रयोगे तस्यासाधुत्वापत्तिरित्यर्थः एतादृशा
वैषम्यं तत्पदेपि दुःसमाधानमेवेत्याह अन्यथेति इदंच सर्वं संभवाडक्तं वस्तुतस्तु सौजन्यचंद्रिकेति शाब्दात्पूर्वं सौज
न्याभिन्नाचंद्रिकेति योग्यताज्ञानस्याहार्यस्यावश्यकतया तत्र च समानविभक्तिकत्वघटनायेन चंद्रिकायां सौजन्याभेदस्याप्य
वगाहनसंभवान्नतएव रात्रिचंद्राभेदारोपसिद्धिः अतः सौजन्यचंद्रिकेति शाब्दाः व्यवधानेनैव रात्रिचंद्रारोपस्यानु

लिंगविशेषेति स्त्रीत्वरूपेत्यर्थः इदं च स्त्रीत्वादिलिंगमर्थनिष्ठमिति मते यथाश्रुतमेव शब्दनिष्ठमिति पक्षे तु परं
परयासंगमनीयं प्रकृते तन्नो वैषम्यमाह विहृतेति ननु राजहंसयोरपि द्व्यत्वादिकृत साहश्यमस्त्येवेत्यत आह
रूपेति चमत्कारप्रयोजकेत्यर्थः व्यवसायरविप्रदोषो रोपणेंद्रदृष्टखलाप्रतिबंधः कथं कथमपि दाशरथेर्ज-
यके सति पंजरेऽगनेतावनसमयः सेतुकाव्ये शरद्दारंभवर्णनं प्रातिकूल्येन तदनुग्राहकमुदाहरति यथावेति मानद्-
मपयरुषपवनसमान्तलिसर्वांगनिर्हृतिकरस्य उपमूहनस्य भंडरतिनादकपूर्वरंगस्य विरोधितेति मानेडमा-
रोपेत इन्द्रलकत्वेनोपरहनेपवनारोपः सिध्यतीति भावः तत्पुरुषावयवेति पूर्वपदश्रुतेत्यर्थः यत्संबंधिनीति
यत्र यन्निरूपितसंबंधिधर्मिको यत्संबंधिप्रतियोगिकाऽभेदः प्रतीयते तत्राभेदप्रतियोगिसंबंधिनिरूपकप्रतियो-
गिकाभेदः अभेदधर्मिसंबंधिनिरूपकधर्मः सिध्यति एवं च यत्संबंधिनो भेदबोधे यत्संबंधी प्रतियोगितयाय-
त्संबंधी वाश्रयतयास्त एव द्वितीयाभेदेआश्रयतयेति फलितार्थः चंद्रिकायां इति चंद्रिकाविशेष्यकसो[illegible]प्रति
योगिताकाभेद इत्यर्थः राज्ञीति राजविशेष्यकचंद्रप्रतियोगिकाभेद इत्यर्थः यादृशेन प्रकृतसिद्धिरूपनस्तात् तादृश-
एव उदाहरति तद्यथेति ननु न्यविशेष्यकान्यप्रतियोगिकाभेदबुद्धा कथमन्यविशेष्यकान्यप्रतियोगिकाभेदाव-
गाहनमित्यत आह समानेति तुल्यसामग्रीकत्वात् यद्वि येन विना न भासते तत् द्विहेतो स्तद्बोधकत्वमिति सिद्धांतात्

आ०टी०
१०६
107

सामग्रीति इंद्रियसंनिकर्षादिरूपेत्यर्थः मुखमीति आकांक्षेत्यर्थः तथाच यादृशीत्यापदादुपस्थितिस्तस्यैव बोधः आकां
क्षादीनां तत्प्रकारकतद्विशेष्यकादित्वेऽपि विशेषनियतत्वेन तद्वैपरीत्येन शाब्दानुदयादिति भावः अन्यत्राप्याक्षेपमा
ह एवमिति मुखप्रतियोगिकाभेदवांश्चन्द्र इत्यत्रेवात्र शाब्दसंभवति तत्तु चन्द्रप्रतियोगिकाभेदवन्मुखं इति तथा
च तैरुपमेयोत्कर्षपर्यवसानं स्यादिति भावः रसगंगाधरादीनां समाधानमाह अत्रैकेचिदिति अभेद इति तत्पुरु
षः समानाधिकरणः कर्मधारयः इति वचनात् उभाभ्यां प्रवृत्तिनिमित्ताभ्यामेकस्य धर्मिणो बोधनीयत्वादित्य
र्थः मुखविषेति एवं च विशेषणविशेष्यभाववैचित्र्येऽपि चन्द्रप्रतियोगिकाभेदवन्मुखमित्यनेन समानार्थकत्व
मेवेति भावः वाक्य इति विशेषणस्य प्रतियोगित्वावगाहिज्ञानविषय इत्यर्थः समासेत्विति तत्र विशेषणस्यानु
योगित्वावगाहिज्ञानविषय इत्यर्थः एतन्मतमूलग्रंथे प्रतियोगित्वानुयोगित्वयोर्विशेष्यनिष्ठत्वेन निर्देशो
भिमतः वाक्ये अभेदप्रतिविशेष्यभूतस्य मुखस्यानुयोगित्वभानात् समासे च विशेष्यभूतस्य चन्द्रादेरुपमान
स्य प्रतियोगित्वभानात् अतस्तत्र वाक्येऽनुयोगित्वं मुखे समासे प्रतियोगित्वं मुखे इति व्यवहृतमित्यविरोधः ए
वं च यत्राभेदस्य प्रतियोगित्वं मुखे इति व्यवहृतमित्यविरोधः एवं च यत्राभेदस्य प्रतियोगित्वं मुखे तत्र रूपकस्यानुवा
द्यत्वं यथा मुखचंद्र इति समासे यत्रत्वनुयोगित्वं मुखे तत्र विधेयत्वं यथा मुखं चंद्र इति वाक्य इत्यर्थः ॥ ॥

कचिद्विशेषणप्रतियोगिकत्वेन संसर्गभानेऽप्यन्यत्र चेद्वैपरीत्यमपि दृष्टं तेन तदानुपपत्तिबलादत्रापि तत्त्वनिष्ठाभेदप
वसंसर्गतया कल्प्यते इति शंकामपाकर्त्तुं सर्वत्रापि विशेषणप्रतियोगिक एव संसर्ग इति नियमपवायं न तत्संसर्गस्य
भिप्रायेणाह संसर्गमात्रे चेति सांसर्गिकविषयतापन्नसंसर्गमात्र इत्यर्थः अन्यथा दण्डसंयोग इत्यादिशाब्दबोधे पदा
र्थीभूतसंयोगस्य दंडनिष्ठत्वेनाभिमानादनुपपत्तिः स्यात् शाब्दातिरिक्तस्थलमेवोदाहरति पर्वत इति ननु क्रममेवात्रा
नरम् विशेषणप्रतियोगिक एव संसर्गो भासते इत्यत्र बीजाभाव इति किं दर्शनमात्रनिबंधननियमस्वीकारेणेत्या
शंकते यद्यपीति दुराग्रहेति बीजाभावादित्यर्थः उपहसति तदेवेति प्रामाणिकार्थस्य दुराग्रहतोऽज्ञावनमेव दुराग्रह
पर्यवसायि भ्रांतिरूपत्वात् तथाऽस्वीकारे बीजं दर्शयति भासमानेति दंडी पुरुष इत्यत्र संयोगात्मकदंडपुरुषयोर्वैशि
ष्ट्यं भासते तत्र दंडः संयोगे प्रतियोगीति विशेषणं पुरुषस्तु तत्रानुयोगीति विशेष्यं एवं च यदि तदुक्तरीत्या संसर्गे
विशेणं अनुयोगित्वेन परिशेषेत तदा विशेषणविशेष्यलक्षणयोर्विशेष्ये विशेषणे चातिव्याप्तिः स्यादिति भावः इदं च
प्राचीनमतमनुसृत्य समाहितं विशेष्यत्वप्रकारकत्वादिकमतिरिक्तविषयता विशेष्यस्वरूपमेवेति नूतनपदमूल
कपूर्वमतास्वरसं हृदि निधाय प्रकृतानुपपत्तिं च प्रकारान्तरेण निराकर्त्तुं अभिसंधाय विशेषणानुयोगिकोऽत्र संस
र्ग इति कल्पनमेवाक्षिपति अपि चेति मास्त्विति यद्यपि सोऽजन्यचंद्रिकेति कर्मधारये सोऽजन्यविशेष्यकाभेदसंसर्गकत्वं

ग्र.सी.
१०८
108

द्रिकाप्रकारकबोधोनतेनस्वीकृतः प्रकृतेबाधात् किंतु सौजन्यनिष्ठाभेदप्रतियोगिनी चंद्रिकेति चंद्रिकाविशेष्यक
एवेत्यमप्रसक्तप्रतिभातितथापि सौजन्यनिष्ठत्वेन चंद्रिकाप्रतियोगिकाभेदावगाहनसाम्येनतन्निषेधः कृत
स्तात्पर्यंतु सौजन्यनिष्ठाभेदस्यापि बोधनिषेधएव ननु निषेधप्रतियोगिबोधं साक्षादनुपादाय तत्समानविषयक
ज्ञानांतरनिषेधोनुचितइतिवाच्यं यथाच सौजन्यविशेष्यकबोधोनसंभवति तथा तदभिमतः सौजन्यनिष्ठत्वादिबोधो
पीत्यनुपपत्तिसूचनार्थत्वात् अतएवयेनात्रविशेषणानुयोगिकत्वभासनइत्यंगीक्रियतइत्यत्र तन्मतं यथाश्रुत
मेवानुवदिष्यति कानाममहानिरिति कानुपपत्तिरित्यर्थः येनेतिहेत्वर्थेनप्राप्तः यदिहितादृशकल्पनंविनाचंद्राभेदस
मर्थनमनुपपन्नंस्यात्तदातदृहलादेवान्यत्रदृश्यमानमपिनियममवधूयतथैवकल्पनातत्रक्रमम् अन्यथानुपपत्तिश्चेद
स्तिवस्तुप्रसाधिकापि नष्टिदृष्टवैमत्यंसैवसर्वबलाधिकेति अत्रतवत्समाण्रीत्या तदन्यथाप्युपपन्नमिति नदृष्ट
त्यागः प्रमाणवानित्यभिप्रायः अन्यथोपपत्तिर्नास्त्येवेत्यभिमानात् तत्समर्थनानुपपत्तिमेवोद्भावयति नत्विति अ
न्यथोपपत्तिंदर्शयति नतुभ्रमेरेति सौजन्यप्रतियोगिकाभेदवतीचंद्रिकेत्येतद्बोधोत्तरेत्यर्थः नतुभ्रमेयथोक्तशाब्दबोधासं
भवादाहमानेसति सौजन्यप्रतियोगिकमभेदंचंद्रिकायामवगाहमानेशाब्दबोधेहत्तेनतुभ्रमेरस्वस्यस्वाभिन्नाभिन्नतया
चंद्रिकाप्रतियोगिकमभेदंसौजन्येवगाहमानसमनुपपत्ते नेनैवरात्तिचंद्राभेदारोपः समर्थितइत्यर्थः अभेदमात्रस्यसंसर्ग

ति उभयत्रेति पयोधरपदं श्लेषोदाहरणाभिप्रायेण वंशपदं द्वितीयोदाहरणाभिप्रायेणेत्यवगंतव्यम् रूपकान्तर
सिद्धिहेतुभूतरूपकचतुष्कस्याह भेदोदाहरणमाह भेदे यथेति उत्तरार्द्धे लक्षणावस्थापितरूपवैधर्म्यनिरासप
रमित्यवगंतव्यं यदित्यत्रापि भास्वरत्वादिधर्मेण सुवर्णपट्टिकायां विद्युत्तादात्म्यारोपसंभवात्कथं तु यद्रूपकव्य
तिरेकस्य तद्रूपकव्यतिरेकप्रयोजकत्वं नास्तीति विभाव्यते तदेवमुदाहार्य प्रथमपरंपरितरूपकं मालात्मक
मवतारयति वाचक इति मानसं सरसि स्वांते इत्यनुप्रासेन कमलालक्ष्मीलसत्स्याश्च संकोचपूर्वकमलानाप
ग्लानामसंकोचो विकासस्तज्जनकतया सूर्याभेदारोपः दुर्गाणामसमार्गाणां तदाश्रयणार्थमनन्वेषणं असम
र्थानामेव तदन्वेषणनियमात् तदेव दुर्गायाः पार्वत्या मार्गणेनेन शिवाभेदारोपः समितां संग्रामाणां स्वी
कारएव समिधां काष्ठानां स्वीकारः तेन वह्न्यारोपः सत्यवाक्ये प्रीतिरेव सत्यं दक्षकन्यायामप्रीति तत्र दक्षः प्र
वीणः प्रथवदक्षः प्रजापतिविशेषः विजयो वैरितिरस्कारः तस्य प्राप्त्याभावे सर्वकाले भीमभयजनकतदुम
रंसौम्यत्वात् अथ च विजयोऽर्जुनः बीभत्सुर्विजयः कृष्ण इति महाभारतात् तत्सर्वकालोत्पन्नो भीमः पांडववि
शेषः वत्सरशतमितत्रकालावधनोरत्यंतसंयोग इति द्वितीया परिहृत्येति परिहृतिं पर्यायांतरोपादानेन सहते
तेन प्रकृतार्थानिर्वाहादित्यर्थः तदेवदर्शयति नहीति उत्कार्थ इति हृदयाभिन्नमनोरूप इत्यर्थः तत्सहानीति

अ॰टी॰
१०९
109

परिहरति सहृदानीत्यर्थः हंसादीनादिपदेन दीप्रद्युतिनीललोहितवैश्वानरपदसंग्रहः दहनभीमपदयोस्तु नदसहते
मानसादिपदसदृशेण गतिरित्यर्थ ये शब्दार्थेति शब्दार्थान्तरान्वयव्यतिरेकानुविधानस्यैव तन्मदलंकारता
यां प्रयोजकत्वादित्यर्थः ननु शब्दार्थैरुभयालंकारोयं किमित्यर्थालंकारमध्ये उदाहृतो वीजाभावादित्य
त आह केचिदिति शब्दैरेवेत्यर्थः रणांतःपुरेति प्रसिद्धोदाहरणाभिप्रायेण जस्स रणंतेउरयकरेकुणंत
स्स मंडलग्गलअं रससंमुहीविसहसा परम्मुही होइ रिउसेणा यस्य रणांतःपुरे करे कुर्वतो मंडलाग्रलताम्
रससंमुख्यपि सहसा पराङ्मुखी भवति रिपुसेना कौक्षेयको मंडलाग्रः करवालः कृपाण इत्यमरः साम
र्थ्यादिति रणांतःपुरत्वारोपे केवलमंडलाग्रलतायाः तत्संबंधानर्हतया तत्समानाधिकरणवल्लत्वारोपविच्छि
त्यायोपपत्तेस्तथात्वात् औचित्यवशात्तस्य नायिकात्तादात्म्यप्रतीतेरेवं वधूपकत्वादित्यर्थः अंतःपुरं नायि
काप्रतिनायिकाधिकाधिकरणमिति व्याप्तेरेव सामर्थ्यमिति चक्रवर्त्तिनः दार्ष्टांतिकमाह तथेति एवं च तदारो
पस्यार्थगम्यत्वेन शब्दालंकारत्वविरहात्तदुक्तमेवार्थोदाहरणमिति चंडीदासादयः दृष्टांतत्वाभिमतप्रकृता
हेषम्यमाह रणस्येति सुवेति तथा च तस्य खड्गलताविशेष्यकनायिकात्तादात्म्यप्रतीतिमंतरेणाप्यनुपप
त्तिविरहात्तद्वशंपनदेपदेति भावः नन्वेवं खड्गलतायानायिकातादात्म्यप्रतीतिः कथं सेत्स्यतीत्यत आह प्रतीति

भविकत्वात्कथं न उत्तरभाविविरोधेन तत्समर्थनमित्यपि न प्रत्यवस्थेयम् अत एव तस्य शास्त्रसमानकालीनतयारणेंतःउ
रत्वारोपो विरुद्ध इति अत्र हृदये सरस्वत्यारोपश्चालानेन जयकुंजरस्येत्यादौ जयकुंजरत्वारोप इत्यादिग्रंथाः संगच्छंते वस्तुत
स्संबंधिनोरभेदबोधस्तत्र भेदबोधे हेतुहेतुमद्भाव उचितः परस्पराभेदबोधप्रतिबंधकभेदज्ञानविघटकत्वाद्विशे
षात् नहि तत्संबंध्यभेदबोधोपि स्वातंत्र्येण तदभेदबोधे हेतुः किंतु भेदज्ञाननिरासद्वारैवेति चंद्रिकासौजन्ययोर
भेदबुद्ध्या राजचंद्रयोरभेदारोपः स्थितत्वेवेति न प्रयासलेशोप्यादरणीयः परंतु मुखचंद्र इति समासगतरूपके
चंद्रप्रतियोगिकाभेदवन्मुखमिति बोधानुरोधेन मानसज्ञानाश्रयणं तन्नैव युक्तम् अत एव विद्यासंध्योदयोद्रे
कात् विद्यारजनीक्षये य उदेति न मत्तस्मैकस्मैचिद्विश्वचक्षुषे इति किरणावलिश्लोके विद्याविद्ययोः संध्यारज
नीभ्यां रूपणाद्यविरुद्धेनालभ्यत इति प्रकाशग्रंथो विभक्तिविपरिणामेन संध्यारजन्योर्विद्याविद्याभ्यां रूपणादि
तितद्विवरणं मिश्रग्रंथश्च मानसशाब्दबोधावभिसंधाय संगच्छेते इति तदेतत्सर्वं मनसिकृत्याह दिगिति वाक्यार्थ
रूपके केचित्तु अंकं खंडयितुमुपन्यस्यंति अत्रेदमपीति अधिकमिति प्राचीनेभ्योतिरिक्तमित्यर्थः वाक्यार्थ इति य
कस्मिन्वाक्यार्थे वाक्यार्थांतरारोपो वाक्यार्थरूपकमित्यर्थः विशिष्टोपमायामिति पांड्योयमंसार्पितलंबहार इ
त्यादौ विशेषणानां बिंबभावापन्नहारनिर्झरादीनां उपमानोपमेयभावः सादृश्य पतत्वेतेषां परस्परसादृश्यज्ञानेन

अ०टी०
११०

विशिष्टोपमानिर्वाह इति तदभेदज्ञानस्यैव तथात्वमिति पदेऽपि सादृश्यमभेदरूपमेव ग्राह्यं तथेति तपोदानसलिलोत्क
रादीनामर्थादभेदो गम्यत इत्यर्थः यत्तु हृषयित्तुमाह प्राचीनास्त्विति निदर्शनामिति अन्यथा तत्रवाक्यार्थरूपकत्व
स्यैवापत्त्या निदर्शनोदाहरणत्वविरुध्येतेत्यर्थः ननु नभ्युपगममात्रेण वाक्यार्थरूपकत्वं इतं न सद्यटमित्यभिप्रा
यवानाह अत्रापीति ननु मुखं चंद्र इत्यत्र निदर्शनालक्षणाभावाद्रूपकस्वीकारेऽपि प्रकृते निदर्शनालक्षणाक्रांत
त्वात्तन्न तद्बहिर्भावः साधयितुं शक्योऽविनिगमकाभावादित्यत आह किंचेति पदार्थेति धर्म्यन्तरसंबंधिधर्मस्य ध
र्म्यन्तरे आरोपरूपेत्यर्थः वाक्यार्थेति वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शनेत्युक्तलक्षणेत्यर्थः विशिष्टार्थयो
रिति पदार्थनिदर्शनायां तु शुद्धपदार्थस्यैवारोप इत्यर्थः सोऽपि तत्राभेदेनारोप्यते अत्र त्वभेदेनेति वैषम्यान्तरमपि दर्शि
यति अभेदप्रतीतेरिति तदेव स्पष्टयति धर्म्यंतर इति तत्र हि नेत्रादिरूपे धर्मिणि तत्सदृशनीलांबुजन्मरूपस्य धर्मि
णो लीलारूपो धर्म आरोप्यत इत्यर्थः ननु वाक्यार्थरूपकोच्छेदापत्तिरिष्टापादनमेव तदर्थमेव तेषां प्रवृत्तत्वादित्यत
आह नचेष्टेति यदि हि स्वानभिमतत्वमात्रेण वाक्यार्थरूपकोच्छेदस्तदा इष्टापत्त्या परिहर्तव्यः तदा मया वाक्यार्थरूपक
मेव स्वीकृत्य वाक्यार्थनिदर्शनोच्छेदेऽपि इष्टापत्तिरेव कर्तव्येति भावः किंच मतद्वाक्यार्थनिदर्शनाया विषयान्तरसत्त्वा
न्नात्यंतं तदुच्छेदः ननु तु वाक्यार्थरूपकस्य निरवकाशत्वापत्तिरेवेति बहूनामनुग्रहो न्याय्य इति न्यायेन मतद्वयमपि प्रमा

णवानित्याह तत्वादेति नन्वलक्तकचंदनादीनां विम्बप्रतिविम्बभावसत्त्वादलक्तकमार्जनरूपस्य विषयस्य अलक्तक
रूपविंबविशिष्टत्वात्कथमेतद्रूपकम् नत्र विम्बप्रतिविम्बभावानंगीकारात् अत एव विंबाविशिष्टे इति विषयवि
शेषणं चित्रमीमांसायां रूपकलक्षणेऽभिहितमित्यत आह नचेति मानाभावादिति रूपकशरीरभूताऽभेद
प्रतिकूलत्वविरहेणातदनंगीकारस्यानुचितत्वादित्यर्थः नन्वलक्ष्यानुरोधेन लक्षणप्रणयनी लक्ष्येषु च वि
षयो विंबविशिष्टो न दृश्यत इति तद्बहिर्भावो युक्त एव नच प्रकृतस्थल एव विंबवैशिष्ट्यमस्तीति वाच्यम् अस्य रूप
कत्वेन उभयसंप्रतिपत्तिविषयत्वविरहादित्याशंका उभयाभिमतरूपकस्थल एव विंबवैशिष्ट्यं दर्शयति कं
दर्पेति कलंकविशिष्टे चंद्रे दानाद्रुलांछितकंबुतादात्म्यारोपादत्र विंबवैशिष्ट्यमस्त्येवेति भावः स्वीकारादि
ति अलंकारसर्वस्वविवरणकृतेत्यर्थः ननु क्षालनपदस्य जलसंबंधार्थकत्वात्कथमभेद इत्याशंकाह क्ष
लशोचे इति विशेष्याभेद इति दंडिकुंडलिचैत्रभेदस्य दंडकुंडलभेदपर्यवसानादित्यर्थः नतूक्तं देशकालोका
मं विभिद्येयातां न तु तदालिंगितस्वभावः पद्मरागमणिरिति नन्वौपाधिकभेदमादायैव तर्हि रूपकमस्त्वि
त्यत आह उपमानेनेति उपमानपदहस्तिनिमित्तेत्यर्थः एवमुपमेयतावच्छेदकेऽत्रापि मंतव्यं अन्यथा तत्पा
दानानामुपमेये सलिलस्य चोपमाने विशेषणत्वेनोपमेयोपमानतावच्छेदकतयानत्रेदसत्वेन रूपकतापत्ते

अ॰टी॰
११९

रपरिहारात् नन्वेवमपि सर्वस्वकारोदाहृतनिदर्शनास्थले रूपकमवारणीयमेव तत्र त्वदुक्तधर्मयोर्भेदसत्त्वादित्यत आ
ह किंचेति तात्पर्यमिति तथाशाब्दबोधाभावादिति भावः न सिध्यतीति न च वाक्यार्थयोरभेदारोपस्य निदर्शना
निर्वाहार्थं त्वयापि वाच्यत्वात्कथमेतद्दोषाद्यत इति वाच्यम् तस्य भेदारोपस्य यमादिपर्यायेनोक्तदोषः स्यात् किं
तु तस्यालंकारत्वविरहमात्रे तात्पर्यं इदं चाग्रे स्वयमेव विशदीकरिष्यति किंच यत्र धर्मिणः किंचित्प्रतियोगि
काभेदवत्ताप्रयुक्तोत्कर्षविवक्षा न तत्र रूपकालंकारः अत्र तु मार्जनस्य यथोक्तपाण्डुरीकरणाभेदप्रयुक्तोत्कर्षो
न विवक्षित इत्याह मार्जनस्येति यदुत्कर्षेऽर्थकवाक्यतात्पर्यं तस्यैवोपमेयत्वात् तादृशाश्चात्र न त्वापवनत्वमार्ज
नमित्यर्थः ननु परंपरया मार्जनधर्मिकपाण्डुरीकरणप्रतियोगिकाभेदबोधस्यापि नखोत्कर्षपर्यवसायित्व
मस्त्येवेति नोक्तदोष इत्यत आह एतादृशेति ननु वैधर्म्यप्रतियोगित्वरूपधर्मकप्रयोज्य एवोभयोस्तादा
त्म्यारोपः आरोपमात्रे सादृश्यस्य हेतुत्वादित्यत आह (एतादृशेति ननु वैधर्म्यप्रतियोगित्वरूपधर्म) एवं किंचिदिति स्वा
श्रयोत्कर्षपर्यवसायिन एवाभेदस्यालंकारत्वात् वैधर्म्यप्रतियोगित्वरूपधर्ममूलकतादात्म्यारोपस्य च मार्जनाप
कर्षवसानादिति भावः सादृश्यस्येति यथा तादृशसादृश्येनोपमा तथा तन्मूलकतादात्म्यारोपोन रूपकमपीत्य
र्थः उभयोर्वैधर्म्यमेव दर्शयति तस्मादिति मूलयुक्तिमुक्त्वाऽर्वाग्नरयुक्तिमप्याह तेनचेति अप्रसिद्धत्वेति य

याप्रकृतएवचंद्रस्यचंदनजस्यपांडुरीकरणमप्रसिद्धमित्यर्थः रूपकेत्विति मुखंचंद्रइत्यादौचंद्रादेः प्रसिद्धता
द्धिरिति भावः निदर्शनांतरेऽप्यभेदप्रतियोग्यप्रसिद्धिं दर्शयति तथेति अत्र हंसेदोरकलकत्वमप्रसिद्ध
मेवेत्यर्थः एवंक्रूरसूर्यपादावपिबोध्यम् सोयंकुरंगैरिति हर्षचरितेराज्यवर्द्धनस्योक्तिः सर्वेषामपिमाल
वैः परिभवइत्यत्राभेदारोपः एतावन्मात्रमेववैषम्यबीजमिति भ्रमेणात्रव्यभिचारमुद्भावयति तत्विति
नायमिति अभेदप्रतियोग्यप्रसिद्धिरूपइत्यर्थः प्रदीपेति सौंदर्यलहर्यांभगवत्पादानामुक्तिः अत्रनीराज
नादीनांस्वतःप्रसिद्धत्वेनसंभवित्वमेवेत्यर्थः अत्रवाक्यार्थनिदर्शनायामेवाऽभेदप्रतियोगिनोवाक्यार्थस्या
प्रसिद्धत्वमित्येवविवक्षितं वियोगेगौडनारीणांइतितुपदार्थनिदर्शनैवेतिनव्यभिचारः वाक्यार्थनिदर्शना
तद्रूपकयोरेवात्रवैधर्म्यस्यप्रस्तुतत्वात् प्रदीपेत्यत्रतुयद्यपिवाक्यार्थनिदर्शनैव तथापितद्धर्मीभाववति
तत्संबंधजनकाएवनीराजनादयोऽभिमताः तथैवप्रकृतोत्कर्षसिद्धेः सूर्यनीराजनादयस्तुसूर्यादावालो
काद्यभाववति आलोकसंबंधादिजनकत्वविशिष्टाअप्रसिद्धाएवेतिनव्यभिचारइतिसमाधानंतुशाकवेन तथा
पिनिदर्शनायामभेदप्रतियोगिनोवाक्यार्थस्याप्रसिद्धेरभ्युपगमस्यसर्वप्रसिद्धत्वादपहायान्यदेवाह
किंनतइति नहीति अत्ररूपकत्वाभावस्सर्वमेवयुक्तिरुक्ताऽदंतत्ववानरवैधर्म्यसंभवमात्राइक्रंनत्वेतेदवरूप

केवलत्वमेव साधकं येनैतद्व्यभिचारेण वाक्यार्थनिदर्शनास्थलेऽपि वाक्यार्थरूपकमापद्येतेत्यर्थः तदेताव
ताहृशाभेदारोपस्यालंकारत्वाभाव उक्तः अलंकारत्वं न निर्वहतीत्युक्तेः तत्राभेदारोप एव तिष्ठत्विति
शंकां निरादेशयति अथेति नहीति येनात्र निदर्शनात्वमप्यभेदारोपमूलकं तस्यादिति दोषः प्रसज्येतेति भावः
किंत्विति तथा चाभेदमात्रस्य चमत्कारजनकत्वविरहात्तावन्मात्रशरीरं रूपकमत्र नालंकारशहार्थः यत्र
पूर्वं पाठान्तरेण तत्त्वादनवरत्नेति श्लोक एव निदर्शनावकाशो दर्शितस्तत्तं दूषयति किंचेति कर्त्रीरिति यत्नक्ष्ण
हृपरामृष्टयोर्मार्जनपांडुरीकरणकर्त्रीरित्यर्थः अवान्तरविचारमुक्त्वा वाक्यार्थरूपकस्वीकार्न्हणं मूलयुक्तिं खं
डयितुमुपन्यस्यति यदपीति जीवातुत्वेति तल्लक्षणेनेत्यर्थः ननूदाहृतस्थले विदर्शनास्वीकारात्तस्याप्यभे
दारोपनिबंधनत्वात्तद्दैवैधर्म्यं इत्यत आह निदर्शनाजीवातुत्वेति निदर्शनात्वावच्छेदेनोपजीव्यत्वमित्यर्थः।
अभिचारमाह इंदुशोभामिति तत्राप्युपत्वादिनेव शोभादेर्मुखादावारोपादिति भावः एवं चालंकारसत्ताहि
भाजकोपाध्यवच्छेदेन रूपकतादृशोपाधिसामानाधिकरण्येन च निदर्शनायामभेदारोपस्यापेक्षितत्वात् तस्य
रूपकपदप्रापितत्वमेवेत्याशयः अभे